ग्रंथसंख्या ४८००

॥ ॐ नमो गणेशाय ॥ ॐ नमो भगवते वासुदेवाय ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥ सदैकं विश्वकायं च
ध्येयः पुमान् गुणैर्मिश्रः स्थितिकृतिकालसंलयः । प्रधानबुद्ध्यादिजगत्प्रपञ्चसूः स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥ प्रणम्य विष्णुं विश्वेशं ब्रह्मादी
न्प्रणिपत्य च । गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसम्मितं ॥ कृतिदासपुराणज्ञं वेदवेदाङ्गपारगं । सर्वशास्त्रार्थतत्त्वज्ञं वसिष्ठतनयात्मजं ॥ पराशरं
सुखासीनमृषिं मुनिवरोत्तमं । मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च । त्वत्तो हि वेदाध्ययनमधीतमखिलं गुरो ॥ धर्मशास्त्राणि सर्वाणि [illegible]दाङ्गानि
यथाक्रमं ॥ त्वत्प्रसादान्मुनिश्रेष्ठ मामन्ये नाकृतश्रमं । वक्ष्यन्ति सर्वशास्त्रेषु प्रायशो येऽपि विद्विषः ॥ सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् । ब
भूव भूयश्च यथा महाभाग भविष्यति ॥ यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरं । लीनमासीद्यथा यत्र लयमेष्यति यत्र च ॥ यत्प्रमाणानि भूतानि देवा
दीनां च सम्भवं । समुद्रपर्वतानां च संस्थानं च यथा भुवः ॥ सूर्यादीनां च संस्थानं प्रमाणं मुनिसत्तम । देवादीनां तथा वंशान् मनून्मन्वन्तराणि च ॥ कल्पा

न्कल्पविकल्पांश्च चातुर्युगविकल्पितान् । कल्पान्तस्य स्वरूपं च युगधर्मांश्च कृत्स्नशः ॥ देवर्षिपार्थिवानां च चरितं यन्महामुने ॥ वेदशाखाप्रणयनं
यथावद्व्यासकर्तृकं । धर्मांश्च ब्राह्मणादीनां तथा चाश्रमवासिनां । श्रोतुमिच्छाम्यहं सर्वं त्वत्तो वासिष्ठनन्दन ॥ ब्रह्मन्प्रसादप्रवणं कुरुष्व मयि मान
सं । येनाहमेतज्जानीयां त्वत्प्रसादान्महामुने ॥ ॥ पराशर उवाच ॥ साधु मैत्रेय धर्मज्ञ स्मारितोऽस्मि पुरातनं । पितुः पिता मे भगवान् वसिष्ठो यदुवाच
ह ॥ विश्वामित्रप्रयुक्तेन रक्षसा भक्षितः पुरा । श्रुतस्तातस्ततः क्रोधो मैत्रेयाभून्ममातुलः ॥ ततोऽहं रक्षसां सत्रं विनाशाय समारभं । भस्मीभूताश्च शतशस्त
स्मिन्सत्रे निशाचराः ॥ ततः संक्षीयमाणेषु तेषु रक्षःस्वशेषतः । मामुवाच महाभागो वसिष्ठो मत्पितामहः ॥ अलमत्यन्तकोपेन तात मन्युमिमं
जहि । राक्षसा नापराध्यन्ति पितुस्ते विहितं हि तत् ॥ मूढानामेव भवति क्रोधो ज्ञानवतां कुतः । हन्यते तात कः केन यतः स्वकृतभुक्पुमान् ॥ संचितस्या
पि महता वत्स क्लेशेन मानवैः । यशसस्तपसश्चैव क्रोधो नाशकरः परः ॥ स्वर्गापवर्गव्यासेधकारणं परमर्षयः । वर्जयन्ति सदा क्रोधं तात मा तद्वशो भव ॥

कूल

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भव ॥ अलं निशाचरैर्दग्धैर्दीनैरनपकारिभिः। सत्रं ते विरमत्वेतत्क्षमासारा हि साधवः॥ एवं तातेन तेनाहमनुनीतो महात्मना। उपसंहृतवान्सत्रं सद्य
स्तद्वाक्यगौरवात्॥ ततः प्रीतः स भगवान्वसिष्ठो मुनिसत्तमः। संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः सुतः॥ पितामहेन दत्तार्घः कृतासनपरिग्रहः।
मामुवाच महाभागो मैत्रेय पुलहाग्रजः॥ वैरे महति यद्वाक्याद्गुरोरद्याश्रिता क्षमा॥ त्वया तस्मात्समस्तानि भवान्शास्त्राणि वेत्स्यति। सन्ततेर्मम वि
च्छेदः क्रुद्धेनापि न तत्कृतः॥ त्वया तस्मान्महाभाग ददाम्यन्यं महावरं। पुराणसंहिताकर्ता भवान्वत्स भविष्यति॥ देवतापारमार्थ्यं च यथावद्वेत्स्यते २
भवान्। प्रवृत्ते च निवृत्ते च कर्मण्यस्तमला मतिः॥ मत्प्रसादादसंदिग्धा तव वत्स भविष्यति। ततश्च भगवान्प्राह वसिष्ठो मे पितामहः॥ पुलस्त्ये
न यदुक्तं ते सर्वमेतद्भविष्यति। इति पूर्वं पुलस्त्येन वसिष्ठेन च धीमता॥ यदुक्तं तत्स्मृतिं याति त्वत्प्रश्नादखिलं मम। सोऽहं वदाम्यशेषं ते मैत्रेय
परिपृच्छते। पुराणसंहितां सम्यक् तां निबोध यथातथं॥ विष्णोः सकाशादुद्भूतं जगत्तत्रैव संस्थितं। स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च स०..

॥ इति श्रीविष्णुपुराणे प्रथमाध्यायः॥ ॥ पराशर उवाच ॥ अविकाराय शुद्धाय नित्याय परमात्मने। सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ नमो हि
रण्यगर्भाय हरये शंकराय च। वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः। अव्यक्तव्यक्तरूपाय विष्णवे
मुक्तिहेतवे॥ सर्गस्थितिविनाशानां जगतो यो जगन्मयः। मूलभूतो नमस्तस्मै विष्णवे परमात्मने॥ आधारभूतं विश्वस्याप्यणीयांसमणीयसां। प्रण
म्य सर्वभूतस्थमच्युतं पुरुषोत्तमं। ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः॥ तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितं। विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे
तथा प्रभुं। प्रणम्य जगतामीशमजमक्षयमव्ययं। कथयामि यथा पूर्वं दक्षाद्यैर्मुनिसत्तमैः॥ पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः॥ तैश्चोक्तं पु
रुकुत्साय भूभुजे नर्मदातटे। सारस्वताय तेनापि मम सारस्वतेन च ॥ परः पराणां परमः परमात्मात्मसंस्थितः॥ रूपवर्णादिनिर्देशविशेषणवि
वर्जितः॥ अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः॥ वर्जितः शक्यते वक्तुं यः सदास्तीति केवलं। सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततः स वासु

दृश्यति विद्वद्भिः परिपश्यत । तद्ब्रह्म परमं नित्यमजमक्षयमव्ययं ॥ एकःस्वरूपं च सदा हेयाभावाच्च निर्मलं । तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपव
त् ॥ तथा पुरुषरूपेण कालरूपेण च स्थितः । परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परः । प्रधानपुरुषाव्यक्तका
लानां परमं हि यत् ॥ पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदं । प्रधानव्यक्तपुरुषकालास्तु प्रविभागशः ॥ रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः । व्यक्तं वि
ष्णुस्तथाव्यक्तं पुरुषः काल एव च ॥ क्रीडतो बालकस्येव चेष्टां तस्य निशामय । अव्यक्तं कारणं यत्तत्प्रधानमृषिसत्तमैः ॥ प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं स 3
दसदात्मिका । अक्षय्यं नान्यदाधारममेयमजरं ध्रुवं ॥ शब्दस्पर्शविहीनं तद्रूपादिभिरसंहितं । त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययं ॥ तेनाग्रे सर्वमे
वासीद्व्याप्तं वै प्रलयादनु । वेदवादविदो विप्रा नियता ब्रह्मवादिनः ॥ पठन्ति चैतमेवार्थं प्रधानप्रतिपादकं ॥ नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो
ज्योतिरभून्न चान्यत् । श्रोत्रादिबुद्ध्यानुपलभ्यमेकं प्राधानिकं ब्रह्म पुमांस्तदासीत् ॥ विष्णोः स्वरूपात्परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र । तस्यैव

तेन्येन धृते विमुक्ते रूपान्तरं तद्द्विज कालसंज्ञं ॥ प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत् । तस्मात्प्राकृतसंज्ञोयमुच्यते प्रतिसंचरः ॥ अनादिर्भगवान्का
लो नान्तोस्य द्विज विद्यते । अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ॥ गुणसाम्ये ततस्तस्मिन् पृथक्पुंसि व्यवस्थिते । कालस्वरूपं रूपं तद्विष्णोर्मैत्रेय वर्तते ॥
ततस्ततः परं ब्रह्म परमात्मा जगन्मयः । सर्वगः सर्वभूतेशः सर्वात्मा परमेश्वरः ॥ प्रधानपुरुषौ चापि प्रविश्यात्मेच्छया हरिः ॥ क्षोभयामास संप्राप्ते सर्गका
ले व्ययाव्ययौ । यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ॥ मनसो नोपकर्तृत्वात्तथासौ परमेश्वरः ॥ स एव क्षोभको ब्रह्मन् क्षोभ्यश्च पुरुषोत्तमः ॥ स संकोचव
िकासाभ्यां प्रधानत्वे व्यवस्थितः । विकासाणुस्वरूपैश्च ब्रह्मरूपादिभिस्तथा ॥ व्यक्तस्वरूपश्च तथा विष्णुः सर्वेश्वरेश्वरः । गुणसाम्यात्ततस्तस्मात्क्षेत्रज्ञाधि
ष्ठितान्मुने । गुणव्यञ्जनसंभूतिः सर्गकाले द्विजोत्तम ॥ प्रधानतत्त्वसंभूतं महान्तं तत्समावृणोत् । सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ॥ प्रधानत
त्त्वेन समं त्वचा बीजमिवावृतं । वैकारिकस्तैजसश्च भूतादिश्चैव तामसः । त्रिविधोयमहंकारो महतत्त्वादजायत । भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्म

ह्यावृत॥ यथा प्रधानेन महान्महता स तथावृतः। भूतादिस्तु विकुर्वाणः शब्दतन्मात्रकं ततः॥ ससर्ज शब्दतन्मात्रादाकाशं शब्दलक्षणं। शब्दमात्रं तथाकाशं
भूतादिः स समावृणोत्॥ आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह। बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः॥ आकाशं शब्दमात्रं तु स्पर्शमात्रं समा-
वृणोत्। ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह॥ ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते। स्पर्शमात्रं तथा वायू रूपमात्रं समावृणोत्॥ विकुर्वाणा-
नि चाम्भांसि गन्धमात्रं ससर्जिरे। संघातो जायते तस्मात्तस्य गन्धो गुणो मतः॥ तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृता। तन्मात्राण्यविशेषाणि अवि- ४
शेषास्ततो हि ते॥ न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः॥ भूततन्मात्रसर्गोऽयमहंकारात्तु तामसात्। तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश॥ एका-
दशं मनश्चात्र देवा वैकारिकाः स्मृताः॥ त्वक्चक्षुर्नासिका जिह्वा श्रोत्रमत्र च पञ्चमं॥ शब्दादीनामवाप्त्यर्थं बुद्धियुक्तानि वै द्विज। पायूपस्थौ करौ पादौ वा-
क्च मैत्रेय पञ्चमी॥ विसर्गशिल्पगत्युक्ति कर्म तेषां च कथ्यते। आकाशवायुतेजांसि सलिलं पृथिवी तथा॥ शब्दादिभिर्गुणैर्ब्रह्मन्संयुक्तान्युत्तरोत्तरैः। शान्ता-

का

घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः॥ नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः॥ समेत्यान्योन्यसंयोगं
परस्परसमाश्रयाः। एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः॥ पुरुषाधिष्ठितत्वाच्च प्रधानानुग्रहेण च। महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते॥ तत्-
क्रमेण विवृद्धं तु जलबुद्बुदवत्समं। भूतेभ्योऽण्डं महाबुद्धे वृद्धं तदुदकेशयं॥ प्राकृतं ब्रह्मरूपस्य विष्णोः स्थानमनुत्तमं। तत्राव्यक्तस्वरूपोऽसौ व्यक्तरूपी जगत्-
पतिः॥ विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः। मेरुरुल्बमभूत्तस्य जरायुश्च महीधराः॥ गर्भोदकं समुद्राश्च तस्याभूवन्महात्मनः। साद्रिद्वीपसमुद्राश्च स-
ज्योतिर्लोकसंग्रहः। तस्मिन्नण्डेऽभवद्विप्र सदेवासुरमानुषः। वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः॥ वृतं दशगुणैरण्डं भूतादिर्महता तथा। अव्य-
क्तेनावृतो ब्रह्मंस्तैः सर्वैः सहितो महान्॥ एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतं॥ नालिकेरफलस्यान्तर्बीजं बाह्यदलैरिव॥ जुषन्रजोगुणं तत्र स्वयं
विश्वेश्वरो हरिः। ब्रह्मा भूत्वास्य जगतो विसृष्टौ संप्रवर्तते॥ सृष्टिं च पात्यनुयुगं यावत्कल्पना। सत्त्वभृद्भगवान्विष्णुरप्रमेयपराक्रमः॥ तमोद्रेकी च कल्पा-

न्नरूपी जनार्दनः। त्रैलोक्याखिलभूतानि तत्क्षयायाति शेषतः॥ संहृत्य चित्वा भूतानि जगत्येकार्णवीकृते। नागपर्यङ्कशयने शेते च परमेश्वरः॥ प्रबु
द्धश्च पुनः सृष्टिं करोति ब्रह्मरूपधृक्॥ सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकां॥ स संज्ञां याति भगवानेक एव जनार्दनः॥ स्रष्टा सृजति चात्मानं विष्णुः
पाल्यं च पाति च॥ उपसंह्रियते चान्ते संहर्त्ता च स्वयं प्रभुः। पृथिव्यापस्तथा तेजो वायुराकाश एव च॥ सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत्। स एव सर्व
भूतात्मा विश्वरूपो यतोऽव्ययः॥ सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकं॥ स एव सृज्यः स च सर्गकर्त्ता स एव पात्यत्ति च पाल्यते च। ब्रह्माद्यवस्थाभिरशेष ३
मूर्त्तिर्विष्णुर्वरिष्ठो वरदो वरेण्यः॥ ❀ ॥ इति श्रीविष्णुपुराणे द्वितीयोऽध्यायः॥ ॥ मैत्रेय उवाच॥ निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः॥ कथं सर्गादि
कर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥ ॥ पराशर उवाच॥ शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः॥ यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥ भवन्ति त
पतां श्रेष्ठ पावकस्य यथोष्णता। निर्गुणापि तथा सर्गे भगवान् संप्रवर्त्तते॥ नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः। उत्पन्नः प्रोच्यते विद्वन् नि

ख्याता २ ता नः

त्यमेवोपचारतः॥ निजेन तस्य मानेन आयुर्वर्षशतं स्मृतं। तत्पराख्यं तदर्द्धं च परार्द्धमभिधीयते॥ कालस्वरूपी विष्णोश्च यन्मयोक्तं तवानघ। तेन तस्य निबोध
त्वं परिमाणोपपादनं। अन्येषां चैव जन्तूनां चराणामचराश्च ये। भूभूभृत्सागरादीनामशेषाणां च सत्तम॥ काष्ठा पंचदशाख्याता निमेषा मुनिसत्तम। का
ष्ठा त्रिंशत् कला त्रिंशत् कला मौहूर्त्तिको विधिः। तावत्संख्यैरहोरात्रं मुहूर्त्तैर्मानुषं स्मृतं॥ अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः। तैः षड्भिरयनं वर्षं द्वेऽयने
दक्षिणोत्तरे॥ अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनं। दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितं॥ चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे। चत्वारि त्रीणि द्वे चै
कं कृतादिषु यथाक्रमं॥ दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः। तत्प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते॥ सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो
हि यः। सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम। युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञितः॥ कृतं त्रेता द्वापरश्च कलिश्चैव चतुर्युगं। प्रोच्यते तत्
सहस्रं च ब्रह्मणो दिवसं मुने॥ ब्रह्मणो दिवसे ब्रह्मन् मनवश्च चतुर्दश। भवन्ति परिमाणं च तेषां कालकृतं शृणु॥ सप्तर्षयः सुराः शक्रो मनुस्तत्सूनवो नृपाः

।एककाले हि सृज्यन्ते संह्रियन्ते च पूर्ववत् । चतुर्युगाणां संख्याता साधिका ह्येकसप्ततिः ॥ मन्वन्तरं मनोः कालः सुरादीनां च सत्तम । अष्टौ शतसहस्राणि दिव्य
या संख्यया स्मृतम् ॥ द्विपञ्चाशत्तथान्यानि सहस्राण्यधिकानि तु । त्रिंशत्कोट्यस्तु सम्पूर्णाः संख्याताः संख्यया द्विज ॥ सप्तषष्टिस्तथान्यानि नियुतानि महामुने
विंशतिश्च सहस्राणि कालोऽयमधिकं विना ॥ मन्वन्तरस्य संख्येयं मानुषैर्वत्सरैर्द्विज । चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतम् ॥ ब्राह्मो नैमित्तिको नाम तस्या
न्ते प्रतिसञ्चरः । तदा हि दह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम् ॥ जनं प्रयान्ति तापार्ता महर्लोकनिवासिनः । एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ॥ भोगिश ६
य्यागतः शेते त्रैलोक्यग्रासबृंहितः । जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः ॥ तत्प्रमाणां हि तां रात्रिं तदन्ते सृजते पुनः । एवं तु ब्रह्मणो वर्षमेवं
वर्षशतं च यत् ॥ शतं हि तस्य वर्षाणां परमायुर्महात्मनः । एकमस्य व्यतीतं तु परार्धं ब्रह्मणोऽनघ ॥ तस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः । द्वि
तीयस्य परार्धस्य वर्तमानस्य वै द्विज ॥ वाराह इति कल्पोऽयं प्रथमः परिकल्पितः ॥ ॥ इति श्रीविष्णुपुराणे तृतीयोऽध्यायः ॥ ॥ मैत्रेय उवाच ॥ प्रजाः सस
मैत्रेय उवाच ॥ ब्रह्मा नारायणाख्योऽसौ कल्पादौ भगवान्यथा । ससर्ज सर्वभूतानि तदाचक्ष्व महामुने ॥१ पराशर उवाच ॥।

के १

ग २ प्र व

ॐ भगवान् ब्रह्मा नारायणात्मकः । प्रजापतिपतिर्देवो यथा तन्मे निशामय ॥ अतीतकल्पावसाने निशासुप्तोत्थितः प्रभुः । सत्त्वोद्रिक्तस्तदा ब्रह्मा शून्यं लोकम
वैक्षत ॥ नारायणः परोऽचिन्त्यः परेषामपि स प्रभुः । ब्रह्मस्वरूपी भगवाननादिः सर्वसम्भवः ॥ इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति । ब्रह्मस्वरूपिणं देवं
जगतः प्रभवाप्ययम् । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ तोयान्तः स महीं ज्ञात्वा जगत्येकार्णवे प्रभुः । अनु
मानात्तदुद्धारं कर्तुकामः प्रजापतिः । अकरोत्स तनूमन्यां कल्पादिषु यथा पुरा ॥ मत्स्यकूर्मादिकां तद्वद्वाराहं वपुरास्थितः । वेदयज्ञमयं रूपमशेषज
गतः स्थितौ ॥ स्थितः स्थिरात्मा सर्वात्मा परमात्मा प्रजापतिः । जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः ॥ प्रविवेश तदा तोयमात्माधाराधरो धरः । निरीक्ष्य तं
तदा देवी पातालतलमागतम् । तुष्टाव प्रणता भूत्वा भक्तिनम्रा वसुन्धरा ॥ ॥ पृथिव्युवाच ॥ नमस्ते सर्वभूताय तुभ्यं शङ्खगदाधर । मामुद्धरास्मादद्य त्वं त्वत्तो
ऽहं पूर्वमुत्थिता ॥ त्वयाहमुद्धृता पूर्वं त्वन्मयाहं जनार्दन । तथान्यानि च भूतानि गगनादीन्यशेषतः ॥ नमस्ते परमात्मात्मन् पुरुषात्मन्नमोऽस्तु ते । प्रधानव्यक्त

दा १

न म

कायकालरूपायतनमः॥त्वंकर्त्तासर्व्वभूतानां त्वंपाता त्वंविनाशकृत्।सर्गादिषुप्रजाब्रह्मा विष्णूरूपात्मरूपधृक्॥संहर्त्तारुद्ररूपेणसकलंजगदस्यकार्यं वीक्ष
त।त्वमेषत्वमवाप्स्यविन्दविन्द्यमानामणीषितः॥रूपवत्तायस्यनेरूपं तन्नजानातिकश्चन।अथवानेषूपदूषी तदत्वंक्विदिवौकसः॥त्वामानाथ्य पर्व्वब्रह्म
यानामर्किमम्हवः॥वासुदेवमनानाथ्य कंभाद्गपमवाप्स्यति॥यत्किंचित्निर्म्मासाग्राश्चीयज्ञाद्यंवेदवादिनः॥वृद्ध्वावयस्यविश्वेषीतद्रूपमखिलंतव॥
त्वन्मयाद्धिस्त्वदाधाराःत्वत्स्पृष्टात्वामुपाश्रिताः।माधवीषितिलाकस्यमहिधव्रतमादिमान्॥ऊयाखिललोकानामयकुलस्थलमप्यावाप्य।तस्मानन्तरूयावाचक ७
ऊयवाकमयपरा।परापरात्मन्विश्वात्मन्ऊयायज्ञपतनय॥त्वंयज्ञस्त्वंवषट्कारस्त्वंमाक्षांवत्त्वमध्ययंः॥त्वंवदास्त्वंतदाङ्गानित्वंयज्ञपुरुषोहरे॥
सूर्य्यादियोयदासुकानलरूपानरिवलीवयत्।मूर्त्तामूर्त्तमदृश्यंचदृश्यंचपुरुषोत्तम॥यच्चोक्तंयच्चनैवोक्तंमयात्रपरमेश्वर।तस्मैसर्व्वंनमस्तुभ्यंभूयोभू ऍं
यानमोनमः॥ ॥पराशरउवाच॥एवंसंस्तूयमानस्तुपृथिव्यापृथिवीधरः।सामस्वरध्वनिःश्रीमान्जगर्ज्जपरिघर्घरं॥ततःसमुत्क्षिप्यधरांस्वदंष्ट्रा

स्मंशात्

क
महावराहःस्फुटपद्मलोचनः॥रसातलादुत्पलपत्रसन्निभः।समुत्थितोनीलइवाचलोमहान्।उत्तिष्ठतातेनमुखानिनाहृतं तत्तुसंप्लावान्कारुलस्या स ध्याहू
।प्रक्षालयामासहिताञ्जनोद्युमतोन्सनन्दनादीनपकल्मषान्मुनीन्॥उत्तिष्ठतस्तस्यजलाद्रकुक्षौ महावराहस्यमहीविगृह्य।विधून्वतोवेदमयंशरीरं
मान्कवस्काममनयारूषन्ति॥प्रयान्तिभायानिखिलाय विक्रमा वसातलंधःकृतशब्दसंततः।श्वासानिलार्त्ताःपरितःप्रयान्तिसिद्धाजनार्येनियतंवसन्ति॥नि
उत्थृक्षूपापपत्रीतयतस्या,लाकउनायोनिवसन्तियोगिनः॥सनन्दनाद्यानतिनम्रकन्धरा धराधरंधीरतरोद्धतेक्षणं॥ऊयस्वदेवाधिपतेभगवन्त प्र
भागदागस्वधवापिवकष्टकं।प्रसृतिनाशस्थितिहेतवोश्वरस्त्वमेवनान्यःपरमंचयत्पदं॥पादेषुवेदास्तवयूपदंष्ट्रादन्तेषुयज्ञाश्चितयश्चवक्त्रे।हुताशजि
ह्वासितनूरुहाणि,दर्भाःप्रभायज्ञपुमांस्त्वमेव॥विलोचनेरात्र्यहनीमहात्मन्सर्व्वाश्रयंब्रह्मपरंशिरस्ते।सूक्तान्यशेषाणिसटाकलापो घ्राणंसमस्तानिहवीं
षिदेव॥स्रुक्तुण्डसामस्वरधीरनादप्राग्वंशकायाखिलसत्रसन्धे।पूर्त्तेष्टधर्म्मश्रवणोसिदेव सनातनात्मन्भगवन्प्रसीद॥पदक्रमेकान्तसमस्तमन्त्रमादिं

रूप ४

स्थितौ वा कारण विश्वमूर्त्ते । विश्वस्य विद्धि परमेश्वरासि प्रसीद नाथाखिलभावभव्य ॥ दंष्ट्राग्रविन्यस्तमशेषमेतद् भूमण्डलं नाथ विभाव्यते ते । विगाहतः पद्मव
नं विलग्नं सरोजिनीपत्रमिवोढपङ्कं ॥ द्यावापृथिव्योरतुलप्रभाव यदन्तरं तद्वपुषा तवैव । व्याप्तं जगद्व्याप्तिसमर्थदीप्ते हिताय विश्वस्य विभो भवत्वं ॥ पर
मार्थस्त्वमेवैको नान्योस्ति जगतः पते । तवैष महिमा येन व्याप्तमेतच्चराचरं ॥ यदेतद्दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव । भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥
प्रसीद सर्वसर्वात्मन् भवाय जगतामिमां । उद्धरोर्वीममेयात्मन् शन्नो देह्यब्जलोचन ॥ सत्त्वोद्रिक्तोसि भगवन् गोविन्द पृथिवीमिमां । समुद्धर भवायेश शः 
न्नो देह्यब्जलोचन । सर्गप्रवृत्तिर्भवतो जगतामुपकारिणी ॥ भवत्वेषा नमस्तेस्तु शन्नो देह्यब्जलोचन ॥ ॥पराशर उवाच ॥ एवं संस्तूयमानस्तु परमात्मा
महीधरः । उज्जहार क्षितिं क्षिप्रं न्यस्तवांश्च महाम्भसि ॥ तस्योपरि जलौघस्य महती नौरिव स्थिता । विततत्वात्तु देहस्य न मही याति संप्लवं ॥ ततः क्षितिं समां
कृत्वा पृथिव्यां सोचिनोद्गिरीन् । यथाविभागं भगवाननादिः परमेश्वरः ॥ प्राक्सर्गदग्धानखिलान पर्वतान्पृथिवीतले । अमोघेन प्रभावेन ससर्ज्जामोघवा 8

यथा ५म

ञ्छितः ॥ भूविभागं ततः कृत्वा सप्तद्वीपान्यथाक्रमं ॥ भूराद्यांश्चतुरो लोकान् पूर्ववत्समकल्पयत् । ब्रह्मरूपधरो देवस्ततोसौ रजसावृतः ॥ चकार सृष्टिं
भगवांश्चतुर्वक्त्रधरो हरिः । निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि ॥ प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वैकं नान्यत्किञ्चिदपेक्ष्य
ते ॥ नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुतां ॥ ॥ इति श्रीविष्णुपुराणे चतुर्थोध्यायः ॥ ॥मैत्रेय उवाच ॥ यथा ससर्ज्ज देवोसौ देवर्षिपितृदानवान्
मनुष्यतिर्यग्वृक्षादीन् भूव्योमसलिलौकसः ॥ यद्गुणं यत्स्वभावं च यद्रूपं च जगद्द्विज । सर्गादौ सृष्टवान् ब्रह्मा तन्ममाचक्ष्व विस्तरात् ॥ ॥परा
शर उवाच ॥ मैत्रेय कथयाम्येष शृणुष्व सुसमाहितः । यथा ससर्ज्ज देवोसौ देवादीनखिलान्विभुः ॥ सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा । अबु
द्धिपूर्वकः सर्गः प्रादुर्भूतस्तमोमयः ॥ तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः । अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः ॥ पञ्चधावस्थितः सर्गो ध्या
यतोप्रतिबोधवान् । बहिरन्तोप्रकाशश्च संवृतात्मा नगात्मकः ॥ मुख्या नगा यतः प्रोक्ता मुख्यसर्गस्ततस्त्वयं । तं दृष्ट्वासाधकं सर्गममन्यदपरं पुनः ॥ त

नू ३

स्याति ध्यायतः सर्गः तिर्यक्स्रोताभ्यवर्तत । यस्मात्तिर्यक्प्रवृत्तः स तिर्यक्स्रोतास्ततः स्मृतः ॥ पश्वादयस्ते विख्यातास्तमःप्रायाह्यवेदिनः । उत्पथ
ग्राहिणश्चैव तेऽज्ञाने ज्ञानमानिनः ॥ अहंकृता अहंमाना अष्टाविंशद्विधात्मिकाः । अन्तःप्रकाशास्ते सर्वे आवृताश्च परस्परं ॥ तमप्यसाधकं मत्वा
ध्यायतोऽन्यस्ततोऽभवत् । ऊर्ध्वस्रोतास्तृतीयस्तु सात्त्विकोर्ध्वमवर्तत ॥ ते सुखप्रीतिबहुला बहिरन्तश्च नावृताः । प्रकाशा बहिरन्तश्च ऊर्ध्वस्रोतोद्भवाः स्मृताः ॥
तुष्टात्मानस्तृतीयस्तु देवसर्गस्तु यः स्मृतः । तस्मिन्सर्गेऽभवत्प्रीतिर्निष्पन्ने ब्रह्मणस्तदा ॥ ततोऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमं । असाधकस्तु
तान्दृष्ट्वा मुख्यसर्गादिकेऽभवान् ॥ तथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः । प्रादुर्बभौ तदाव्यक्तादर्वाक्स्रोतस्तु साधकः । यस्मादर्वाग्व्यवर्तन्त त
तोऽर्वाक्स्रोतसस्तु ते । ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः ॥ तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः । प्रकाशा बहिरन्तश्च मनुष्याः साधकाश्च ते ॥ इ
त्येते कथिताः सर्गाः षडत्र मुनिसत्तम । प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ॥ तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः । प्रकाशा बहिरन्तश्च मनुः

ष्याः साधकास्ते तु ॥ वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः । इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः ॥ मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृ
ताः । तिर्यक्स्रोतश्च यः प्रोक्तस्तिर्यग्योन्यः स उच्यते ॥ तदूर्ध्वस्रोतसां षष्ठो देवसर्गस्तु संस्मृतः । ततोऽर्वाक्स्रोतसां सर्गः सप्तमः स तु मानुषः ॥ अष्टमोऽनु
ग्रहः सर्गः सात्त्विकस्तामसश्च सः । पञ्चैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः । प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः ॥ इत्येते वै समाख्याता नव स
र्गाः प्रजापतेः । प्राकृता वैकृताश्चैव जगतो मूलहेतवः ॥ सृजतो जगदीशस्य किमन्यच्छ्रोतुमिच्छसि ॥ ॥मैत्रेय उवाच॥ संक्षेपात्कथितः सर्गो देवाना
मुने त्वया । विस्तराच्छ्रोतुमिच्छामि त्वत्तो मुनिवरोत्तम ॥ ॥पराशर उवाच॥ कर्मभिर्भाविताः पूर्वैः कुशलाकुशलैस्तु ताः । ख्यात्या तया ह्यनिर्मुक्ताः सं
हारे ह्युपसंहृताः ॥ स्थावरान्ताः सुराद्याश्च प्रजा ब्रह्मंश्चतुर्विधाः । ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तु ताः ॥ ततो देवासुरान् पितॄन् मानुषांश्च चतुष्टयं
। सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत् ॥ युक्तात्मनस्तमोमात्रा ह्युद्रिक्ताभूत्प्रजापतेः । सिसृक्षोर्जघनात्पूर्वमसुरा जज्ञिरे ततः ॥ उत्ससर्ज ततस्तां तु

तमोमात्रात्मिकां तनुं। सा तु त्यक्ता तनुस्तेन मैत्रेयाभूद्विभावरी॥ सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततस्सुराः॥ सत्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज॥
त्यक्ता सापि तनुस्तेन सत्वप्रायमभूद्दिनं। ततो हि बलिनो रात्रावसुरा देवता दिवा॥ सत्वमात्रात्मिकामेव ततोऽन्यां जगृहे तनुं। पितृवन्मन्यमानस्य पि
तरस्तस्य जज्ञिरे। उत्ससर्ज पितॄन्सृष्ट्वा ततस्तामपि स प्रभुः॥ सा चोत्सृष्टाभवत्संध्या दिननक्तान्तरस्थितिः॥ रजोमात्रात्मिकामन्यां जगृहे स तनुं ततः
॥ रजोमात्रोत्कटा जाता मनुष्या द्विजसत्तम। तामप्याशु स तत्याज तनुं सद्यः प्रजापतिः॥ ज्योत्स्ना समभवत्सापि प्राक्संध्या याभिधीयते। ज्योत्स्नागमे तु ब १०
लिनो मनुष्याः पितरस्तथा॥ मैत्रेय संध्यासमये तस्मादेते भवन्ति वै। ज्योत्स्ना रात्र्यहनी संध्या चत्वार्येतानि वै विभोः॥ ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्र
याणि तु। रजोमात्रात्मिकामेव ततोऽन्यां जगृहे तनुं॥ ततः क्षुद्ब्रह्मणो जाता जज्ञे कोपस्तया ततः॥ क्षुत्क्षामानन्धकारेऽथ सोऽसृजद्भगवांस्ततः॥ विरूपाः श्म
श्रुला जातास्तेऽभ्यधावन्त तं प्रभुं। मैवं भो रक्ष्यतामेष यैरुक्तं राक्षसास्तु ते॥ ऊचुः खादाम इत्यन्ये ये ते यक्षास्तु जक्षणात्॥ अप्रियेण तु तान्दृष्ट्वा के



शाः शीर्यन्त वेधसः॥ हीनाश्च शिरसा भूयः समारोहन्त तच्छिरः॥ सर्प्पणात्तेऽभवन्सर्प्पा हीनत्वादहयः स्मृताः॥ ततः क्रुद्धो जगत्स्रष्टा क्रोधात्मानो विनिर्ममे।
वर्ण्णेन कपिलेनोग्रा भूतास्ते पिशिताशिनः॥ ध्यायतोऽङ्गात्समुत्पन्ना गन्धर्व्वास्तस्य तत्क्षणात्। पिबन्तो जज्ञिरे वाचं गन्धर्व्वास्तेन ते द्विज॥ एतानि सृष्ट्वा भग
वान्ब्रह्मा तच्छक्तिनोदितः। ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत्॥ अवयो वक्षसश्चक्रे मुखतोऽजांश्च सृष्टवान्। सृष्टवानुदराद्गाश्च पार्श्वाभ्यां च
प्रजापतिः॥ पद्भ्यां चाश्वान्समातङ्गान् रासभान्गवयान्मृगान्॥ उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्याश्च जातयः॥ ओषध्यः फलमूलानि रोमभ्यस्तस्य जज्ञिरे॥
त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम। सृष्ट्वा पश्वोषधीः सम्यक् युयोज स तदाध्वरे॥ गौरजः पुरुषो मेषो ह्यश्वोऽश्वतरगर्दभाः॥ एतान्ग्राम्यान्पशून्
नारण्यांश्च निबोध मे॥ श्वापदो द्विखुरो हस्ती वानराः पक्षिपञ्चमाः। औदकाः पशवः षष्ठाः सप्तमास्तु सरीसृपाः॥ गायत्रीं च ऋचं चैव त्रिवृत्सोमं साम
रथन्तरं। अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात्॥ यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा। बृहत्साम तथोक्थं च दक्षिणादसृजन्मुखात्॥ सामानि
नू

जगतीछन्दस्तोमं पञ्चदशं तथा। वैरूपमतिरात्रञ्च पश्चिमादसृजन्मुखात्॥ एकविंशमथर्व्वाणमाप्तोर्यामाणमेव च। अनुष्टुभञ्च वैराजमुत्तरादसृजन्
मुखात्॥ उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे। देवासुरपितॄन्सृष्ट्वा मनुष्यांश्च प्रजापतिः॥ ततः पुनः ससर्ज्जादौ सङ्कल्पस्य पितामहः। यक्षान्
पिशाचान्गन्धर्व्वांस्तथैवाप्सरसां गणान्। नरकिन्नररक्षांसि वयःपशुमृगोरगान्॥ अव्ययञ्च व्ययञ्चैव यदिदं स्थाणुजङ्गमं। तत्ससर्ज्ज तदा ब्रह्मा
भगवानादिकृद्विभुः॥ तेषां ये यानि कर्म्माणि प्राक्सृष्ट्यां प्रतिपेदिरे। तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः॥ हिंस्राहिंस्रे मृदुक्रूरे धर्म्माधर्म्मा ११
वृतानृते। तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते॥ इन्द्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः। नानात्वं विनियोगञ्च धातैव व्यसृजत्स्वयं। नामरू
पञ्च भूतानां कृत्यानाञ्च प्रपञ्चनं। वेदशब्देभ्य एवादौ देवादीनां चकार सः॥ ऋषीणां नामधेयानि यथा वेदश्रुतानि वै। यथा नियोगयोग्यानि सर्व्वेषाम
प्यसौ करोत्॥ यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥ करोत्येवंविधां सृष्टिं कल्पादौ स पुनः पुनः।

सिसृक्षाशक्तियुक्तोसौ सृज्यशक्तिप्रचोदितः॥ ॥इति श्रीविष्णुपुराणे प्रथमेंशे पञ्चमोध्यायः॥ ॥मैत्रेय उवाच॥ अर्व्वाक्स्रोतास्तु कथितो भवता यस्तु मान
षः। ब्रह्मन्विस्तरतो ब्रूहि ब्रह्मा तमसृजद्यथा॥ यथा च वर्ण्णानसृजद्यद्गुणांश्च महामुने। यच्च तेषां स्मृतं कर्म्म विप्रादीनां तदुच्यतां॥ ॥पराशर
उवाच॥ सत्याभिध्यायिनः पूर्व्वं सिसृक्षोर्ब्रह्मणो जगत्। अजायन्त द्विजश्रेष्ठ सत्त्वोद्रिक्ता मुखात्प्रजाः॥ वक्षसो रजसोद्रिक्तास्तथा वै ब्रह्मणोभ
वन्। रजसा तमसा चैव समुद्रिक्तास्तथोरुतः॥ पद्भ्यामन्याः प्रजा ब्रह्मा ससर्ज्ज द्विजसत्तम। तमःप्रधानास्ताः सर्व्वाश्चातुर्व्वर्ण्यमिदन्ततः॥ ब्राह्मणाः
क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम। पादोरुवक्षःस्थलतो मुखतश्च समुद्गताः॥ यज्ञनिष्पत्तये सर्व्वमेतद्ब्रह्मा चकार वै। चातुर्व्वर्ण्यं महाभाग यज्ञसाधन
मुत्तमं॥ यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः। आप्याययन्ति धर्म्मज्ञ यज्ञाः कल्याणहेतवः॥ निष्पाद्यन्ते नरैस्तैस्तु स्वकर्म्माभिरतैः सदा। विशुद्धा
चरणोपेतैः सद्भिः सन्मार्गगामिभिः॥ स्वर्गापवर्गौ मानुष्यात्प्राप्नुवन्ति नरा मुने। यच्चाभिरुचितं स्थानं तद्यान्ति मनुजा द्विज॥ प्रजास्ता ब्रह्मणा सृ

ष्टाश्चाउत्वं ध्यवाय्वाक्तिनी । सम्यकूउद्याः प्रमावानप्रकाममुनिसत्तम ॥ यत्थेस्थावास निवताः सर्व्ववाधाविवर्ज्जिताः । उद्यान्तः कवनाः उद्याःसर्व्व
नुष्ठाननिर्म्मलाः ॥ उद्भवतासीमन सिउद्याइंकः सीक्तितलवो । उद्भिष्लार्नप्रपन्थक्ति विष्णुस्वीयनमुत्पदी ॥ ततः कालात्मा कायासो सर्वागः कपि:
ताद्भवः सपातयस्य घाघावमत्यमत्पात्यमानवत् ॥ अथधर्म्मवीजरुहिर्उ लभात्लातमरुवत् । प्रजासूतांश्च भेजयवागमदिकमयाधिर्कं ॥ ततः
सादृप्रजा सिद्धिस्कषाँनातीवज्ञायत । नसानमादयश्चान्या सिद्धयाश्चो तवक्रियाः ॥ तासु क्षीणासु ताषासु वर्द्धमानवपातकः । द्वन्द्वाभिहवदुःखार्तं १२
स्तांवक्रितः प्रजाः ॥ ततोदुर्गमितास्थक्रु वर्द्धिपार्व्वतिमौदकं । कृत्रिमं वउतथाडुर्गपूर्वकार्वटकादियत् ॥ गृहीतवतथार्यं नपुवक्रुःपूर्वादिष ।
गीतातपादिवाधानां प्रशयायमहामत ॥ प्रतीकारमिदं कृत्वा गीतादेस्ताः प्रजाः पुनः । वार्त्तोपायं ततश्चक्रु र्दृष्ट्वा सिद्धिं च कर्म्मजां ॥ व्रीहयश्च ग
वाल्येवगोधूमाश्चणवक्रिलाः । प्रियंगवा ह्युदाराश्च कावदूषाः सवीनकाः ॥ माषाम्मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः । आढक्यश्च नकाश्च



वगनाः सफदम्भास्मताः ॥ इत्येता ओषधीनान्तु ग्रामानांजातयामन । ओषध्यश्च यज्ञियाश्चैव ग्राम्यारण्याश्चतुर्द्दश ॥ व्रीहयश्च यवामाषा गोधूमाश्च
नवाक्रिलाः । प्रियंगुसप्तमाह्यता ग्रष्टमाश्च कुलत्थकाः ॥ श्यामाकास्त्वथनीवारा जर्त्तिलाः पगवेन्तकाः । तथावेणुजवाः प्राक्ता स्तथ्यकर्क्कटकामत ॥ ग्राम्य
वन्याश्च ताश्चताओषध्यश्चतुर्द्दश । यज्ञनिष्पत्तयेयज्ञ तथासां हेतुरुत्तमः ॥ एताश्च सहयज्ञेन प्रजानां कारणं परं । परावरविदः प्राज्ञा ततायज्ञान्
वितन्वत ॥ अहन्यहन्यनुष्ठानं यज्ञानांमुनिसत्तम । उपकारकरं पुंसां क्रियमाणाघशान्तिदं ॥ येषान्तुकालसृष्टो पापविन्दुर्महामत । चेतः सुवद्धे:
चक्रुस्तेनयज्ञेषुमानसं । वेदवादास्तथादेवा न्यज्ञकर्म्मादिकंचयत् ॥ ततुसर्वान्निंद्यमानास्तु यज्ञव्यासधकारिणः । प्रवृत्तिमार्गव्युच्छित्तिकारिणो वेद:
निन्दकाः ॥ दुराचाराश्च ते सर्वे कुटिलाशयाः । संसिद्धायान्तु वार्त्तायां प्रजाः सृष्ट्वा प्रजापतिः ॥ मर्यादां स्थापयामास यथास्थानं यथागुणं । वर्ण्णाः
नामाश्रमाणाञ्च धर्म्मान्धर्म्मभृतांवर ॥ लोकांश्च सर्ववर्ण्णानां सम्यक्धर्म्मानुपालनात् । प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावतां ॥ स्थानमैन्द्रंक्षत्रि:

याणां संग्रमेष्वनिवर्त्तिनां । वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनां ॥ गान्धर्वं शूद्रजातीनां परिचर्यानुवर्त्तिनां । अष्टाशीतिसहस्राणि यतीनामूर्द्ध्वरेतसां
॥ स्मृतं तेषां तु यत्स्थानं तदेव गुरुवासिनां । सप्तर्षीणां तु यत्स्थानं तदेव गुरुवासिनां ॥ सप्तर्षीणां तु यत्स्थानं स्मृतं तद्वै वनौकसां । प्राजापत्यं गृहस्था
नं न्यासिनां ब्रह्मसंज्ञितं । योगिनाममृतं स्थानं यद्विष्णोः परमं पदं ॥ एकान्तिनः सदा ब्रह्मध्यायिनो योगिनो हि ये । तेषां तत्परमं स्थानं यत्तु पश्यन्ति
सूरयः ॥ गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्त्तन्ते द्वादशाक्षरचिन्तकाः ॥ तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥ असिपत्र १३
वनं घोरं कालसूत्रमवीचिमत् ॥ विनिन्दकानां वेदस्य यज्ञव्याघातकारिणां । स्थानमेतत्समाख्यातं स्वधर्मत्यागिनश्च यत् ॥ इति श्रीविष्णुपुराणे षष्ठो
ध्यायः ॥ ॥ पराशर उवाच ॥ ततोऽभिध्यायतस्तस्य जज्ञिरे मानसाः प्रजाः । तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह ॥ क्षेत्रज्ञाः समवर्त्तन्त गात्रेभ्यस्तस्य
धीमतः । ते सर्वे समवर्त्तन्त ये मया प्रागुदाहृताः ॥ देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषये स्थिताः । एवं भूतानि सृष्टानि चराणि स्थावराणि च ॥ यदास्य ताः प्रजा

क। क

नु ध ऊ२

ः सर्वा न व्यवर्द्धन्त धीमतः । अथान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत् ॥ भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा । मरीचिं दक्षमत्रिं च वसिष्ठं चैव मान
सान् । नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ सनन्दनादयो ये च पूर्वसृष्टास्तु वेधसा । न ते लोकेष्वसज्जन्त निरपेक्षाः प्रजासु ते ॥ सर्वे ते चागतज्ञा
ना वीतरागा विमत्सराः । तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः ॥ ब्रह्मणोऽभून्महान्क्रोधस्त्रैलोक्यदहनक्षमः । तस्य क्रोधात्समुद्भूतज्वालामा
लाविदीपितं । ब्रह्मणोऽभूत्तदा सर्वं त्रैलोक्यमखिलं मुने । भ्रुकुटीकुटिलात्तस्य ललाटात्क्रोधदीपितात् ॥ समुत्पन्नस्तदा रुद्रो मध्याह्नार्कसमप्र
भः । अर्द्धनारीनरवपुः प्रचण्डोऽतिशरीरवान् ॥ विभजात्मानमित्युक्त्वा तं ब्रह्मान्तर्दधे ततः । तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाकरोत् ॥ बिभेद
पुरुषत्वं दशधा चैकधा च सः । सौम्यासौम्यैस्तथा शान्ताशान्तैः स्त्रीत्वं च स प्रभुः ॥ बिभेद बहुधा देवः स्वरूपैरसितैः सितैः । ततो ब्रह्मात्मसम्भूतं
पूर्वं स्वायम्भुवं प्रभुः ॥ आत्मानमेव कृतवान्प्रजापाल्यं मनुं द्विजः । शतरूपां च तां नारीं तपोनिर्धूतकल्मषां ॥ स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे प्र

प्रभु:२ नु

तुः। तस्माच्च पुरुषाद्देवी शतरूपा व्यजायत॥ प्रियव्रतोत्तानपादौ प्रसूत्याकूतिसंज्ञितं। कन्याद्वयं च धर्मज्ञ रूपौदार्यगुणान्वितं॥ ददौ प्रसूतिं दक्षाय आ
कूतिं रुचये पुरा। प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः॥ पुत्रो यज्ञो महाभाग दंपत्योर्मिथुनं ततः। यज्ञस्य दक्षिणायान्तु यामा इति समाख्याता देवा
ः स्वायंभुवे मनौ॥ प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिस्तथा। ससर्ज कन्यास्तासान्तु पृथक् नामानि मे शृणु॥ श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रि
या। बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी॥ पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः। ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः॥ ख्या
तिः सत्यथ संभूतिः स्मृतिः प्रीतिः क्षमा तथा। सन्नतिश्चानसूया च ऊर्जा स्वाहा स्वधा तथा॥ भृगुर्भवो मरीचिश्च तथा चैवांगिरा मुनिः। पुलस्त्यः पुलह १४
श्चैव क्रतुश्च ऋषिवरस्तथा। अत्रिर्वशिष्ठो वह्निश्च पितरश्च यथाक्रमं॥ ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तम। श्रद्धा कामं चला दर्पं नियमं धृ
तिरात्मजं। संतोषं च तथा तुष्टिर्लोभं पुष्टिरसूयत॥ मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च। बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजं॥ व्यवसायं प्र

कन्याव २

जज्ञे वै क्षेमं शान्तिरजायत। सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः॥ कामान्नन्दी सुतं हर्षं धर्मपौत्रमसूयत। हिंसा भार्या त्वधर्मस्य तयोर्जज्ञे तथानृतं
॥ निकृतिस्तास्यां भयं नरकमेव च। माया च वेदना चैव मिथुनं त्विदमेतयोः॥ तयोर्जज्ञेथ वै माया मृत्युं भूतापहारिणं। वेदना स्वसुतञ्चापि दुःखं जज्ञेथ रौर
वात्॥ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे। दुःखोत्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः॥ नैषां भार्यास्ति पुत्रो वा सर्वे ते ह्यूर्ध्वरेतसः। रौद्राण्येतानि रू
पाणि विष्णोर्मुनिवरात्मज॥ नित्यप्रलयहेतुत्वं जगतोस्य प्रयान्ति वै। दक्षो मरीचिरत्रिश्च भृग्वाद्याश्च प्रजेश्वराः॥ जगत्यत्र महाभाग नित्यसर्गस्य हेतवः
। मनवो मनुपुत्राश्च भूपा वीर्यधराश्च ये॥ सन्मार्गनिरताः शूरास्ते नित्यस्थितिकारिणः॥ ॥मैत्रेय उवाच॥ येयं नित्या स्थितिर्ब्रह्मन् नित्यसर्गस्तथेरि
तः। नित्याभावश्च तेषां वै स्वरूपं कथयस्व मे॥ ॥पराशर उवाच॥ सर्गस्थितिविनाशांश्च भगवान्मधुसूदनः। तैस्तै रूपैरचिन्त्यात्मा करोत्यव्याहतो विभुः॥ नै
मित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज। नित्यश्च सर्वभूतानां प्रलयोयं चतुर्विधः॥ ब्रह्मा नैमित्तिकस्तत्र यच्छेते जगतां पतिः। प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ

क

ना न
तयी॥ ब्रह्मनादाख्यिकं प्रोक्ता यागिनः परमात्मनि ।नित्यः सदैव भूतानां यो विनाशो दिवा निशि ॥ प्रसूतिः प्रकृतेर्या तु सा सृष्टिः प्राकृती स्मृता॥ दैनन्दिनी त
था प्रोक्ता यान्तरप्रलयादनु । भूतान्यनुदिनं यत्र जायन्ते मुनिसत्तम॥ नित्यसर्गो हि स प्रोक्तः पुराणार्थविचक्षणैः॥ एवं सर्व्वशरीरेषु भगवान्भूतभावनः
॥ संस्थितः कुरुते विष्णुरुत्पत्तिस्थितिसंयमान् ॥ सृष्टिस्थितिविनाशानां शक्तयः सर्व्वदेहिषु॥ वैष्णव्यः परिवर्त्तन्ते मैत्रेयाहर्निशं सदा। गुणत्रयमयी
ह्येषा ब्रह्मन्शक्तित्रयी समा ॥ या तिवर्त्तते स याति पुनर्नावर्त्तयन्ति॥ इति श्रीविष्णुपुराणे सप्तमोऽध्यायः॥ ॥ पराशर उवाच॥ कथितस्तामससर्गो ब्र १३
ह्मणस्ते महामुने । रुद्रसर्गं प्रवक्ष्यामि तन्मे निगदतः शृणु॥ कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतस्ततः। प्रादुरासीत्प्रभोरङ्के कुमारो नीललोहितः॥ रुरो
स्वस्त्र या दं सुस्वरं सोथ द्रवंश्च द्विजसत्तम। किं रोदिषीति तं ब्रह्मा रुदन्तं प्रत्युवाच ह॥ नाम देहीति तं सोथ प्रत्युवाच प्रजापतिः । रुद्रस्त्वं देवनाम्नासि मा रोदीर्धैर्यमाव
ह। एवमुक्तः पुनः सोथ सप्तकृत्वो रुरोद वै॥ ततोन्यानि ददौ तस्मै सप्त नामानि स प्रभुः॥ स्थानानि चैषामष्टानां पत्नीः पुत्रांश्च सर्व्वशः॥ भवं सर्व्वमथेशानं त
न भि प्रभुः

का२ ई
था पशुपतिं द्विज। भीममुग्रं महादेवमुवाच स पितामहः॥ चक्रे नामान्यथैतानि स्थानान्येषां चकार सः। सूर्यो जलं मही वह्निर्वायुराकाशमेव च॥ दीक्षितो
ब्राह्मणः सोम इत्येतास्तनवः क्रमात्। सुवर्च्चला तथैवोषा विकेशी चापरा शिवा॥ स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमं। सूर्यादीनां नरश्रेष्ठ रुद्रा
द्यैर्नामभिः सह॥ पत्न्यः स्मृता महाभाग तदपत्यानि मे शृणु। येषां सूतिप्रसूतैस्तु इदमापूरितं जगत्॥ शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः।
स्कन्दः सर्गोथ सन्तानो बुधश्चानुक्रमात्सुताः॥ एवंप्रकारो रुद्रोसौ सतीं भार्यामविन्दत। दक्षकोपाच्च तत्याज सा सती स्वकलेवरं॥ हिमवद्धा नामा
भून्मेनायां द्विजसत्तम। उपयेमे पुनश्चोमामनन्यां भगवान्भवः॥ देवौ धाताविधातारौ भृगोः ख्यातिरसूयत। श्रियञ्च देवदेवस्य पत्नी नारायणः
स्यया॥ ॥ मैत्रेय उवाच॥ क्षीराब्धौ श्रीः पुरा जाता श्रूयतेमृतमन्थने। भृगोः ख्यात्यां समुत्पन्नेत्येतदाह कथं भवान्॥ ॥ पराशर उवाच॥ नित्यैवैषा जग
न्माता विष्णोः श्रीरनपायिनी। यथा सर्व्वगतो विष्णुस्तथैवेयं द्विजोत्तम॥ अर्थो विष्णुरियं वाणी नीतिरेषा नयो हरिः। बोधो विष्णुरियं बुद्धिर्धर्म्मोसौ सः

श्री  उ सा

त्क्रियास्त्वियं।स्रष्टा विष्णुरियं सृष्टिः श्रीर्भूमिर्भूधरो हरिः॥सन्तोषो भगवान्लक्ष्मीस्तुष्टिर्मैत्रेय शाश्वती।इच्छा श्रीर्भगवान्कामो यज्ञोसौ दक्षिणा त्वियं॥
आज्याहुतिरसौ देवी पुरोडाशो जनार्दनः।पत्नीशाला मुने लक्ष्मीः प्राग्वंशो मधुसूदनः॥चितिर्लक्ष्मीर्हरिर्यूप इध्मा श्रीर्भगवान्कुशः॥सामस्वरू
पी भगवानुद्गीतिः कमलालया।स्वाहा लक्ष्मीर्जगन्नाथो वासुदेवो हुताशनः॥शंकरो भगवाञ्छौरिर्गौरी लक्ष्मीर्द्विजोत्तम।मैत्रेय केशवः सूर्यस्त
त्प्रभा कमलालया॥विष्णुः पितृगणः पद्मा स्वधा शाश्वतपुष्टिदा।द्यौः श्रीः सर्वात्मको विष्णुरवकाशोतिविस्तरः॥शशांकः श्रीधरः कान्तिः श्रीस्तस्यैवानपा १७
यिनी।धृतिर्लक्ष्मीर्जगच्चेष्टा वायुः सर्वत्रगो हरिः॥जलधिर्द्विजगोविन्दस्तद्वेला श्रीर्महामुने।लक्ष्मीस्वरूपमिन्द्राणी देवेन्द्रो मधुसूदनः॥यमश्चक्र
धरः साक्षाद्धूमोर्णा कमलालया।ऋद्धिः श्रीः श्रीधरो देवः स्वयमेव धनेश्वरः॥गौरी लक्ष्मीर्महाभागा केशवो वरुणः स्वयं।श्रीर्देवसेना विप्रेन्द्र
देवसेनापतिर्हरिः॥अवष्टम्भो गदापाणिः शक्तिर्लक्ष्मीर्द्विजोत्तम।काष्ठा लक्ष्मीर्निमेषोसौ मुहूर्तोसौ कला त्वियं॥ज्योत्स्ना लक्ष्मीः प्रदीपोसौ सर्वः सर्वे

व  कि

श्वरो हरिः॥लताभूता जगन्माता श्रीर्विष्णुर्द्रुमसंज्ञितः॥विभावरी श्रीर्दिवसो देवश्चक्रगदाधरः॥वरप्रदो वरो विष्णुर्वधूः पद्मवनालया॥नदस्वरूपी भगवाञ्छ्री
र्नदीरूपसंस्थिता।ध्वजश्च पुण्डरीकाक्षः पताका कमलालया॥तृष्णा लक्ष्मीर्जगत्स्वामी लोभो नारायणः परः।रती रागश्च मैत्रेय लक्ष्मीर्गोविन्द एव च॥किंचा
तिबहुनोक्तेन संक्षेपेणेदमुच्यते।देवतिर्यङ्मनुष्येषु पुन्नामा भगवान्हरिः॥स्त्रीनाम्नी लक्ष्मीर्मैत्रेय नानयोर्विद्यते परं॥इति श्रीविष्णुपुराणे प्र
थमांशे अष्टमोध्यायः॥ ॥पराशर उवाच॥इदं च शृणु मैत्रेय यत्पृष्टोहमिह त्वया।श्रीसम्बन्धं मयाप्येतच्छ्रुतमासीन्मरीचितः॥दुर्वासाः शंकरस्यांशश्चचार पृथि
वीमिमां॥स ददर्श स्रजं दिव्यामृषिर्विद्याधरीकरे॥सन्तानकानामखिलं यस्या गन्धेन वासितं।अतिसेव्यमभूद्ब्रह्मंस्तद्वनं वनचारिणां॥उन्मत्तव्रतधृग्विप्र
स्तां दृष्ट्वा शोभनां स्रजं।तां ययाचे वरारोहां विद्याधरवधूं तदा।याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना।ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य तं॥तामा
दायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृक्।कृत्वा स विप्रो मैत्रेय परिबभ्राम मेदिनीं॥स ददर्श समायान्तमुन्मत्तैरावते स्थितं।त्रैलोक्याधिपतिं देवं सह देवैः शची

पर्णि॥मामा।मनःप्रणिपत्य॥प्रजामूल्यरुपदूपदी।स्मारायामववागय विश्वपान्मलवन्मुनिः॥गृहीत्वामववाजन प्रोणेवावनमूर्द्धनि।न्यस्यपववाजकेला
ग।शिखवजाह्नवीयथा॥मदानूका।विनाश्वायोगन्मकष्टनवावनः।कवन्माघायविश्रुप तीप्रजंधवन।गल्ल॥गतश्च्युक्ताधरुणवान्दूर्वासाम्रुनिसत्तमः।
मेत्रयपववाजेवकुद्धाध्वेनइवावरु।नेश्वर्य्यमल्लदृष्टात्म न्नाविस्कृत्वासिवासवः।श्रियाधामप्रजोयस्त्रीमद्धलाह्वादिनीदसि॥प्रसादङ्गिनाकीनप्रणिपाम
पूनःप्यनी।दर्षात्कृत्लकपाल्लन नवापिणिवसाःतना॥मयापस्तामिमीमालायस्मान्नवद्धमन्यसे।त्रिलोक्यश्रीवतामृदविनाशमुपयास्यसि॥मीमन्यतः
न्येःसदृशी नूनंशक्रुवान्द्विजेः॥न्मावसानमस्मासु मानिरुवताकुतो॥मद्दलारवतायस्मात्द्विपामालामहीतले।तस्मात्प्रणष्टलक्ष्मीकंत्रेलोक्यंतेभवि
ष्यति॥यस्यसंजातकोपस्यरूयमतिववावनी।तस्त्रीमामतिगर्व्वेणदेववाजावमन्यसे॥ ॥पवाशउवाव॥महेन्द्रवावनंस्कन्धा देवतीर्य्यत्वरान्वितः॥प्रसादयामा
समुनिदूर्व्वासमकल्मषं॥प्रसाद्यमानस्सतेनप्रणिपातपुरस्सरं।प्रत्युवावसत्सुप्राईदूर्व्वासामुनिसत्तमः॥नाहंकृपालुहृदयो नवमामिजनक्षमा।अन्यत
त्र

मूनयःशक्रदूर्व्वाससमवेहिमां।गौतमादिभिरन्यैस्त्वंगर्व्वमापादितामुधा॥अक्षान्तिसारसर्वस्वंदूर्व्वाससमवेहिमां।वशिष्ठाद्यैर्दयासारैस्तोत्रंकुर्वद्भिरुच्चके
शाणर्व्वनीता।सियनेर्व्वमामप्ययावमन्यसे।ज्वलज्जटाकलापस्यभृकुटीकुटिलंमुखं॥निरीक्ष्यकस्त्रिभुवनेममयानगतोहरि।नाहंक्षयिष्यवहुना।किमुक्तेनश
तक्रतो॥विडम्बनामिमांभूयःकरोष्यनुनयात्मिका॥ ॥पराशरउवाव॥इत्युक्त्वाप्रययौविप्रोदेवराजो।पिनःपुनः।आरुह्यैरावतंब्रह्मन्प्रययावमरावतीं
॥ततःप्रभृतिनिःश्रीकंसशक्रंभुवनत्रयं।मेत्रेयासीदपध्वस्तंसंक्षीणौषधिवीरुधः॥नयज्ञाःसंप्रवर्त्तन्तेनतपस्यन्तितापसाः।नवदानादिधर्म्मेषुमनश्चक्रे
दाजनः॥निःसत्वाःसकलालोकालोभाद्युपहतेन्द्रियाः।स्वल्पेपिहिबभूवुस्तेसाभिलाषाद्विजोत्तम॥यतःसत्वंततोलक्ष्मीःसत्वंभूत्यनुसारि।निःश्रीकानांकुत
ःसत्वंविनातेनगुणाःकुतः॥वलशौर्य्याद्यभावश्चपुरुषाणांगुणैर्विना।लंघनीयस्समस्तस्यवलशौर्य्यविवर्ज्जितः॥लंघनस्यपथस्थस्यमतिर्ह्यपहितःप्राघतःपुमा
न्।नवमत्यन्तनिःश्रीके त्रैलोक्येसत्ववर्ज्जिते॥देवान्प्रतिवलोद्योगंचक्रुर्दैतेयदानवाः।लोभाविष्टानिःश्रीकाःपरैर्दैत्याःसत्वविवर्ज्जिताः॥श्रियाविहीनैर्न्नि

पुं

ऽसत्व देवेश्च कृष्णयावनी । विजितास्त्रिदशा दैत्यैः विद्याधाः शरणीययुः ॥ पितामहं महाभागं हुताशनपुरोगमाः ॥ यथावत् कथितो देवैः ब्रह्मा प्राह ततः सु
रान् ॥ परापरेशं शरणं व्रजध्वमसुरार्द्दनं । उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरं ॥ प्रजापतिपतिं विष्णुमनन्तमपराजितं । प्रधानपुंसोरजयोः कारणं का
र्यभूतयोः ॥ प्रणतार्तिहरो विष्णुः स वः श्रेयो विधास्यति ॥ एवमुक्त्वा सुरान्सर्व्वान्ब्रह्मा लोकपितामहः । तुष्टाव वाग्भिरिष्टाभिः परापरपतिं हरिं ॥ ॥
ब्रह्मोवाच ॥ नमामि सर्व्वं सर्व्वेशमनन्तमजमव्ययं । लोकधाम धराधारमप्रकाश्यमभेदिनं । नारायणमणीयांसमशेषाणामणीयसां ॥ समस्तानां गरिष्ठं च १८
भूरादीनां गरीयसां । यत्र सर्व्वं यतः सर्व्वमुत्पन्नं मत्पुरःसरं ॥ सर्व्वभूतश्च यो देवः पराणामपि यः परः । परः परस्मात्पुरुषात्परमात्मस्वरूपधृक् ॥ यो
गिभिश्चिन्त्यते योऽसौ मुक्तिहेतोर्मुमुक्षुभिः । सत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ॥ स शुद्धः सर्व्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु । कलाकाष्ठानिमे
षादिकालसूत्रस्य गोचरे । यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥ प्रोच्यते परमेशो यो यः शुद्धोऽप्युपचारतः । प्रसीदतु स नो विष्णुरात्मा यः सर्व्वदेहि

नां ॥ यः कारणं च कार्यं च कारणस्यापि कारणं । कार्यस्यापि च यत्कार्यं प्रसीदतु स नो हरिः ॥ कार्यस्य कार्यं यत्कार्यं कार्यकस्यापि यः स्वयं । तत्का
र्यकार्यभूतो यः ततश्च प्रणताः स्म तं । कारणं कारणस्यापि तस्य कारणकारणं ॥ तत्कारणानां हेतुं तं प्रणताः स्म सुरेश्वरं । भोक्तारं भोग्यभूतं च स्रष्टा
रं सृज्यमेव च ॥ कार्यकर्तृस्वरूपं तं प्रणताः स्म परं पदं । विशुद्धबोधवन्नित्यमजमक्षयमव्ययं ॥ अव्यक्तमविकारं यत् विष्णोस्तत्परमं पदं । न स्थूलं न च
सूक्ष्मं यन्न विशेषणगोचरं ॥ तत्पदं परमं विष्णोः प्रणमाम सदामलं । यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता ॥ परब्रह्मस्वरूपस्य प्रण
माम तमव्ययं । यन्न देवा न मुनयो न चाहं न च शङ्करः ॥ जानन्ति परमेशस्य तद्विष्णोः परमं पदं । यद्योगिनः सदोद्युक्ताः पुण्यपापक्षयेऽक्षयं ॥ पश्यन्ति
प्रणवे चिन्त्यं तद्विष्णोः परमं पदं । शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवादिकाः ॥ भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदं ॥ सर्व्वेश सर्व्वभूतात्मन्सर्व्व सर्व्वा
श्रयाच्युत । प्रसीद विष्णो भक्तानां व्रज नो दृष्टिगोचरं ॥ ॥ पराशर उवाच ॥ इत्युदीरितमाकर्ण्य ब्रह्मणस्त्रिदशास्ततः । प्रणम्योचुः प्रसीदेति व्रज

नादृष्टिगोचरं ॥ यत्रार्थं भगवान्ब्रह्मा न जानाति परं पदं । तन्नतास्मि जगद्धाम तव सर्वगतात्मकं ॥ ॥प्रयाग उवाच॥ ॐ त्वयन्तव यम सम्भपि देवाः
नाविष्णुनस्कथा । उर्द्धं पश्य सर्व्वं व्रतस्थानि प्रयाग मा४। आत्मा यस्तु४ पुमानेवा यु४ पूर्व्व पाकेर पूर्ण४॥ तत्रका समजग स्वच्छ प्रख्यावमविशेषणं
।भगवन् स्कन्दस्थम यस्तु महेश्वर ॥ वाय । प्रसीद प्रणतानां त्वं सर्व्वेषां दिग्दर्शन ॥ एषब्रह्मा तथैवायं सह रुद्रः त्रिलोचन४। सर्वादित्ये४ समीरणः
पावकाद्याः सहाग्निभि४॥ अश्विनौ वसवश्चैव सर्व्वे मरुद्गणा४। साध्या विश्वे तथा देवा देवेन्द्रश्च यमीश्वर४॥ प्रणमन्ति प्रवणानाथ देवसैन्याप १९
वाजिताः गन्धर्वास्त्वामनुप्राप्ताः सकलं समस्कन्दवनागनाः४॥ ॰ ॥प्रयाग उवाच॥ एवं संस्तूयमानस्तु भगवान् शंखचक्रधृक् । उग्गमदर्शनितपोमिश्रय
पवमश्वर४॥ दीर्घस्कन्धो गौरवायवा४ शंखचक्रगदाधरः । अपूर्व्वं रूपसम्पत्ति त जगद्योति भिन्नं ॥ प्रणम्य प्रणता४ पूर्व्वं सर्वं । भक्तिमिन तन्व४।
उच्चैवृ४ पुनरीका अपि पितामह पूर्वगमा४॥ ॥देवा ऊचुः॥ नमो नमस्ते विश्वेश त्वं ब्रह्मा त्वं पिनाकधृक् । इन्द्रस्त्वमग्निः पवनो वरुणः४ सविताय



म४॥ वसवो मरुत४ साध्याः विश्वेदेवाश्च तत्वान् । यायस्कथा गतादेव समीपं देवनागन४॥ सत्त्वं भवजगत्स्रष्टा यतः सर्व्वगतो भवान् । त्वं पकृ त्वं वषट्कारस्त्वं भां
कारः प्रजापति४। वधा वयं स्कः सर्व्वं यज्ञ न मर्यादा स्थिति जगत् ॥ त्वमाद्यो निरंजनो विष्णु४ प्रयागादेत्य निर्गुण४। प्रसीद सर्व्वात्मा मज्जस्वाध्यायनस्व नः४॥ तावद्
लिस्क्यावाक्या स्कावन्नासुकृत्य सूर्वी । यावन्नयाति शरणं त्वामशेषाघनाशनं ॥ कस्य प्रसादं प्रसन्नात्मा प्रपन्नानां कृतघ्न४। तत्रसा नाथ सर्व्वेषां त्वं
स्वाध्याय न कृतं ॥ एवं संस्तूयमानस्तु प्रणतेन मयेन्द्र नि४। प्रसन्न दृष्टि भगवान् इदमाह स विश्वकृत् । भक्तसारवता च वा४ कवि ध्याम्यु परेहिनं ॥ वदाम्य
हीयात्क्रियतां भवाडस्कं दिदं सुवा४। आनीयतां तत्र ते देव्ये४ प क्षीराब्धौ सकलोषधी४॥ मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिं । मथ्यतामम्ततं देवा सहाय
न्यपस्थितं ॥ सामपूर्व्वं करिदेवता४ मत्सारात्म कर्म्मणि । सामान्यफललाभाय यूयं सार्था भविष्यथ ॥ मथ्यमाने च मन्त्रास्त्र यत्समस्तं यथोत्तमं । उत्पत्स्यना
त्तिना सूपसमना भविष्यथ ॥ तथा वाहं करिष्यामि यथा नेति दिवं गमिष्यथ४। न प्राप्स्यन्ति मानवा देवा कवलीकृता गतागतिन४॥ ॥प्रयाग उवाच॥ ॐ त्युक्त्वाः

देवदेवन सर्व्वत्र वर्गक ४ सूर्या ४ सन्ध्यानमग्न्ये ४ ऋत्वा यत्तव क्वाम्लग स्तवन । तानोषधी ४ समानीय देवदेवेन पयानवा ४ ॥ क्षिप्तु क्षीराब्धधाय पि सवदत्तामला
त्वषि । मन्त्रनीमन्यवी दत्वा मैत्री दत्वाव वासाकि ॥ ततामथितुमारब्धा मैत्रयगवसाम्न गीविवधा ४ हितोना स्तम्भ्य यन ४ पङ्के तन ४ क्ता ४ ॥ र्व्वासूके दैत्या पूर्व्वः
कार्य्य निर्वाणिता ४ नगस्य रूपनिश्वास वह्निना पदगतविष ४ ॥ निर्गता ४ सूना ४ सर्व्वे वरुत्ववमि नयन । मनोवमूख निश्वास वायुना भवत्तासुके ४ ॥ पुः
क्षुयत्नेव वर्ष क्षिस्फदाबाप्या यिता ४ पूता ४ क्षीराब्दमध्ये स्तगवान् कूर्म्मरूपी स्वयं धृ वि ४ ॥ मन्थनादेव क्षिप्तानि ब्रह्म तारूं म स्तामृत । रूपण्या स्थनय वानी मः २०
श्च वन्कगयाध्वव ४ ॥ वकर्षनागवाराणां दैत्यमध्ये पवनाद्दि । उपर्य्याक्रान्तवानूर्ध्व लीलरूद्रूपणक्षगवः ४ ॥ मथ्यपवर्ग मैत्रयाय यन्न दृष्टसुवासु ४ ॥ ततः पाना
गवारागी तथ्य प्यायितवान् रवि ४ ॥ अन्यनगरसाध वानु प्रष्ठे पदीदितवान्हरि ४ ॥ मथ्यमानात तस्मात् क्षिरान् क्षीराब्दो देवयानवैः ४ ॥ रुचिर्त्रूनाभिवरूपर्व
सूर्वलि ४ सवयूजिता ॥ जन्मूर्म्मदक्नादवायानवाम्वमरुामन । थाक्विफवनस्पश्वेव वरुत्वृक्षिमिनेदृण ४ ॥ किमताद्दिमिपिद्धानी दिविविकपनाकृतः

। वरूवबावूणी देवीमदायूर्णिम स्लावना ॥ कनावर्ला नतस्मात् क्षीराब्दाद्ब्रासयन जगन्नाग स्वनपाविपाना रूतू देवपक्षीनन्दन स्फुरन् ४ ॥ रूपोदार्य्यगुणप
न ४ तथ्यवासवसीगण ४ ॥ क्षीराब्द ध्व ४ समस्यन्नी मैत्रयपवमाडुगः ४ ॥ ततः ४ गीतागुवरुवाग जगत्कृतानमरुध्यवः ४ ॥ जगत्कृत्स्थविषन्नाग ॥ ४ क्षीराब्दात्त्रिसमुत्थितो ॥ तत्
धन्वन्तरिर्द्दिवः ४ ध्येता म्बवधवः ४ स्वयं । वित्तकमण्डलुस्तीपूर्णं मसतसुसमुत्थितः ४ ॥ ततस्वच्छमनस्कास्तु सर्व्वदैत्ययदानवाः ४ । वरुत्वर्म्मायितास्यर्व्वे मैत्रयम् निशि ४
सरुला ततस्तत्र त्वा क्षिसगीविकाशिक मसलक्षिता । श्रीर्द्देवी पयसस्तस्मादुत्थिता वृतपङ्कजा ॥ तोष्टुवर्म्मदायुक्ता श्रीसूक्तेन महर्षयः ४ । विश्वावसुमुखास्त
स्या गन्धर्व्वा पिवनी यगुः ४ ॥ घृताचीप्रमुखा ब्रह्म न्वनृत्यश्चाप्सरोगणाः ४ । गङ्गाद्याः सरितस्तोयैः स्नानार्थमुपतस्थिरे ॥ दिग्गजा हेमपात्रस्थमादाय विमलं जलं । स्न
पयश्चक्रिरे देवीं सर्व्वलोकमहेश्वरीं । क्षीराब्धारूपधृक् तस्यै मालाममलानपङ्कजां ॥ ददौ विश्वकर्म्मा भूषणान्यङ्गे विश्वकर्म्मा चकार च । दिव्यमाल्याम्बरधरा स्नाता
भूषणभूषिता ॥ पश्यतां सर्व्वदेवानां ययौ वक्षस्थलं हरेः । तया विलोकिता देवा हरिवक्षस्थलस्थया ॥ लक्ष्म्या मैत्रेय सहसा परां निर्वृतिमागताः ४ । उद्वेगं वप

वेगम्भूदैत्या विष्णुपराङ्मुखाः॥ त्यक्ता लक्ष्म्या महाभाग विप्रचित्तिपुरोगमाः॥ ततस्ते जगृहुर्दैत्या धन्वन्तरिकरे स्थितं॥ कमण्डलुं महावीर्या यत्रास्तमद्विजा
मतः॥ माययामोहयित्वाता विष्णुस्त्रीरूपसंस्थितः॥ दानवेभ्यस्तदादाय देवेभ्यः प्रददौ विभुः॥ ततः पपुः सुरगणाः शक्राद्यास्तत्तदामृतं॥ उद्यतायुध
निस्त्रिंशा दैत्यास्तांश्च समभ्ययुः॥ पीतेमृते च बलिभिः देवैर्दैत्यचमूस्तदा॥ वध्यमाना दिशो भेजे पातालञ्च विवेश वै॥ ततो देवा मुदायुक्ताः शंखचक्रग
दाभृतं॥ प्रणिपत्य यथापूर्वमाशासन्तत्त्रिविष्टपं॥ ततः प्रसन्नभाः सूर्यः प्रययौ स्वेन वर्त्मना॥ ज्योतींषि च यथामार्गं प्रययुर्मुनिसत्तम॥ जज्वाल भगवांश्चो २१
च्चैश्चारुदीप्तिर्विभावसुः॥ धर्मे च सर्वभूतानां तदा मतिरजायत॥ त्रैलोक्यञ्च श्रिया जुष्टं बभूव द्विजसत्तम॥ शक्रश्च त्रिदशश्रेष्ठः पुनः श्रीमानजायत॥ सिं
हासनगतः शक्रः सम्प्राप्य त्रिदिवं पुनः॥ देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः॥ ॥इन्द्र उवाच॥ नमस्ये सर्वलोकानां जननीमब्जसम्भवां॥ श्रियमुन्निद्र
पद्माक्षीं विष्णुवक्षःस्थलस्थितां॥ त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनि॥ संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती॥ यज्ञविद्या महाविद्या गुह्यवि

द्या च शोभने। आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी॥ आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्त्वमेव च। सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितं॥ का त्वन्याः
त्वामृते देवि सर्वयज्ञमयं वपुः। अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः॥ त्वया देवि परित्यक्तं सकलं भुवनत्रयं। विनष्टप्रायमभवत् त्वयेदानीं समे
धितं॥ दाराः पुत्रास्तथागारं सुहृद्धान्यधनादिकं। भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणां॥ शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं। देवि त्वद्दृष्टिदृष्टाः
नां पुरुषाणां न दुर्लभं। त्वमम्बा सर्वभूतानां देवदेवो हरिः पिता॥ त्वयैतद्विष्णुना चाम्ब जगद्व्याप्तं चराचरं। मानः कोशं तथा कोष्ठं मा गृहं मा परिच्छदं॥ मा शरी
रं कलत्रञ्च त्यजेथाः सर्वपावनि। मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणं॥ त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये। सत्येन शौचसत्त्वाभ्यां तथा शीलादिभि
र्गुणैः। त्यज्यन्ते ते नराः सद्यः सन्त्यक्ता ये त्वयामले॥ त्वयावलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः। कुलैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि॥ स श्लाघ्य
ः स गुणी धन्यः स कुलीनः स बुद्धिमान्। स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षितः॥ सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः। पराङ्मुखी जगद्धात्री यः

स्यत्वं विष्णुवक्षसि ॥ न तं वर्णयितुं शक्ता गुणान् जिह्वापि वेधसः । प्रसीद देवि पद्माक्षि मास्मांस्त्याक्षीः कदाचन ॥ ॥पराशर उवाच ॥ एवं श्रीः संस्तुता सम्य
क् प्राह हृष्टा शतक्रतुं । शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ ॥श्रीरुवाच ॥ परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे । वरं वृणीष्व यस्त्विष्टो वरदाहं तवा
गता ॥ ॥इन्द्र उवाच ॥ वरदा यदि मे देवि वरार्हो यदि वाप्यहं । त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसंभवे । स त्व
या न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ ॥श्रीरुवाच ॥ एवं ददौ वरं देवी देवराजाय वै पुरा । मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता । भृगोः ख्यात्यां समुत्पन्ना २२
श्रीः पूर्वमुदधेः पुनः । देवदानवयत्नेन प्रसूतामृतमन्थने ॥ एवं यथा जगत्स्वामी देवदेवो जनार्दनः । अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥ पुनश्च प
द्मादुत्पन्ना आदित्योऽभूद्यदा हरिः । यदा च भार्गवो रामस्तदाभूद्धरणी त्वियं ॥ राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि । अन्येषु चावतारेषु विष्णोरेषा
सहायिनी ॥ देवत्वे देवदेहेयं मानुषत्वे च मानुषी । विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुं । यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः । श्रियो न विच्युति

स्तस्य गृहे यावत्कुलत्रयं । पठ्यते येषु चैवेह गृहेषु श्रीस्तवं मुने ॥ अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन । एतत्ते कथितं ब्रह्मन्यन्मां त्वं परिपृच्छसि ॥ क्षीरा
ब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ इति श्रीविष्णुपुराणे नवमोऽध्यायः ॥ ॥मैत्रेय उवाच ॥ कथितं मे त्वया सर्वं यत्पृष्टोऽसि मया मुने । भृगुसर्गात्प्रभृ
त्येष सर्गो मे कथ्यतां पुनः ॥ ॥पराशर उवाच ॥ भृगोः ख्यात्यां समुत्पन्ना लक्ष्मीर्विष्णुपरिग्रहः । तथा धाताविधातारौ ख्यात्यां जातौ सुतौ भृगोः ॥ आय
तिर्नियतिश्चैव मेरोः कन्ये महात्मनः । धाताविधात्रोस्ते भार्ये तयोर्जातौ सुतावुभौ ॥ प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः । ततो वेदशिरा जज्ञे प्रा
णस्यापि सुतं शृणु ॥ प्राणस्य द्युतिमान्पुत्रो राजवांश्च ततोऽभवत् । ततो वंशो महाभाग विस्तारं भार्गवो गतः ॥ पत्नी मरीचेः संभूतिः पौर्णमासमसूयत । विर
जाः पर्वतश्चैव तस्य पुत्रौ महात्मनः । वंशसंकीर्तने पुत्रान्वदिष्येऽहं ततो द्विज ॥ स्मृतिश्चाङ्गिरसः पुत्रीः प्रसूता कन्यकास्तथा । सिनीवाली कुहूश्चैव राका
चानुमतिस्तथा । अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् ॥ सोमं दुर्वाससं चैव दत्तात्रेयं च योगिनं ॥ प्रीत्यां पुलस्त्यभार्यायां दत्तोलिस्तत्सुतोऽभवत् । पूर्वज

न्यनिसभागस्य सः स्वायंभुवकं तो॥ कर्म्मण्यार्व्वरीवांश्च सहिष्णुश्च सुतत्रयी। क्षमा तु सुषुवे भार्या पुलहस्य प्रजापतेः॥ क्रतोश्च सन्नतिर्भार्या वालिखि
ल्यानसूयत। षष्ठिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसां॥ अङ्गुष्ठपर्व्वमात्राणां ज्वलद्भास्करतेजसां। ऊर्ज्जायां च वशिष्ठश्च सप्ताजायन्त वै सुताः॥ रजो गात्रोर्द्ध्व
बाहुश्च शवलश्चानघस्तथा। सुतपाः शुक्र इत्येते सर्व्वे सप्तर्षयोमलाः॥ योसावग्न्यभिमानी स्याद्ब्रह्मणस्तनयोग्रजः। तस्मात्स्वाहा सुतांल्लेभे त्रीनुदा
रौजसो द्विज॥ पावकं पवमानं च शुचिं चापि जलाशिनं। तेषां तु संततावन्ये चत्वारिंशच्च पंच च॥ कथ्यंते वह्नयश्चैते पिता पुत्रत्रयं च यत्। एवमेकोन २३
पंचाशद्वह्नयः परिकीर्त्तिताः॥ पितरो ब्रह्मणा सृष्टा व्याख्याता ये मया तव। अग्निष्वात्ता बर्हिषदोनग्नयः साग्नयश्च ये। तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं
तथा। ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज। उत्तमज्ञानसंपन्ने सर्व्वैः समुदितैर्गुणैः॥ इत्येषा दक्षकन्यानां कथितापत्यसंततिः। श्रद्धा
वान्संस्मरन्नेतामनपत्यो न जायते॥ ॥इति श्रीविष्णुपुराणे प्रथमेंशे दशमोध्यायः॥ ॥पराशर उवाच॥ प्रियव्रतोत्तानपादौ मनोः स्वायंभुवस्य तु।

ध्रो२

द्वौ पुत्रौ सुमहावीर्यौ धर्म्मज्ञौ कथितौ तव॥ तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः। अभीष्टायामभूद्ब्रह्मन् पितुरत्यंतवल्लभः॥ सुनीतिर्नाम या राज्ञ
स्तस्याभून्महिषी द्विज। स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः॥ राजासनस्थितस्यांकं पितुर्भ्रातरमाश्रितं। दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथं॥
प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनंदत। प्रणयेनागतं पुत्रमुत्संगारोहणोत्सुकं॥ सपत्नीतनयं दृष्ट्वा तमंकारोहणोत्सुकं। पितुः पुत्रं तथा रूढं सुरुचिर्व्वा
क्यमब्रवीत्॥ क्रियते किं वृथा वत्स महानेष मनोरथः। अन्यस्त्रीगर्भजातेन ह्यसंभूय ममोदरे॥ उत्तमोत्तममप्राप्यमविवेको हि वांछसि। सत्यं सुतस्त्वम
प्यस्य किंतु न त्वं मया धृतः॥ एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनं। योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया॥ उच्चैर्म्मनोरथस्तेयं मत्पुत्रस्येव किं वृथा।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते॥ उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितं। जगाम कुपितो मातुर्निजाया द्विज मंदिरं॥ तं दृष्ट्वा कुपितं पुत्रमीषत्
प्रस्फुरिताधरं। सुनीतिरंकमारोप्य मैत्रेयेदमभाषत॥ वत्स कः कोपहेतुस्ते कश्च त्वां नाभिनंदति। कोवजानाति पितरं तव यस्तेपराध्यति॥ ०॥ पराश

ति।

यउवाच ॥ इत्युक्तः सकलं मात्रे कथयामास तद्यथा । सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्विता ॥ निःश्वस्य कथिते तस्मिन्स्वपुत्रेण दुर्म्मनाः ॥ श्वासक्षाम
दृष्टा दीना सुनीतिर्वाक्यमब्रवीत् ॥ ॥सुनीतिरुवाच ॥ सुरुचिः सत्यमाहेदं स्वल्पभाग्योसि पुत्रक । न हि पुण्यवतां वत्स सपत्नैरेवमुच्यते ॥ नोद्वेगस्तात कर्त्तव्य
ः कृतं यद्भवता पुरा । तत्कोपहर्त्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥ राजासनं तथा छत्रं वराश्ववरवारणाः । यस्य पुण्यानि तस्यैव मत्वैतच्छाम्य पुत्रक ॥ अ
न्यजन्मकृतैः पुण्यैः सुरुच्याः सुरुचिर्नृपः । भार्येति प्रोच्यते चान्या मद्विधा पुण्यवर्ज्जिता ॥ पुण्योपचयसम्पन्नस्तस्याः पुत्रस्तथोत्तमः ॥ मम पुत्रस्तथा जात २४
ः स्वल्पपुण्यो ध्रुवो भवान् । तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ॥ यस्य यावत्स तेनैव स्वेन तुष्यति बुद्धिमान् । यदि ते दुःखमत्यर्थं सुरुच्या वचसा तव
॥ तत्पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे । सुशीलो भव धर्म्मात्मा मैत्रः प्राणिहिते रतः ॥ निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पदः ॥ ॥ध्रुव उवाच ॥ अ
म्ब यत्त्वमिदं प्राह प्रशमाय वचो मम । नैतद्दुर्व्वचसा भिन्ने हृदये मम तिष्ठति ॥ सोहं तथा यतिष्यामि यथा सर्व्वोत्तमोत्तमं । स्थानं प्राप्स्याम्यशेषाणां जगता
म्ब ।

मपि पूजितं ॥ सुरुचिर्द्दयिता राज्ञस्तस्या जातो न वाप्यहं । प्रभावं पश्य मेम्ब त्वं वृद्धस्यापि तवोदरे ॥ उत्तमः स मम भ्राता यो गर्भेण धृतस्तया । स राजासनमाप्नोतु
पित्रा दत्तं तथास्तु तत् ॥ नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा । इच्छामि तदहं स्थानं यन्न प्राप पिता मम ॥ ॥पराशर उवाच ॥ निर्ज्जगाम गृहान्मातुरि
त्युक्त्वा मातरं ध्रुवः । पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥ स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः । कृष्णाजिनोत्तरीयेषु विष्टरेषु समास्थितान् ॥ स
राजपुत्रस्तान्सर्व्वान् प्रणिपत्याभ्यभाषत । प्रश्रयावनतः सम्यक् अभिवादनपूर्व्वकं ॥ ॥ध्रुव उवाच ॥ उत्तानपादतनयं मां निबोधत सत्तमाः । जातं सुनीत्यां
निर्व्वेदाद्युष्माकं प्राप्तमन्तिकं ॥ ॥ऋषय ऊचुः ॥ चतुःपञ्चाब्दसम्भूतो बालस्त्वं नृपनन्दन । निर्व्वेदकारणं किञ्चित्तव नाद्यापि विद्यते ॥ न चिन्त्यं भवतः किञ्चि
द्ध्रियते भूपतिः पिता । न चैवेष्टवियोगादि तव पश्याम बालक ॥ शरीरे न च ते व्याधिरस्माभिरुपलक्ष्यते । निर्व्वेदः किन्निमित्तस्ते कथ्यतां यदि विद्यते ॥ ॥
पराशर उवाच ॥ ततः स कथयामास सुरुच्या यदुदाहृतं । तन्निशम्य ततः प्रोचुर्म्मुनयस्ते परस्परं ॥ अहो क्षात्रं परं तेजो बालस्यापि यदक्षमा ॥ सपत्न्या मातुरु

कियद्भूयया नापसर्प्यति । राज्ञः कुत्क्रियया याद निर्व्वेदाय त्वयाधुना ॥ कर्त्तव्यं वदितं तन्नः कथ्यतां यदि भावत । यच्च कार्य्यं तवास्माभिस्तद्वाच्यं समभिमत्य
म ॥ तद्वद त्वं विवक्षुस्त्वमस्माभिरुपलक्ष्यसे ॥ ॥ध्रुव उवाच॥ नाहमर्थमभीप्सामि न राज्यं द्विजसत्तमाः । तत्स्थानमेकमिच्छामि भुक्तं नान्येन यत्पुरा ॥
एतन्मे क्रियतां सम्यक् कथ्यतां प्राप्यते यथा । स्थानमग्र्यं समस्तेभ्यः स्थानेभ्यो द्विजसत्तमाः ॥ ॥मरीचिरुवाच॥ अनाराधितगोविन्दैर्न्नरैः स्थानं नृपात्म
ज न हि संप्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥ ॥अत्रिरुवाच॥ परः पराणां पुरुषो यस्य तुष्टो जनार्द्दनः । स प्राप्नोत्यक्षयं स्थानमेतत्सत्यं मयोदितम् ॥ ॥ २३
अङ्गिरा उवाच ॥ यस्यान्तः सर्व्वमेवेदमच्युतस्याव्ययात्मनः । तमाराधय गोविन्दं स्थानमग्र्यं यदीच्छसि ॥ ॥पुलस्त्य उवाच॥ परं ब्रह्म परं धाम योऽसौ
पश्चमः
ब्रह्म तथा परः । तमाराध्य हरिं याति मुक्तिमप्यतिदुर्लभाम् ॥ ॥क्रतुरुवाच॥ यो यज्ञपुरुषो यज्ञो योगेशः परमः पुमान् । तस्मिंस्तुष्टे यदप्राप्यं किं तदस्ति ज
नार्द्दन ॥ ॥पुलह उवाच॥ इन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् । प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥ ॥वसिष्ठ उवाच॥ प्राप्नोष्याराधिते विष्णौ

मनसा यद्यदीच्छसि । त्रैलोक्यान्तर्गतं स्थानं किमु वत्सोत्तमोत्तमम् ॥ ॥ध्रुव उवाच॥ आराध्यः कथितो देवो भवद्भिः प्रणतस्य मे । मया तत्परितोषाय यज्जप्त
व्यं तदुच्यताम् ॥ यथा चाराधनं तस्य मया कार्य्यं महात्मनः । प्रसादसुमुखास्तन्मे कथयन्तु महर्षयः ॥ ॥ऋषय ऊचुः॥ राजपुत्र यथा विष्णोराराधनपरैर्न्नरै
ः कार्य्यमाराधनं तन्नो यथावच्छ्रोतुमर्हसि ॥ बाह्यार्थादखिलाच्चित्तं त्याजयेत्प्रथमं पुनः । तस्मिन्नेव जगद्धाम्नि ततः कुर्व्वीत निश्चलम् ॥ एवमेकाग्रचित्तेन त
न्मयेन धृतात्मना । जप्तव्यं यन्निबोधैतत्तन्नः पार्थिवनन्दन ॥ हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपिणे । ॐ नमो वासुदेवाय शुद्धज्ञानस्वभाविने । एतज्ज
जाप भगवाञ्जप्यं स्वायम्भुवो मनुः ॥ पितामहस्तव पुरा तस्य तुष्टो जनार्द्दनः । ददौ यथाभिलषितां सिद्धिं त्रैलोक्यदुर्लभाम् ॥ तथा त्वमपि गोविन्दं तोष
यंस्तत्सदा जप ॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे एकादशोऽध्यायः ॥ ॥पराशर उवाच॥ निशम्यैतदशेषेण मैत्रेय नृपतेः सुतः । निर्ज्जगाम वनात्तस्मा
त्प्रणिपत्य स तानृषीन् ॥ मधुसंज्ञं महापुण्यं जगाम यमुनातटम् । पुनश्च मधुसंज्ञेन दैत्येनाधिष्ठितं यतः ॥ ततो मधुवनं नाम्ना ख्यातमत्र महीतले । हत्वा च

लवनेवक्षामध्यपद्मेमहावली॥ शत्रुघ्नामथुर्नाम पूर्वाम्यत्रवकानेवे। यत्रवेदवयवस्य स्वाविश्रुरुविमधस्य॥ सर्वपापहरं तत्तु स्कन्दपद्मीर्थवकानस॥ मव
ष्विमिलेम्मनिष्ठिः यद्याद्विषमहरूरुया॥ आत्मन्यापषयवर्णस्थिताग्निविष्णुसमन्यत। तन्न्यवतस्यकस्य ध्यायताद्गवारुविः॥ सर्वतकगता क्षिप्र सर्वकाव
गताङ्कवत्। मनस्यवस्थितं तस्मिन्नेवेष्णुमेत्रयथा। तिनः॥ नगमाकधनाहावेसूक्ष्मार्दूरुनवेमिणी। वामपादस्थितं तस्मिन्नामाङ्गनमदिनी॥ द्वितीयस्थितं
नामार्द्धस्थितं दक्षिणपीस्थितं। पादाङ्गुष्ठनसंपीड्य यदाप वसर्वास्थितः॥ नयासमस्तावस्थाववालसरूपवर्त्तते॥ नथानदाःसमन्ताद्य संस्कारोपनमेय २७
यः॥ ततस्तापादमत्रःकार्यं परिगम्य महाप्रभ। यामानामतयापवा पत्रयपवनाकुला॥ ततस्तु पुरुषमत्र्य ध्यानं संगीप्रवक्रमः॥ कृष्णाङ्गविविधेनपे
मरूत्वद्धामहामूर्ने। स्वमाधिष्ठगीमरयन्कमावधाः॥ कर्दमासवाः॥ स्तनीनि न्नमितस्थानासाद्याततूपूवतस्थिता। पूर्वाङ्गिकवर्णावावमाहमायामयीतदा॥
पत्रकास्मान्निवर्त्तस्वशयवव्ययदानृणात्। निर्वन्धमामयालक्ष्यवद्रूस्त्रिस्तीमनावध्येः॥ दीनामकी पविश्यकुमनाथेनत्वमहीपि। सपत्नीववसाद्दस्म

गतस्वर्गनिर्म्ममः॥ वत्वलीपवर्षवर्षायः क्षेत्रेनद्वानुणीनपः॥ निवर्त्तनीमनःकष्टी निर्वन्धमहल्लवक्त्राम्॥ कालक्रीडनकालान्ते गत्येवाश्रयनस्यव। ततः
समस्तागमनान्कदन्तेवध्यनतपः॥ तस्मिंस्तु मित्स्थितपसक्तिंनाम याल्मनावनः॥ मत्त्रीतिःपवमीधर्म्म वृथावस्था क्रियाक्रमी। अनुवर्त्तस्वमामाद्य निवर्त्तास्मा
दधर्म्मतः॥ पतिव्रताशिवस्याद्य यथान्तरवास्मयः॥ यस्मामदन्तपिप्राणान् स्वाम्तुवेपश्यतक्रप॥ ॥पवाशवडवाव॥ लोविलापवतीभर्वावाष्पाविलविला
पनी। समाद्धितमनाविष्टा पश्यन्नपिनदृष्टवान्॥ वस्त्रवस्त्रसपानानि वदीभमानिरीमूर्त्तैः। वसस्त्व्यगन्धफ्राणिसमायान्त्यपतन्यती॥ स्त्यक्त्वाप्रययौसा
यत्नात्म्या विवर्तुतः॥ अत्यययताग्रगन्धप्राणि ह्यालामालाकुलेमूर्त्वः॥ ततानादानतीवाग्य्या नाजपुत्रस्य तपवः॥ मूमवृद्धीफलान्फ्राणि ग्रामयत्न निशावनाः॥
शिवाश्वगतभद्रःसद्यास्त्रकवर्णी स्मृर्वेः॥ यासायतस्यवान्तस्य यागयूकस्य सर्वतः॥ रुन्धनाद्रन्यताभव स्थियतोस्थियता मिमि॥ तदाहनी रुद्रनीवाय
मत्यवृक्षनिशावनाः॥ ततस्थाविश्रान्त्यादान् सिंहोड्वमकवाननाः॥ तासाय वागपुत्रस्य नदूस्कवजनीवनाः॥ वद्धापितानिदनादाः॥ शिवास्तान्यायुक्ष निवे

गोविन्दासक्तचित्तस्य यय्यं न्त्रिय गोचरी । एकाग्रचेताः सततं विष्णुम्मेवात्मसंश्रयं ॥ दृष्टवान् पृथिवीनाथ पुत्रो नान्यत्कथंचन । ततस्सर्व्वात्ममायापि वि-
लीना सा पुनस्तदा ॥ तस्मिन्परमेशे भूतस्य वा सर्व्वक्रिया । तन्मयस्य जगद्धा निमनादिनिधनं हरिं ॥ शरण्यं शरणं याता स्तपसा तस्य तापिताः ॥ ॥देवा ऊ-
चुः ॥ देवदेव जगन्नाथ परेश पुरुषोत्तम । ध्रुवस्य तपसा तप्तास्त्वां वयं शरणं गताः ॥ दिने दिने कलालेशैः शशाङ्कः पूर्य्यते यथा । तथायं तपसा देव प्रयात्यृ-
द्धिमहर्न्निशं ॥ औत्तानपादितपसा वयमित्थं जनार्द्दन । भीतास्त्वां शरणं याता स्तपसस्तं निवर्त्तय ॥ न विद्मः किं स शक्रत्वं किं सूर्य्यत्वमभीप्सति । वित्तेशाम्बु- २७
पसोमानां साभिलाषः पदं नु किं । तदस्माकं प्रसीदेश हृदयाच्छल्यमुद्धर ॥ उत्तानपादतनयं तपसः सन्निवर्त्तय ॥ श्री भगवानुवाच ॥ नेन्द्रत्वं न च सू-
र्य्यत्वं नैवाम्बुपधनेशतां । प्रार्थयत्येष यं कामं तं करोम्यखिलं सुराः ॥ यात देवा यथाकामं स्वस्थानं विगतज्वराः । निवर्त्तयाम्यहं बालं तपस्यासक्तमा-
नसं ॥ ॥पराशर उवाच ॥ इत्युक्ता देवदेवेन प्रणम्य त्रिदशास्ततः । प्रययुः स्वानि धिष्ण्यानि शतक्रतुपुरोगमाः । भगवानपि सर्व्वात्मा तन्मयत्वेन तोषि-

तः ॥ गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः । औत्तानपादे भद्रन्ते तपसा परितोषितः ॥ गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः । वरदोहमनुप्राप्तो वरं वर-
य सुव्रत ॥ बाह्यार्थनिरपेक्षन्ते मयि चित्तं यदाहितं । तुष्टोहं भवतस्तेन तद्वृणीष्व वरं परं ॥ ॥पराशर उवाच ॥ श्रुत्वेत्थं गदितं तस्य देवदेवस्य बाल-
कः । उन्मीलिताक्षो ददृशे ध्यानदृष्टं हरिं पुरः ॥ शङ्खचक्रगदाशार्ङ्गवरासिधरमच्युतं । किरीटिनं समालोक्य जगाम शिरसा महीं । रोमाञ्चिता-
ङ्गः सहसा साध्वसं परमं गतः । स्तवाय देवदेवस्य स चक्रे मानसं ध्रुवः ॥ किं वदामि स्तुतावस्य केनोक्तेनास्य संस्तुतिः । इत्याकुलमतिर्द्देवं तमेव
शरणं ययौ ॥ ॥ध्रुव उवाच ॥ भगवान्यदि मे तोषं तपसा परमं गतः । स्तोतुं तदहमिच्छामि वरमेनं प्रयच्छ मे ॥ ब्रह्माद्यैर्यस्य वेदज्ञैर्ज्ञायते यस्य
नो गतिः । तं त्वां कथमहं देव स्तोतुं शक्नोमि बालकः ॥ त्वद्भक्तिप्रवणं ह्येतत् परमेश्वर मे मनः । स्तोतुं प्रवृत्तं त्वत्पादौ तत्र प्रज्ञां प्रयच्छ मे ॥ ॥परा-
शर उवाच ॥ शङ्खप्रान्तेन गोविन्दस्तं पस्पर्श कृताञ्जलिं । उत्तानपादतनयं द्विजवर्य्य जगत्पतिः ॥ अथ प्रसन्नवदनः स क्षणान्नृपनन्दनः । तुष्टाव प्र-
। नृपन

दाता त्वत्ता त्वत्तमक्षमानमश्नुते॥ ॥ध्रुव उवाच॥ भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। भूतादिरादिप्रकृतिर्यस्य रूपं नतोस्मि तं॥ शुद्ध
ःसूक्ष्माखिलव्यापी प्रधानात्परतः पुमान्। यस्य रूपं नमस्तस्मै पुरुषाय गुणाशिने॥ भूरादीनां समस्तानां गन्धादीनां च शाश्वतः। बुद्ध्यादी
नां प्रधानस्य पुरुषस्य च यः परः। तं ब्रह्मभूतमात्मानमशेषजगतः पतिं॥ प्रपद्ये शरणं शुद्धं त्वद्रूपं परमेश्वरं। बृहत्त्वाद्बृंहणत्वाच्च यद्रूपं
ब्रह्मसंज्ञितं॥ तस्मै नमस्ते सर्वात्मन् योगिचिन्त्याविकारिणे। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ सर्वव्यापी भुवः स्पर्शादत्यतिष्ठद्द २८
शाङ्गुलं। यद्भूतं यच्च वै भाव्यं पुरुषोत्तम तद्भवान्॥ त्वत्तो विराट् स्वराट् सम्राट् त्वत्तश्चाप्यधिपूरुषः॥ अत्यरिच्यत सोधश्च तिर्यगूर्ध्वं च वै भु
वः॥ त्वत्तो विश्वमिदं जातं त्वत्तो भूतभविष्यति। त्वद्रूपधारिणश्चान्तःसर्वभूतमिदं जगत्॥ त्वत्तो यज्ञः सर्वहुतः पृषदाज्यं पशुर्द्विधा। त्वत्तो ऋ
चोथ सामानि त्वत्तश्छन्दांसि जज्ञिरे॥ त्वत्तो यजूंष्यजायन्त त्वत्तोश्वाश्चैकतोदतः। गावस्त्वत्तः समुद्भूतास्त्वत्तोजा अवयो मृगाः॥ त्वन्मुखाद्ब्रा
ह्म।

ह्मणा बाहोस्त्वत्तः क्षत्रमजायत। वैश्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः॥ अक्ष्णोः सूर्योनिलः प्राणाच्चन्द्रमा मनसस्तव। प्राणान्तःसुषिराज्जाता मुखा
दग्निरजायत॥ नाभितो गगनं द्यौश्च शिरसः समवर्त्तत। दिशः श्रोत्रात्क्षितिः पद्भ्यां त्वत्तः सर्वमभूदिदं॥ न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः।
संयमे विश्वमखिलं बीजभूते तथा त्वयि॥ बीजादङ्कुरसम्भूतो न्यग्रोधः स समुत्थितः। विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगत्॥ यथा हि कदली ना:
यां प्रकृपत्राद्यथ दृश्यते। एवं विश्वस्य नान्यस्त्वं त्वत्स्थायीश्वर दृश्यते। ह्लादिनी संधिनी वापि त्वय्येका सर्वसंस्थितौ॥ ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जि
ते। पृथग्भूतैकभूताय भूतभूताय ते नमः॥ प्रभूतभूतभूताय तुभ्यं भूतात्मने नमः। व्यक्तं प्रधानपुरुषं विराट् सम्राट् स्वराट् तथा॥ विभाव्यसेन्तःकरणे
पुरुषेष्वक्षयो भवान्। सर्वस्मिन्सर्वभूतस्त्वं सर्वः सर्वस्वरूपधृक्॥ सर्वं त्वत्तस्ततश्च त्वं नमः सर्वात्मनेस्तु ते। सर्वात्मकोसि सर्वेश सर्वभूतस्थितो यतः॥ कथयामि
ततः किं ते सर्वं वेत्सि हृदि स्थितं। सर्वात्मन् सर्वभूतेश सर्वसत्त्वसमुद्भव॥ सर्वभूतो भवान्वेत्ति सर्वसत्त्वमनोरथं। यो मम मनोरथो नाथ सफलः स त्वया कृतः॥ तप
र्वे।

श्वतपसः फलं यद्दृष्टोऽपि जगत्पतिः॥ ॥श्रीभगवानुवाच॥ तपसस्तत्फलं प्राप्तं यद्दृष्टोऽहं त्वया ध्रुव। मद्दर्शनं हि विफलं राजपुत्र न जायते॥ वरं वरय तस्मा
त्त्वं यथाभिमतमात्मनः॥ सर्वं संपद्यते पुंसां मयि दृष्टिपथं गते॥ ॥ध्रुव उवाच॥ भगवन्सर्वभूतेश सर्वस्यास्ते भवान्हृदि। किमज्ञातं तव स्वामि
न्मनसा यन्मयेप्सितं। तथापि तुभ्यं देवेश कथयिष्यामि यन्मया। प्रार्थ्यते दुर्विनीतेन हृदयेनातिदुर्लभं। त्वत्प्रसादफलं भुंक्ते त्रैलोक्यं मघवानपि॥ नैतद्राज ২৯
सनं योग्यमजातस्य ममोदरात्। इति गर्वादवोचन्मां सपत्नी मातुरुच्चकैः॥ आधारभूतं जगतः सर्वेषामुत्तमोत्तमं। प्रार्थयामि प्रभो स्थानं त्वत्प्रसादादतोऽव्य
यं॥ ॥श्रीभगवानुवाच॥ यत्त्वया प्रार्थितं स्थानमेतत्प्राप्स्यति वै भवान्। त्वयाहं तोषितः पूर्वमन्यजन्मनि बालक। त्वमासीर्ब्राह्मणः पूर्वं मय्येकाग्रमति
ः सदा। मातापित्रोश्च शुश्रूषुर्निजधर्मानुपालकः॥ कालेन गच्छता मित्रं राजपुत्रस्तवाभवत्। यौवनेऽखिलसंभोगसंपन्नो दर्शनीयोज्ज्वलाकृतिः॥ तत्संगात्तस्य
तामृद्धिं समालोक्यातिदुर्लभां। भवेयं राजपुत्रोऽहमिति वाञ्छा त्वया कृता॥ ततो यथाभिलषिता प्राप्ता ते राजपुत्रता॥ उत्तानपादस्य गृहे जातोऽसि ध्रुव दुर्लभे

कृ

अन्येषां दुर्लभं स्थाने कुले स्वायंभुवस्य यत्॥ तस्यैतदपरं बाल येनाहं परितोषितः। मामाराध्य नरो मुक्तिमवाप्नोत्यविलंबितां॥ मय्यर्पितमना बाल कि
मु स्वर्गादिकं पदं। त्रैलोक्यादधिके स्थाने सर्वताराग्रहाश्रयः॥ भविष्यति न संदेहो मत्प्रसादाद्भवान्ध्रुव। सूर्यात्सोमात्तथा भौमात्सोमपुत्राद्बृहस्पतेः॥
सितार्कतनयादीनां सर्वर्क्षाणां तथा ध्रुव। सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः॥ सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुव। केचिच्चतुर्युगं यावत्केचि
न्मन्वन्तरं सुराः॥ तिष्ठन्ति भवतो दत्ता मया वै कल्पसंस्थितिः॥ सुनीतिरपि ते माता त्वदासन्ना तिनिर्मला॥ विमाने तारका भूत्वा तावत्कालं निवत्स्यति। ये च
त्वां मानवाः प्रातः सायं च सुसमाहिताः॥ कीर्तयिष्यन्ति तेषां च महत्पुण्यं भविष्यति॥ ॥पराशर उवाच॥ एवं पूर्वं जगन्नाथाद्देवदेवाज्जनार्दनात्। वरं प्राप्य ध्रु
वः स्थानमध्यास्ते स महामते। तस्याभिमानमृद्धिं च महिमानं निरीक्ष्य च॥ देवासुराणामाचार्यः श्लोकमत्रोशना जगौ॥ अहोऽस्य तपसो वीर्यमहोऽस्य तपसः
फलं। यदेनमग्रतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः॥ ध्रुवस्य जननी चेयं सुनीतिर्नाम सूनृता॥ यस्याश्च महिमानं कः शक्तो वर्णयितुं भुवि। त्रैलोक्याश्रयतां प्राप्तं

स्व१ न्म३

पवीस्थाने स्थितामति॥ स्थानेप्राप्यापवीकलायाक्षितिविवम्भ्रुवा। यश्चैतत्कीर्तयन्नित्यं ध्रुवस्यारोहणं दिवि। त्रैलोक्याश्रयतां प्राप्तं सर्व्वपापविनिर्मुक्तः
स्वर्गलोके महीयते॥ स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि। सर्व्वकल्याणसंयुक्तो दीर्घकालं स जीवति॥ इति श्रीविष्णुपुराणे प्रथमेंशे द्वादशोऽध्याय
ः॥ ॥पराशर उवाच॥ ध्रुवाच्छिष्टिं च भव्यं च भव्याच्छम्भुर्व्यजायत। शिष्टेराधत्त सुच्छाया पञ्चपुत्रानकल्मषान्॥ रिपुं रिपुञ्जयं विप्रं वृकलं वृकतेजसं।
रिपोराधत्त बृहती चक्षुषं सर्व्वतेजसं॥ अजीजनत्पुष्करिण्यां वीरिण्यां चाक्षुषो मनुं। प्रजापतेरात्मजायां मनोरस्य महीमतः॥ मनोरजायन्त दश नड्वलायां ३०
महौजसः। कन्यायां मुनिशार्दूल वैराजस्य प्रजापतेः॥ ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः। अग्निष्टुरतिरात्रश्च सुद्युम्नश्चेति ते नव॥ अभिम
न्युश्च दशमो नड्वलायां महौजसः॥ ऊरोरजनयत्पुत्रान् षडाग्नेयी महाप्रभान्॥ अङ्गं सुमनसं ख्यातिं क्रतुमङ्गिरसं शिवं। अङ्गात्सुनीथापत्यं वै वेनमेक
मजायत। प्रजार्थमृषयस्तस्य ममन्थुर्दक्षिणं करं। वेनस्य पाणौ मथिते संबभूव महामुने॥ वैन्यो नाम महीपालो यः पृथुः परिकीर्त्तितः। येन दु

ग्धा मही पूर्व्वं प्रजानां हितकारणात्॥ ॥मैत्रेय उवाच॥ किमर्थं मथितः पाणिर्व्वेनस्य परमर्षिभिः। यत्र जज्ञे महावीर्यः स पृथुर्मुनिसत्तम॥ ॥पराशर उ
वाच॥ सुनीथा नाम या कन्या मृत्योः प्रथमजाभवत्। अङ्गस्य भार्य्या सा दत्ता तस्यां वेनस्त्वजायत॥ स मातामहदोषेण तेन मृत्योः सुतात्मजः। निसर्गादेव मै
त्रेय दुष्ट एव व्यजायत॥ अभिषिक्तो यदा राज्ये स वेनः परमर्षिभिः। घोषयामास स तदा पृथिव्यां पृथिवीपतिः॥ न यष्टव्यं न दातव्यं न होतव्यं कथञ्चन। य
ज्ञाः यज्ञस्य कस्त्वन्यो ह्यहं यज्ञपतिः प्रभुः॥ ततस्तमृषयः पूर्व्वं सम्पूज्य पृथिवीपतिं। ऊचुः सामकलं सम्यक् मैत्रेय समुपस्थिताः॥ ॥ऋषय ऊचुः
॥ भो भो राजन् शृणुष्व त्वं यद्वदाम महीपते। राज्योपकारकाय प्रजानां च हितं परं॥ दीर्घसत्रेण देवेशं सर्व्वयज्ञेश्वरं हरिं॥ पूजयिष्याम भद्रं ते तस्यां
शो भविष्यति॥ यज्ञेन यज्ञपुरुषो विष्णुः सम्प्रीणितो नृप। अस्माभिर्भवतः कामान् सर्व्वानेव प्रदास्यति॥ यज्ञैर्यज्ञेश्वरो येषां राष्ट्रे सम्पूज्यते हरिः॥ तेषां सर्व्वे
प्सितावाप्तिं ददाति नृप भूभुजां॥ ॥वेन उवाच॥ मत्तः कोऽभ्यधिकोऽन्योऽस्ति कश्चाराध्यो ममापरः। कोऽयं हरिरिति ख्यातो यो वो यज्ञेश्वरो मतः॥ ब्रह्मा

जनार्द्दनः॥ गच्छन्तु मिश्रावायुर्यमाग्निविः। इन्द्रस्तु कुवेरुणो धाता पूषा हिमिर्न्निशाकरः॥ एते चान्ये च ये देवाः शापानुग्रहकारिणः। तपस्यन्तं शीनकं सर्व्वदेवम
यान्तपः॥ एतत्कृत्वा मयाख्यं कृपया यथा क्रियतां तथा। नदा तथैनक्ष्यातथी नयच्छ्रेथं वदेद्विजाः॥ तदर्थं शुश्रूषणीयं धर्म्माय यथा स्त्रीणां परमं तपः॥ ममात्मैव प्राप्तानि ध
र्म्माः एवमाचरेत् यथा द्विजाः॥ ॥ अजयपडवः॥ दक्षकन्यानां महाबाहुः मा धर्म्मा चापि स्वयं। धर्म्मविपद्दृत्य याति। द्वीपं न चाखिलं जगत्॥ हृद्विषीपरिभ्रमायीयय
तयखिलं जगत्॥ ॥ प्रजापतयश्चाव॥ स्तुतिं विज्ञाप्यमानापि सवनः परमर्षिभिः। यथा दया तितानुरूपं कः प्राकः पुनः पुनः॥ ततः क्षमनयः सर्व्वकायापामर्ष ३१
समन्वितः। हत्यतां हत्यतां पापं [illegible] परस्परं॥ यो यथा रूपं वर्षं देवमनादिनिधनं प्रभुं। विनिन्द्य धर्म्मावावा न स्यायद्भुवः पतिः॥ [illegible] मज्जन्
तेष्ठ [illegible] निगणानुपे। निगृह्य [illegible] पूर्व्वं भगवन्निन्दनादिना॥ ततश्च मूलयावल्नी दद्युः सर्व्वा द्विजाः। किमतदिति वासः प्रस्कन्नस्तज्जनतया॥ स्वा
ख्यातैवज्ञेस्तेषी वीवी [illegible] लोके वानर्व प्रवस्वादानमातुरैः॥ तेषामुपदी [illegible] नी वीनानाम निसन्नम। [illegible] पवविलाप



स्माविनां॥ ततः समन्ताः सर्व्वं मनयक्षस्य [illegible]॥ ममन्त्रकूर्प्य [illegible] मनपस्यस्ययत्नतः॥ मथ्यमथ्य समूरुस्तो तस्याबाः पूर्वः किल। दग्धस्थूना:
प्रनाकाशः स्वर्वदिक्षा [illegible]॥ किं करोमीति तान्सर्व्वान् प्रानाह सवाक्तुवः। निषीदेति ततस्तस्य निषादस्तेन सोऽभवत्॥ ततस्तत्संस्थितो नाना विन्ध्य
शैल निवासिनः। निषादा मुनिशार्दूल पापकर्म्मोपलक्षणाः॥ [illegible] तस्यापि निष्क्रान्ते तस्य रूपकः। निषादास्ते तदा जाता वेण कल्मषनाशना
॥ ततोऽस्य दक्षिणं हस्तं ममन्थुस्ते तदा द्विजाः। मथ्यमानं ततस्तस्मात् पृथु र्वैन्यः प्रतापवान्॥ दीप्यमानः स्ववपुषा साक्षादग्निरिव ज्वलन्। आद्यमाजग
वं नाम धनुः पापाद्भूतो धनुः॥ शराश्च दिव्यान् रक्षार्थं कवचं च महाप्रभम्। तस्मिन् जाते तु भूतानि संप्रहृष्टानि सर्व्वशः॥ [illegible] निवाहिष कार्थं सर्व्वाण्येः
वापतस्थिरे। पितामहस्य भगवान् दृष्ट्वा नाभिरसः प्रभुः॥ सर्व्वाणि रत्नानि [illegible] मानि सर्व्वशः। समागम्य तदा वैन्यम् अभिषिक्तं नराधिपं॥ [illegible]
जेवक्री हस्तं [illegible] पितामहः। विष्णुर्वेणपृथुं मत्वा प्रविशात् पवेयधो॥ विष्णुविक्रान्तकं वक्र सर्व्वेषां चक्रवर्त्तिनी। एवं यथा हस्ता यस्य प्रजा वसुदर्शन

फा२

पि॥ मरुतावाङ्नाम्ना च पृथ्व्यां प्रतापवान्॥ सा हि पिका महातेजा विधिवद्धर्मपालितः॥ पितापत्र अङ्गिरास्तस्य प्रजास्तेनानु अङ्गिराः॥ अनुवाग॥
रुतस्तस्य नाम वाङ्गस्य जायत॥ आपदस्तु क्लिष्टवास्य समुद्रमतियास्यतः॥ पर्वतांश्च दरुर्मार्गं ध्वजः शृङ्गश्च नाह वत्॥ अङ्गेष्टप्रयाः पृथिवी सिद्धि
यन्त्रा निविक्रया॥ सर्वकामदुघा गावः कुटे कुटे कमधुः॥ तस्य वै यागमात्रस्य यज्ञपेनाम दुर्गुरुः॥ स्तनः स्वर्णी समुत्पन्नः शौर्य्यस्तनिमहा
मतिः॥ तस्मिन्नेव महाह्नि यज्ञे साक्ष्य माधवः॥ प्राक्केन दामनि वंशी स्वावंशो सूतमागधो॥ स्तूयमानमथ नृपतिः पृथ्व्यां प्रतापवान्॥ कर्म्मत ३२
दनूरूपं वां पात्रीकात्र स्ववाच्यं॥ नत्रस्था बृहस्पतिर्विप्रान् सर्वानिवस्ता नाङ्गे लीन्॥ अयं यत्तस्य नाकर्मस्त्रायतस्य महीपतेः॥ गुणानवास्य स्तायकैः
नवाप्यप्रथितं यशः॥ स्तोत्रीकिमाश्रयं तस्य कार्य्यसिद्धाहि नृपश्रीः॥ ॥अथ पवृतः॥ कनिष्ठस्य पवपत्त्वं सर्म्मवित्प्रावर्ती महावलः॥ गुणाकृविष्ठाश्च वास्य ते
नवस्तृयतीनृपः॥ ॥पतादश्रकवाच॥ ततः स नृपतिः सोष विस्तृत्वापन्नमीयपी॥ सकुलैः श्राघ्नातामतिस्तस्याश्च यद्गुणाममम॥ तस्मादेषं प्रज्ञाप्रेभ

३२

गुणानिर्व्वर्णुनिविशे॥ कनिष्ठागकविष्ठामितम वाद्य समादितः॥ यदिमौ वर्ज्जनीयं वः किञ्चिदस्य वणविष्यतः॥ तद्दर्वज्यिष्यामी स्वैवक्तमतिं नृपः॥ अथ तौ वक्त
कुत्तार्थ पृथ्व्यां धर्म्मधीमतः॥ सुविष्टः कर्म्मभिः सम्यक् सन्तुष्टौ सूतमागधौ॥ सत्यवाग्दानशीलायं सत्यसन्धिनरेश्वरः॥ श्रीमाञ्जैत्रः क्षमाशीलो विक्रान्तो
दुष्टशासनः॥ सर्वज्ञश्च कृतज्ञश्च दयावान्प्रियभाषकः॥ मान्यामानयिता यज्ञा ब्रह्मण्यः साधुवत्सलः॥ समः शत्रौ च मित्रे च व्यवहारविलीनो नृपः॥ सूतेनाक्तान्तु
मानिन्द्वे सन्तदा मागधेन च॥ वक्ता बुद्धि नाम कर्म्मणा कृतवान् सौ॥ ततः स पृथिवीपालः पालयन् पृथिवीमिमाम्॥ ईश्वरायाविविधे यज्ञैः महद्भिर्भूरिदक्षिणैः॥
॥ तं प्रजाः पृथिवीनाथ सूपतस्थुः क्षुधार्दिताः॥ ओषधीषु प्रणष्टासु तस्मिन्काले ययावजक॥ तमूचुस्ते नराः पृष्टा कृताजगमकारणं॥ ॥प्रजा ऊचुः॥ अराज
कान्नृपश्रेष्ठ विश्वासकलौषधीः॥ प्रस्फाम्नतः कुरीयानि प्रजाः सर्वाः प्रजश्वरः॥ त्वन्नाकृतिप्रदाधाता प्रजापालानि नृपितः॥ दक्षिणः कुरु त्वमासां प्रजा
नां जीवनौषधीः॥ ॥पराशर उवाच॥ ततः श्चन्रपतिर्द्दिव्यमादायाजगवं धनुः॥ शरांश्चदिव्यान्कुपितः सोऽन्वधावद्वसुन्धरां॥ ततो ननाश त्वरिता गौर्भूत्वाउव
गा

सन्धत्ता। सा लोकान्ब्रह्मलोकादीन् संत्रासादगमन्मही॥ यत्र यत्र ययौ देवी सा तदा भूतधारिणी। तत्र तत्र तु सा वैन्यं ददृशेऽभ्युद्यतायुधं॥ ततस्तं प्राह वसुधा पृ
थुं पृथुपराक्रमं। प्रवेपमाना तद्बाणपरित्राणपरायणा॥ स्त्रीवधे त्वं महत्पापं किं नरेन्द्र न पश्यसि। येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमं॥ ॥पृथुरुवाच
एकस्मिन्यत्र निधनं प्रापिते दुष्टकारिणि। बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः॥ ॥पृथ्व्युवाच॥ प्रजानामुपकाराय यदि मां त्वं हनिष्यसि। आधारः कः
प्रजानान्ते नृपश्रेष्ठ भविष्यति॥ ॥पृथुरुवाच॥ त्वां हत्वा वसुधे बाणैर्म्मच्छासनपराङ्मुखीं। आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः॥ ततः प्रणम्य वसुधां 33
तं भूयः प्राह पार्थिवं। प्रवेपिताङ्गी परमं साध्वसं समुपागता। उपायतः समारब्धाः सर्वे सिध्यन्त्युपक्रमाः। तस्माद्वदाम्युपायन्ते तं कुरुष्व यदीच्छसि॥ सम
स्ता या मया जीर्णा नरनाथ महौषधीः। यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः। तस्मात्प्रजाहितार्थाय मम धर्म्मभृतां वर। तन्तु वत्सं प्रयच्छ त्वं क्षरेयं ये
न वत्सला॥ समां च कुरु सर्वत्र येन क्षीरं समन्ततः। वरौषधीबीजभूतं बीजं सर्वत्र भावये॥ ॥पराशर उवाच॥ तत उत्सारयामास शैलाञ्छतसहस्रशः॥



धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्द्धिताः॥ न हि पूर्वविसर्गे वै विषमे पृथिवीतले। प्रविभागः पुराणां वा ग्रामाणां वा पुराभवत्॥ न सस्यानि न गोर
क्षं न कृषिर्न्न वणिक्पथः। वैन्यात्प्रभृति मैत्रेय सर्व्वस्यैतस्य सम्भवः॥ यत्र यत्र समं त्वस्या भूमेरासीद्द्विजोत्तम। तत्र तत्र प्रजाः सर्व्वा निवासं समरोचयन्
॥आहारः फलमूलानि प्रजानामभवत्तदा। कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै॥ स कल्पयित्वा वत्सं तु मनुं स्वायम्भुवं प्रभुं। स्वपाणौ पृथिवीनाथो दुदोह
पृथिवीं पृथुः॥ सस्यजातानि सर्व्वाणि प्रजानां हितकाम्यया। तेनान्नेन प्रजास्तात वर्त्तन्तेऽद्यापि नित्यशः॥ प्राणप्रदाता स पृथुर्यस्माद्भूमेरभूत्पिता। ततस्तु पृथिवीसंज्ञाम
वापाखिलधारिणी॥ ततश्च देवैर्म्मुनिभिर्द्दैत्यै रक्षोभिरद्रिभिः। गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा॥ तत्तत्पात्रमुपादाय तत्तद्दुग्धं मुने पयः॥
वत्सदोग्धृविशेषाश्च तेषां तद्योनयोऽभवन्॥ सैषा धात्री विधात्री च धारिणी पोषिणी तथा। सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा॥ एवं प्रभावः स पृ
थुः पुत्रो वेनस्य वीर्य्यवान्। जज्ञे महीपतिः पूर्व्वो राजाभूज्जनरञ्जनात्॥ य इदं जन्म वैन्यस्य पृथोः संकीर्त्तयेन्नरः। न तस्य दुष्कृतं किंचित्फलदायि प्र

ज्ञापत॥ दुःस्वप्नोपशमं पुंसां शृण्वतां चैवदुत्तमं। एतज्जन्मपृथोर्वस्य कर्म्माणि सकलानि च॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे त्रयोदशोऽध्यायः॥ ॥परा
शर उवाच॥ पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ। शिखण्डिनी हविर्द्धानमन्तर्द्धानाद्व्यजायत॥ हविर्द्धानात्षडाग्नेयी धिषणाजनयत्सुतान्। प्राची
नबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ॥ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः। महतस्तपसः पारे सवर्ण्णायां महीपते॥ सवर्ण्णाधत्त सामुद्री दश प्रा
चीनबर्हिषः। सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः॥ अपृथग्धर्म्मचरणास्ते तप्यन्त महत्तपः। दशवर्षसहस्राणि समुद्रसलिलेशयाः॥ ॥मैत्रेय उ ३४
वाच॥ यदर्थं ते महात्मानस्तपस्तेपुर्महामुने। प्रचेतसः समुद्राम्भस्येतदाख्यातुमर्हसि॥ ॥पराशर उवाच॥ पित्रा प्रचेतसः प्रोक्ताः प्रजार्थममितात्मना।
प्रजापतिनियुक्तेन बहुमानपुरःसरं। ब्रह्मणा देवदेवेन समादिष्टोऽस्म्यहं सुताः॥ प्रजाः संवर्द्धनीयास्ते मया चोक्तं तथेति तत्। तन्ममापि प्रीतये पुत्राः प्रजावृ
द्धिमतन्द्रिताः॥ कुरुध्वं माननीया वः सम्यगाज्ञा प्रजापतेः॥ ॥पराशर उवाच॥ ततस्ते तत्पितुः श्रुत्वा वचनं नृपनन्दनाः। तथेत्युक्त्वा च तं भूयः पप्रच्छुः पि

तरं मुने॥ ॥प्रचेतस ऊचुः॥ येन तात प्रजावृद्धौ समर्थाः कर्म्मणा वयं। भवेम तत्समस्तं नः कर्म्म व्याख्यातुमर्हसि॥ ॥प्राचीनबर्हिरुवाच॥ आराध्य वरदं विष्णुमि
ष्टप्राप्तिमसंशयं। समेति नान्यथा मर्त्यः किमन्यत्कथयामि वः॥ तस्मात्प्रजाविवृद्ध्यर्थं सर्व्वभूतप्रभुं हरिं। आराधयत गोविन्दं यदि सिद्धिमभीप्सथ॥ ध
र्म्ममर्थं च कामं च मोक्षं चान्विच्छता सदा। आराधनीयो भगवाननादिः पुरुषोत्तमः॥ यस्मिन्नाराधिते सर्गं चकारादौ प्रजापतिः। तमाराध्याच्युतं वृद्धिः प्र
जानां वो भविष्यति॥ इत्येवमुक्तास्ते पित्रा पुत्राः प्राचेतसो दश। मग्नाः पयोधिसलिले तपस्तेपुः समाहिताः॥ दशवर्षसहस्राणि न्यस्तचित्ता जगत्पतौ। नारा
यणे मुनिश्रेष्ठ सर्व्वलोकपरायणे॥ तत्रैवावस्थिता देवमेकाग्रमनसो हरिं। तुष्टुवुर्यः स्तुतः कामान् स्तोतुरिष्टान्प्रयच्छति॥ ॥मैत्रेय उवाच॥ स्तवं प्रचेतसो
विष्णोः समुद्राम्भसि संस्थिताः। चक्रुस्तन्मे मुनिश्रेष्ठ सुपुण्यं वक्तुमर्हसि॥ ॥पराशर उवाच॥ शृणु मैत्रेय गोविन्दं यथापूर्व्वं प्रचेतसः। तुष्टुवुस्तन्मयीभूताः
समुद्रसलिलेशयाः॥ ॥प्रचेतस ऊचुः॥ नताः स्म सर्व्ववचसां प्रतिष्ठा यत्र शाश्वती। तमाद्यन्तमशेषस्य जगतः परमं प्रभुं॥ ज्योतिराद्यमनौपम्यमण्वनन्तमपा
वा

वदतु । यानि सूक्ष्माणि भूतानि स्वरूपाणि तथा तव ॥ यान्यतः पृथगीशस्य रूपाणि तथा निशा । सन्ध्याव परमेशस्य तस्मै कालात्मने नमः ॥ उग्रं तन्नयिनीं देवः
४पितृक्लिश्वरूपात्मकः ॥ यो वहन् सर्वभूतानां तस्मै सोमात्मने नमः ॥ यस्तु परस्य तिमिराणि स्वरूपाणि विश्वस्य च सततं । धर्म्मार्थकामा यानि तस्मै सूर्यात्मने
नमः ॥ विरुद्धिर्याश्च कारणं जगत्सदनमे वपुः । गन्धादि संशया व्यापी तस्मै भूतात्मने नमः ॥ यस्यानि सूक्ष्मगमनाद्बीजं यत् सर्व्वदायिनी ॥ तत्तोयरूपमी
शस्य नमामि हरिमव्ययम् ॥ यो मुखं सर्व्वदेवानां हव्यभुक् कव्यभुक् तथा ॥ पितॄणां च नमस्तस्मै विष्णवे पावकात्मने । पञ्चभूतानि मादित्यं पञ्चकृत्वा
गतिः ॥ आकाशयानिरूपस्य यस्मै वाय्वात्मने नमः ॥ अवकाशमशेषाणां भूतानां यः प्रयच्छति ॥ अनन्तमूर्त्तिमानुद्धस्तस्मै व्योमात्मने नमः ॥ य
मस्तेन्द्रियवर्गस्य यः सदा स्थानमुत्तमम् ॥ तस्मै शब्दादिरूपाय नमः कृष्णाय वेधसे । गृह्णाति विषयान्नित्यमिन्द्रियात्मा क्षराक्षरः ॥ यस्तस्मै ज्ञानमूलाय
नतास्मि हरिमव्ययम् । गृहीतानीन्द्रियैरर्थानात्मने यः प्रयच्छति ॥ अन्तःकरणरूपाय तस्मै विश्वात्मने नमः । यस्मिन्ननन्ते सकलं विश्वं यस्मात्तथोद्गतम् ॥ ३७

नयस्थानं च यस्तस्मै नमः प्रकृतिधर्म्मिणे । शुद्धः संलक्ष्यते भ्रान्त्या गुणवानिव योऽगुणः ॥ तमात्मरूपिणं देवं नतोऽस्मि पुरुषोत्तमम् । अविकारमजं शुद्धं निर्गुणं य
न्निरञ्जनम् ॥ नतोऽस्मि परमं ब्रह्म विष्णोर्यत्परमं पदम् । अदीर्घह्रस्वमस्थूलमनण्वश्याममलोहितम् ॥ अस्नेहच्छायमतनुमसक्तमशरीरिणम् । अनाकाशमसंस्पर्श
मगन्धमरसं च यत् ॥ अचक्षुःश्रोत्रमचलमवाक्प्राणममानसम् । अनामगोत्रमसुखमतेजस्कमहेतुकम् ॥ अभयं भ्रान्तिरहितमनिद्रमजरामरम् । अर
जोऽशब्दममृतमप्लुतं यदसंवृतम् ॥ एकत्वापरत्वे च यस्मिन्नेव हि विष्णोः परमात्मनः । परमीशित्वगुणवत् सर्व्वभूतमसंश्रयम् ॥ नतोऽस्मि तत्पदं विष्णोर्जिह्वाहृद्दृगम्य
यदनयत् । एवं प्रवदता विष्णुस्तवेनैकेन समाधिना ॥ दशवर्षसहस्राणि तपस्तेपे नृपात्मजः ॥ ततः प्रसन्नो भगवान् ध्रुवमाहर्षिसत्तमैः ॥ देवो दर्शनमूः
न्निर्दर्शनीयालोलनेत्रः पतत्रिराजमारूढमवस्थाप्य प्रवरप्रपतिपदगामिनाम् ॥ किं करिष्यामीति ॥ ततः प्रोवाच भगवान् प्रियमाभाषितं वरः ॥ प्रस
न्नस्ते हरिर्दत्वा वरं यत् समयाचितम् ॥ ततः प्रवर्त्तयन्मे नृपतिः प्रस्तावानः ॥ यथा पितुः समाधिस्थः प्रजानां वृद्धिकारणी ॥ सवादिर्यवसृदत्वा यथाहितस्य
स्व

गवदीत्युक्त्वान्तर्द्धानाजगामामानुषनवनिश्चक्रमुर्जलात्॥ ॥इति श्रीविष्णुपुराणे प्रथमेंशे चतुर्द्दशोध्यायः॥ ॥पराशर उवाच॥ तपश्चरत्सु पृथिवीप्रचे
तस्सु महीरुहाः। अरक्ष्यमाणामावव्रु र्बभूवाथ प्रजाक्षयः॥ नाशकन्मारुतोवातुं वृतंखमभवद्द्रुमैः। दशवर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः॥ तद्दृ
ष्ट्वाजलनिष्क्रान्ताः सर्व्वे क्रुद्धाः प्रचेतसः। मुखेभ्योवायुमग्निं चतेसृजञ्जातमन्यवः॥ उन्मूलानथतान्वृक्षान्कृत्वावायुरशोषयत्। तानग्निरदहद्घो
र स्तत्राभूद्द्रुमसंक्षयः॥ द्रुमक्षयमथोदृष्ट्वा किञ्चिच्छिष्टेषु शाखिषु। उपगम्याब्रवीदेतान्राजासोमःप्रजापतीन्॥ कोपंयच्छतराजानः शृणुध्वं च वचो मम ३३
। सन्धानं वः करिष्यामि सह क्षितिरुहैरहं॥ रत्नभूतावकन्येयं वार्क्षेयी वरवर्ण्णिनी। भविष्यं जानतापूर्व्वं मयागोभि र्व्विवर्द्धिता॥ मारिषानाम नाम्नैषा वृ
क्षाणामिति निर्म्मिता। भार्य्यावोस्तु महाभागा ध्रुवंवंशविवर्द्धिनी॥ युष्माकं तेजसोर्द्धेन मम चार्द्धेन तेजसः। अस्यामुत्पत्स्यते विद्वान्दक्षो नाम प्रजापतिः
॥ ममवांशेन संयुक्तो युष्मत्तेजोमयेन वै। अग्निनाग्निसमो भूयः प्रजाः संवर्द्धयिष्यति॥ कण्डुर्न्नाममुनिः पूर्व्वमासीद्वेदविदांवरः। सुरम्येगोमतीतीरे स
तेपे परमं तपः॥ तत्क्षोभायसुरेन्द्रेण प्रम्लोचाख्या वराप्सराः। प्रयुक्ताक्षोभयामास तमृषिंसाशुचिस्मिता॥ क्षोभितःसतयासार्द्धं वर्षाणामधिकंशतं। अ
तिष्ठन्मन्दरद्रोण्यां विषयासक्तमानसः॥ तांसाप्राहमहाभागं गन्तुमिच्छाम्यहंदिवं। प्रसादसुमुखो ब्रह्मन्ननुज्ञां दातुमर्हसि॥ तयैवमुक्तःसमुनिः तस्यामास
क्तमानसः। दिनानिकतिचिद्भद्रेस्थीयतामित्यभाषत॥ एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः। बुभुजे विषयांस्तन्वी तेनसार्द्धं महात्मना॥ अनुज्ञां देहि
भगवन्व्रजामि त्रिदशालयं। उक्तस्तथेति स पुनः स्थीयतामित्यभाषत॥ पुनर्गते वर्षशते साधिके साशुभानना। यामीत्याह दिवं ब्रह्मन्प्रणयस्मितशोभनं
॥ उक्तस्तथैवं समुनिरुपगुह्यायतेक्षणां। प्राहास्यतां सुभ्रु क्षणं कालं गमिष्यसि॥ तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः। शतद्वयं किञ्चिदूनं वर्षाणा
मन्वतिष्ठत॥ गमनाय महाभागो देवराजनिवेशनं। प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत॥ तांशापभयाद्भीता दाक्षिण्येनवदक्षिणा। प्रोक्ता प्र
णयभङ्गार्त्तिवेदिनी नजहौ मुनिं॥ तया च रमतस्तस्य परमर्षेरहर्न्निशं। नवंनवमभूत्प्रेम मन्मथाविष्टचेतसः॥ एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मु

नि॥ निष्कामसर्वकर्त्ता निगम्यनप्राह सा गुरु॥ श्रुत्वैतत्तया प्राह पवित्रमहः शुभं। संक्षेपात्किं कथयामि क्रियाख्यां पाण्यथारुवन्॥ ततः प्रहस्य मुदि
तात्मा प्राह महामुनिं। किमद्य सर्वधर्मज्ञ पवित्रमहस्तव॥ गतमागतं न जानं विस्मयं कस्य कथ्यते॥ ॥मुनिरुवाच॥ प्रातस्त्वमागता वत्से त्वयी तानामि
दं गुरौ। मया दृष्टा स्विद्यो न प्रविष्टा च ममाश्रमे॥ श्रुत्वैवं वचनं सन्ध्या प्रविष्टा ममपार्श्वे। अवदाम्यहं किमर्थं चिन्त्ययं प्रश्नश्च कथ्यते मम॥ ॥प्रज्ञोवाच
॥प्रत्यूषस्यागता ब्रह्मन्न सत्यं मन्त्रमथ मे॥ ननु यत्तस्य कालस्य गतान्यब्दशतानि॥ ॥सामडवाच॥ ततः सा ध्यात्वा विप्रतापप्रस्थानदृष्टा। कथयति ३१
युक्तं कालं त्वया मम तत् स्मर॥ ॥प्रज्ञोवाच॥ गतानि चान्यकालानि नववर्षशतानि च। मा गम्यत्वमहं तत्त्वे वान्यत्समम तीतानि त्रयी॥ ॥ऋषिरुवाच॥
सत्यं सा नूतनं दृश्यते नूतं प्रविष्टा सा यथा गुरौ। दिनमेकमर्द्धमद्य त्वया सार्द्धमिहाषितं॥ ॥प्रज्ञोवाच॥ वदिष्याम्यनन्तं ब्रह्मन्कथमत्र तवाज्ञिकं। विशेषाद्य
वता दृष्टमार्गमनुवर्त्तिना॥ ॥सामडवाच॥ निगम्यते ध्ववस्था। समुनिर्कम्पनन्दनाः। धिक्धिक् मामिति सा वत्तिनिनिन्दात्मानमात्मना॥ ॥मुनिरुवाच॥ न

पापिमम नष्टानि दृष्टैवत्सा विरोधनी। तथापि वत्स कः कृतापि या पिश्राद्धाय निर्म्मितः॥ उग्रषिर्वचनं निगदे स्वप्नस्वयमात्मजं नमः। गतिर्न वाञ्छमाथ न क्षिकर्म्मकाः मम
सायह। गच्छपाप यथाकामी यत्कार्यं निकृतं त्वया॥ एवमाज्ञप्य मत्स्यो ऽहं कुवन्त्यासाव। चषिनेः। नत्वा कम्पाम्यहं रुसम क्रोधमीशनवञ्जिता॥ सतीसप्रपदं मत्ताम्
षिनाहं त्वया सह। अथवा मन्दवाच. कः किं वाक्प्याहं मनः॥ ममैवदोषानि वना थनारुम मिति हृदयः। यया शक्यप्रियार्थिन्या कृताभतपसाप्ययः॥ त्वया वि
क्षमिता मा ह संरक्षसि सत्रुयुत्सिमि॥ ॥सोमडवाच॥ यावदित्थं सविप्रर्षिः स्त्रीत्ववानित्यमथ्यमी। तावज्जलत्वद्यजला सा वत्स्ववा नि च पथः॥ प्रवपमानास्तन
नं स्विन्नगात्र ललनी सती। गच्छगच्छेति सक्रोधमुवाचमुनिसत्तमः॥ सा तु निर्गत्य सा तत्र निविनिः क्रम्य तदाश्रमात्। आकाशगामिनी स्वेदं ममार्ज्जमनुपल्लवैः॥
हस्ताहस्तीय पावाना देनैषा वृणपल्लवैः निर्म्मार्ज्जमानागमत्राणि गलत्स्वेदजलानि च॥ ॥मषिर्गा यस्य दागर्भस्य तस्याद्भूसमाहितः॥ निर्गमममपवामाङ्गस्वेद
रूपीतयगीनः॥ रविरश्मिभिः गर्भमर्कं वृद्धवमाय तः। मायावायुधिता। गभिः सदा वर्द्धत्यगतेः॥ हस्ता यगर्भे सं हतामा विषाख्या च वानना। नीप्रदाय्य

नियाब्रह्मा४कापन घप्रशस्यमां ॥ कश्यप पश्यमवीसा दक्षस्यथ समुद्गता। ममापत्नीमथावाया४ प्रह्लावामनयावसा॥ सर्वा पितृगवान कश्यु४ ह्मीणमपवि
परूनः। पूर्व्वषाढ्मार्ख्यी मेत्रय विष्णा नायमनेयया॥ नत्रैकाय मनि हत्वा वकनावाधनेहन४। ब्रह्म पावमयीकुर्वन्नूरूपम कायमानस४॥ ऊर्द्ध्ववाहूमहा:
यागी क्रिमाशो रूपनन्दना४॥ ॥ पञ्चमपडुक४॥ ब्रह्मपार्वमून४ श्रोतु मिछामः पञ्चमीस्कवी। ऊपमाकश्ृनादवा यनानाश्चानकशव४॥ ॥सामडवाव॥ पार्व
पर्वविष्णुनपावपाव४पञ्च४पञ्चप४पञ्चमास्मरूपी। सब्रह्म पाव४पञ्चपावरूण४ पव४पवाणामपिपावपाव४॥ सकावर्णकावणसीधिमासि. नस्यापिरूतु ३८
४पनपानरूतु४। कार्थेषु सर्वे परूकर्म्मकर्ह्ल रूपेव णेषेव वनर्थसर्द्ध॥ ब्रह्मप उर्द्ध्वह्म सपर्व्वहला। ब्रह्मप्रजानापतिवश्यमासी। ब्रह्माथयी नियमेरू सवि
घृनपञ्जयाश्चेव स्वितेवसर्गिं॥ ब्रह्मा ह्रत मझ्नि नियी यथशो पूर्व्वषाढ्मम४ मथवा गमदयादाषा४ प्रयान्तुप्रणमेमम॥ कार्य्यणेव वभगस्या४ कथनस्ह्लद
यिव४। श्रुपत्रप्राणिर्यीयू र्व्व मनरहेविपरूमा॥ रूपपत्नीमहा साणमनाष यामासणश हिन४। स्नाना धिनस्क याविष्णु४ प्रारूप्रत्यनागिम४॥ यर्नेवणी ध्वनिशु:

ता मा बप्राहान्तमवा हिंसी॥ ० ॥ सूवाव॥ भगवनू वालवेधया वथजन्मा हमीदृशी। मन्वशान्श्चसमद्भूता विरुलावजगत्पथ॥ रुवन्तु पनयश्च घ्याम
मजन्म निजन्मनि। त्वत्प्रसादात्कथ पुत्र४ प्रजापतिसमा स्तुभ॥ रूपसम्पत्समायुक्ता सर्व्वस्य प्रियदर्शना। श्रुत्वानिषावयावयीत्वप्रसादाद्भक्षम॥ ॥
सामडवाव॥ नयेवमुक्ता दवण्म ऋषीकशडवावमी। प्रणमनप्रमत्काय वनद४ पवभण्वन४॥ ॥ धवडवाव॥ रु विष्यकिमदावीर्य्या अन्यस्मिन्नवजन्मानि।
प्रख्यानादान कर्म्माणि रुवस्या४ प्रमुयादश॥ पुत्रश्चसमहात्मानमनिवीर्यपराक्रमं। प्रजापतिगुणैर्युक्तं त्वमवाप्स्यसि शाहन॥ वंशानांतस्यकर्त्त्वं
जगत्यस्मिन्भविष्यति। त्रैलोक्यमखिलं हति ह्मस्यवापूवयिष्यति॥ त्वश्चपत्या निजासाध्वी रूपौदार्य्यगुणान्विता। मनरूप्राणिकनीन्दूणीं मत्प्रसादाद्भ
विष्यति॥ ३० यच्चान्यद्धदव स्त्री विशाल विस्तारवनी। सावयीमाविषाजामा यूथमन्यत्नीन्नपात्मजा॥ ॥पवाणवडवाव॥ मम४ सामस्यवचनाजगत्कृत्स्न
प्रवनप४। सहस्यका पंदञ्च स्य४ पत्नीधर्म्मेण मानिषी॥ दशस्य सप्रवमा सामा निषायपिप्रजापतिः। ऊझ्लयदा महाराणा। य४ पूर्व्व ब्रह्मणा हरवम॥ स

उदक्षो महाभाग स्रष्टुमर्थञ्च महामनाः। पुत्रानुत्पादयामास प्रजाः स्रष्टुमथात्मनः ॥ अवरांश्च वरांश्चैव द्विपदोथ चतुष्पदः। आदेशं ब्रह्मणः कुर्वन्
सृष्ट्यर्थं समुपस्थितः ॥ स सृष्ट्वा मानसान्दक्षः पश्चादसृजत स्त्रियः। ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे
ताभ्यो देवास्तथा दैत्या नागा गावस्तथा खगाः। गन्धर्वाप्सरसश्चैव दानवाद्याश्च जज्ञिरे ॥ ततः प्रभृति मैथुन्यः प्रजा मैथुनसम्भवाः। संकल्पाद्दर्शनात्
स्पर्शात्पूर्वेषामभवन्प्रजाः ॥ तपोविशेषैः सिद्धानां तदात्यन्ततपस्विनाम् ॥ ॥ मैत्रेय उवाच ॥ अङ्गुष्ठाद्दक्षिणाद्दक्षः पूर्वं जातः श्रुतो मया। कथं प्राचेत ३९
सो भूयः समुत्पन्नो महामुने। एष मे संशयो ब्रह्मन् सुमहान्हृदि वर्त्तते ॥ यद्दौहित्रश्च सोमस्य पुनः श्वशुरतां गतः ॥ ॥ पराशर उवाच ॥ उत्पत्तिश्च
निरोधश्च नित्यौ भूतेषु सत्तम। ऋषयोऽत्र न मुह्यन्ति यच्चान्यद्दिव्यचक्षुषः ॥ युगे युगे भवन्त्येते दक्षाद्या मुनिसत्तम। पुनश्चैवं निरुध्यन्ते विद्वांस्तत्र न मुह्य
ति ॥ कानिष्ठ्यं ज्यैष्ठ्यमप्येषां पूर्वं नाभूद् द्विजोत्तम। तप एव गरीयोऽभूत्प्रभावश्चैव कारणम् ॥ ॥ मैत्रेय उवाच ॥ देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।

उत्पत्तिं विस्तरेणेह मम ब्रह्मन्प्रकीर्त्तय ॥ ॥ पराशर उवाच ॥ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयम्भुवा। यथा ससर्ज भूतानि तथा शृणु महामुने ॥ मानसान्येव भू
तानि पूर्वं दक्षोऽसृजत्तदा। देवानृषीन्सगन्धर्वानसुरान्पन्नगांस्तथा ॥ यदास्य सृजमानस्य न व्यवर्द्धन्त ताः प्रजाः। ततः सञ्चिन्त्य स पुनः सृष्टिहेतोः प्रजापति
ः ॥ मैथुनेनैव धर्मेण सिसृक्षुर्विविधाः प्रजाः। असिक्नीमावहत्कन्यां वीरणस्य प्रजापतेः ॥ सुतां सुतपसा युक्तां महतीं लोकधारिणीम् ॥ अथ पुत्रसहस्राणि वीरि
ण्यां पञ्च वीर्यवान्। असिक्न्यां जनयामास सर्गहेतोः प्रजापतिः ॥ तान्दृष्ट्वा नारदो विप्र संविवर्द्धयिषून्प्रजाः। सङ्गम्य प्रियसंवादो देवर्षिरिदमब्रवीत् ॥
हे हर्यश्वा महावीर्याः प्रजा यूयं करिष्यथ। ईदृशो दृश्यते यत्नो भवतां श्रूयतामिदम् ॥ बालिशा बत यूयं वै नास्या जानीत वै भुवः। अन्तरूर्ध्वमधश्चैव कथं स्रक्ष्यथ वै प्रजाः॥ ऊर्ध्वं
तिर्यगधश्चैव यदाप्रतिहता गतिः। तदा कस्माद्भुवो नान्तं सर्वे द्रक्ष्यथ बालिशाः ॥ ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतो दिशम्। अद्यापि नो निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥ हर्यश्वेष्वथ नष्टेषु दक्षः
प्राचेतसः पुनः। वैरिण्यामथ पुत्राणां सहस्रमसृजत्प्रभुः ॥ विवर्द्धयिषवस्ते तु शबलाश्वाः प्रजाः पुनः ॥ पूर्वोक्तं वचनं ब्रह्मन्नारदेनैव चोदिताः ॥ अन्योन्यमूचु

न्तः सर्व्वे सम्यग्भ्रातरो महामुने ॥ भ्रातॄणां पदवीं चैव गन्तव्या नात्र संशयः । ज्ञात्वा प्रमाणं पृथ्व्याश्च प्रयास्यामस्ततः सुताः ॥ तेपि तेनैव मार्ग्गेण प्रयाताः सर्व्वतो
मुखे । अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः ॥ ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज । प्रयातो नश्यति तथा तन्न कार्य्यं विजानता ॥ तांश्चापि नष्टान्विज्ञाय पु
त्रान्दक्षः प्रजापतिः । क्रोधं चक्रे महाभाग नारदं स शशाप च ॥ सर्ग्गकामस्ततो विद्वान्स मैत्रेय प्रजापतिः । षष्टिं दक्षोसृजत्कन्या वैरिण्यामिति नः श्रुतं ॥ द
दौ स दश धर्म्माय कश्यपाय त्रयोदश । सप्तविंशति सोमाय चतस्रोरिष्टनेमिने ॥ द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा । द्वे कृशाश्वाय विदुषे तासां नामानि ४०
मे शृणु ॥ अरुन्धती वसुर्य्यामी लम्बा भानुर्मरुत्वती । संकल्पा च मुहूर्त्ता च साध्या विश्वा च तादृशी । धर्म्मपत्न्यो दश त्वेतास्तास्वपत्यानि मे शृणु ॥ विश्वेदेवास्तु वि
श्वायाः साध्या साध्यानजायत । मरुत्वत्यां मरुत्वन्तो वसोस्तु वसवः स्मृताः ॥ भानोस्तु भानवस्तद्वन्मुहूर्त्तायां मुहूर्त्तजाः । लम्बायाश्चैव घोषोथ नागवीथी तु जामिः
जा ॥ पृथिवीविषयं सर्व्वमरुन्धत्यां व्यजायत । संकल्पायास्तु सर्व्वात्मा जज्ञे संकल्प एव हि ॥ ये त्वनेकवसुप्राणा देवा ज्योतिःपुरोगमाः । वसवोष्टौ समाख्या

तास्तेषां वक्ष्यामि विस्तरं । आपो ध्रुवश्च सोमश्च धर्म्मश्चैवानिलोनलः ॥ प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः । आपस्य पुत्रो वैतण्ड्यः श्रमः श्रान्तो ध्वनिस्तथा ॥
ध्रुवस्य पुत्रो भगवान्कालो लोकप्रकालनः । सोमस्य भगवान्वर्च्चा वर्च्चस्वी येन जायते ॥ धर्म्मस्य पुत्रो द्रविणो हुतहव्यवहस्तथा । मनोहरायां शिशिरः प्राणोथ र
मणस्तथा ॥ अनिलस्य शिवा भार्य्या यस्याः पुत्रो मनोजवः । अविज्ञातगतिश्चैव द्वौ पुत्रावनलस्य तु ॥ अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत । अग्निपुत्रः
कुमारस्तु शरस्तम्बे व्यजायत ॥ तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः । अपत्यं कृत्तिकानान्तु कार्त्तिकेयः स्मृतस्ततः ॥ प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाथ दे
वलं । द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ॥ बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी । योगसिद्धा जगत्कृत्स्नमसक्ता विचरत्युत ॥ प्रभासस्य तु सा भा
र्य्या वसूनामष्टमस्य च । विश्वकर्म्मा महाभागस्तस्यां जज्ञे प्रजापतिः ॥ कर्त्ता शिल्पसहस्राणां त्रिदशानां च वर्द्धकिः । भूषणानां च सर्व्वेषां कर्त्ता शिल्पवतां वरः
॥ यः सर्व्वेषां विमानानि देवतानां चकार ह । मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ॥ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च वीर्य्यवान् । त्वष्टुश्चाप्यात्मजः पुत्रो

विश्वरूपा महातपाः॥ हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः। वृषाकपिश्च शम्भुश्च कपर्दी रैवतस्तथा॥ मृगव्याधश्च सर्पश्च कपाली च महामुने। एकादशै
ते कथिता रुद्रास्त्रिभुवनेश्वराः। शतं त्वेवं समाम्नातं रुद्राणाममितौजसाम्। अदितिर्दितिर्दनुश्चैव विश्वा सुरसा खशा॥ सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा।
कद्रूर्मुनिश्च धर्मज्ञ तदपत्यानि मे शृणु॥ पूर्वमन्वन्तरे श्रेष्ठा द्वादशासन्सुरोत्तमाः। तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे॥ उपस्थितेऽतियशसश्चाक्षु-
षस्यान्तरे मनोः। समवायीकृताः सर्वे समागम्य परस्परम्॥ आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै। मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति॥ एवमुक्त्वा तु 41
सर्वे वा चाक्षुषस्यान्तरे मनोः। मारीचात्कश्यपाज्जातास्तेऽदित्या दक्षकन्यया। तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि॥ अर्यमा चैव धाता च त्वष्टा पूषा तथैव च। विव-
स्वान्सविता चैव मित्रो वरुण एव च। अंशुर्भगश्चातितेजा आदित्या द्वादश स्मृताः॥ चाक्षुषस्यान्तरे पूर्वमासन्ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या
द्वादश स्मृताः॥ सप्तविंशति याः प्रोक्ताः सोमपत्न्योऽथ सुव्रताः। तासामपत्यान्यभवन्दीप्तिमन्त्यमितौजसः॥ अरिष्टनेमिपत्नीनामपत्यानीह षोडश।

बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृताः॥ प्रत्यङ्गिरसजाः श्रेष्ठा ऋचो ब्रह्मर्षिसत्कृताः। कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः सुताः॥ एते युगसहस्रान्ते जायन्ते पुनरेव
हि। सर्वे देवगणास्तात त्रयस्त्रिंशत्तु छन्दजाः। तेषामपीह सततं निरोधोत्पत्तिरुच्यते॥ यथा सूर्यस्य गगने उदयास्तमयाविह। एवं देवनिकायास्ते सम्भ-
वन्ति युगे युगे॥ दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम्। हिरण्यकशिपुश्चैव हिरण्याक्षस्तथैव च॥ सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः
। हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः॥ अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्यवान्। संह्रादश्च महावीर्या दैत्यवंशविवर्द्धनाः॥ तेषां मध्ये महाभा-
गः सर्वत्र समदृग्वशी। प्रह्लादः परमो भक्तो य इन्द्रेण जनार्दन॥ दैत्येन्द्रदीपितो वह्निः सर्वाङ्गैः पविता द्विज। न ददाह च यं वह्निर्वासुदेवहृदि स्थितम्॥ मह-
र्णवाम्बुसलिले क्षिप्तस्य बद्धस्य महती। चचाल सकला यस्य पाशबद्धस्य धीमतः॥ न शस्त्रैर्विविधैश्छिन्नं यस्य देहश्चक्रपाणिनः। शचीनमभिकाङ्क्षिणी सर्वत्राप्यन-
पत्रपः॥ विषानलाग्निसम्पूर्णा यस्य दैत्यप्रवादिताः। नाक्रामयन्नपत्यावकृतवन्त उरगाः सह॥ लोकेनाक्रान्तदेहोऽपि यस्तं न्यूनतमस्मरत्। तस्यात्मजास्तु सप्रा

णान विष्णुस्मरणदीपितः॥ यस्तु मत्प्रसादेन निर्यम्प्रस्य महामूर्ति। दधार दैत्यपतिर्हि पितृस्वर्गनिवासिना॥ यस्य प्रशेषकायाय दंष्ट्रादैत्येन्द्रयातिभिः॥ अवापसंह
पीस घधिरुहमधुसूदनः॥ विषानलं गीमन्महा मद्दानिर्दिग्गजाः॥ यस्य वक्षःस्थलप्राप्ता दैत्येन्द्रपतिनामिता॥ यस्य वास्त्वादिनामहत्या दैत्यनागपूशादि
तः॥ वह्नवनाकायप्रवासो विन्यासकवचत्वः॥ सम्बरस्य च मायानां सहस्रमतिमायिनः॥ यस्मिन्प्रयुक्तं चक्रेण कृष्णस्य वितथीकृतं॥ दैत्येन्द्रसूदापहार्त्ती
यः प्रह्लादो हली विषं। जरयामास मतिमान् विकारममत्सरी॥ समं वसायो जगत्यस्मिन्यः सर्वेष्वेव जन्तुषु। यथात्मनि तथान्यत्र परं मैत्रगुणान्वितः॥ ध ४२
र्मात्मा सत्यशौचादि गुणानामाकरः परः। उपमानमशेषाणां साधूनां यः सदाभवत्॥ इति श्रीविष्णुपुराणे प्रथमेंशे पञ्चदशोऽध्यायः॥ ॥मै
त्रेय उवाच॥ कथितो भवता वंशो मानवानां महात्मनां। कारणं चास्य जगतो विष्णुरेव सनातनः॥ यत्त्वेतद्भगवानाह प्रह्लादं दैत्यसत्तमं। ददाह नाग्निर्नास्त्रै
श्च क्षुण्णस्तत्याज जीवितं॥ जगाम वसुधा क्षोभं यत्राब्धिसलिलस्थिते। बद्धे विचलति विक्षिप्ताङ्गैः समाहता॥ शैलैराक्रान्तदेहोपि न ममार च यः पु

रा। त्वयातीव महात्म्यः कथितो यस्य धीमतः॥ तस्य प्रभावमतुलं विष्णोर्भक्तिमतो मुने॥ श्रोतुमिच्छामि यस्यैतच्चरितं अमिततेजसः॥ किन्निमित्तमसौ शस्त्रैर्विक्षिप्तो
दितिजैर्मुने॥ किमर्थं चाब्धिसलिले प्रक्षिप्तो धर्मतत्परः॥ आक्रान्तः पर्वतैः कस्मात् दष्टश्चैव महोरगैः॥ क्षिप्तः किमद्रिशिखरात् किम्वा पावकसंचये॥ दिग्ग
जानां दन्तकोटिभिर्नवकन्यानि रूपितः॥ शोषकश्चानिलस्यास्य प्रयुक्तः किं महासुरैः॥ कृत्याश्च दैत्यगुरवो युयुजुस्तत्र किं मुने। शंवरश्चापि मायानां सहस्रं किं
प्रयुक्तवान्॥ हालाहलं विषमहो दैत्यसूदैर्महात्मनः॥ कस्माद्दत्तं विनाशाय यस्य भुक्तं नधीमता। एतत्सर्वं महाभागप्रह्लादस्य महात्मनः॥ चरितं श्रोतु
मिच्छामि महामाहात्म्यसूचकं। न हि कौतूहलं तत्र यद्दैत्यैर्न हतो हि सः॥ अनन्यमनसो विष्णौ कः समर्थो निपातने। तस्मिन्कर्मपरे नित्यं केशवाराधनोद्य
ते॥ स्ववंशप्रभवैर्दैत्यैः कर्तुं द्वेषोतिदुष्करः॥ धर्मात्मनि महाभागे विष्णुभक्ते विमत्सरे॥ दैतेयैः प्रहृतं कस्मात्तन्ममाख्यातुमर्हसि। प्रहरन्ति महात्मानो वि
पक्षा अपि नेदृशे॥ गुणैः समन्विते साधौ किं पुनर्यः स्वपक्षजः॥ तदेतत्कथ्यतां सर्वं विस्तरान्मुनिपुङ्गव। दैत्येन्द्रस्य चरितं श्रोतुमिच्छाम्यशेषतः॥ ॥

॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे प्रह्लादचरिते षोडशोऽध्यायः॥ ॥पराशर उवाच॥ मैत्रेय श्रूयतां सम्यक् चरितं तस्य धीमतः। प्रह्लादस्य सदोदारचरितस्य महात्म
नः॥ दितेः पुत्रो महावीर्यो हिरण्यकशिपुः पुरा। त्रैलोक्यं वशमानिन्ये ब्रह्मणो वरदर्पितः॥ इन्द्रत्वमकरोद्दैत्यः स चासीत्सविता स्वयं। वायुरग्निरपांनाथ
ः सोमश्चाभून्महासुरः॥ धनानामधिपः सोऽभूत्स एवासीत्स्वयं यमः। यज्ञभागानशेषांश्च स स्वयं बुभुजेऽसुरः॥ देवाः स्वर्गं परित्यज्य तत्रासान्मुनिसत्तम। विचेरु
रवनौ सर्वे बिभ्राणा मानुषीं तनुं॥ जित्वा त्रिभुवनं सर्वं त्रैलोक्यैश्वर्यदर्पितः। उद्गीयमानो गन्धर्वैर्बुभुजे विषयान् प्रियान्॥ पानासक्तं महात्मानं ४३
हिरण्यकशिपुं तदा। उपासांचक्रिरे सर्वे सिद्धगन्धर्वपन्नगाः॥ अवादयन् जगुश्चान्ये जयशब्दं तथापरे। दैत्यराजस्य पुरतश्चक्रुः सिद्धा मुदान्विता
ः॥ तत्र प्रनृत्याप्सरसि स्फटिकाभ्रमये सुरः। पपौ पानं मुदा युक्तः प्रासादे सुमनोहरे॥ तस्य पुत्रो महाभागः प्रह्लादो नाम नामतः। पपाठ बालपाठ्या
नि गुरुगेहं गतोऽर्भकः॥ एकदा तु स धर्मात्मा जगाम गुरुणा सह। पानासक्तस्य पुरतः पितुर्दैत्यपतेस्तदा॥ पादप्रणामावनतं तमुत्थाप्य पिता सुतं

हिरण्यकशिपुः प्राह प्रह्लादममितौजसं॥ ॥हिरण्यकशिपुरुवाच॥ पठ्यतां भवता वत्स सारभूतं सुभाषितं। कालेनैतावता यत्ते सदोद्युक्तेन शिक्षितं॥
प्रह्लाद उवाच॥ श्रूयतां तात वक्ष्यामि सारभूतं तवाज्ञया। समाहितमना भूत्वा यन्मे चेतस्यवस्थितं॥ अनादिमध्यान्तमजमवृद्धिक्षयमच्युतं। प्रणतोऽस्म्यन्त
सन्तानं सर्वकारणकारणं॥ ॥पराशर उवाच॥ एतन्निशम्य दैत्येन्द्रः सकोपो रक्तलोचनः। विलोक्य तद्गुरुं प्राह स्फुरिताधरपल्लवः॥ ब्रह्मबन्धो किमेत
त्ते विपक्षस्तुतिसंहितं। असारं ग्राहितो बालो मामवज्ञाय दुर्मते॥ ॥गुरुरुवाच॥ दैत्येश्वर न कोपस्य वशमागन्तुमर्हसि। ममोपदेशजनितं नायं वदति ते
सुतः॥ ॥हिरण्यकशिपुरुवाच॥ अनुशास्तोऽसि केनेदृग्वत्स प्रह्लाद कथ्यतां। मयोपदिष्टं नेत्येष प्रब्रवीति गुरुस्तव॥ ॥प्रह्लाद उवाच॥ शास्ता विष्णुरशे
षस्य जगतो यो हृदि स्थितः। तमृते परमात्मानं तात कः केन शास्यते॥ ॥हिरण्यकशिपुरुवाच॥ कोऽयं विष्णुः सुदुर्बुद्धे यं ब्रवीषि पुनः पुनः। जगतामीश्वर
स्येह पुरतः प्रसभं मम॥ ॥प्रह्लाद उवाच॥ न शब्दगोचरं यस्य योगिध्येयं परं पदं। यतो यश्च स्वयं विश्वं स विष्णुः परमेश्वरः॥ ॥हिरण्यकशिपुरुवाच॥

पत्रमश्वत्थसंछन्नं किमन्यां मय्यवतिष्ठितः। नवस्तु मत्कामा तत्त्वं ब्रवीषि पुनः पुनः॥ ॥प्रह्लाद उवाच॥ नकव लीना ममप्रज्ञानां सर्वस्कन्धो रवत्थ
विष्णुशक्त्या विश्वनाथ पत्रमश्वत्थप्रसीदकोपि कुरुष किमर्थं॥ ॥हिरण्यकशिपुरुवाच॥ प्रविष्टः का स्यहृदयी दुर्बुद्धिनापि पापकृत्। पतन स्थानन्यं
निवर्त्या विष्णुमानसः॥ ॥प्रह्लाद उवाच॥ नकवलीमहृदयीस विष्णुनाक्रम्य लोकानखिलान्सविष्णुः। समीक्षदानीं च पितः समस्तां समस्तं वपुरस्य
न किं पश्यसि॥ ॥हिरण्यकशिपुरुवाच॥ निष्कामय नामयीदृशः सम्यक्तादेश्वरश्वास्त्वा याचितास्मि नित्यकृत न विपक्षविपथस्तु नो॥ ॥पञ्चानन उवाच॥ ४५
कृत्यकास तदाचेष्टे न्नीतागुरुं गुरुः पुनः। उग्रहविद्याम निशं गुरुः शुश्रूषणो घनः॥ एकालं नीतमसकृदभि पक्षादमसर्वश्चवः। समाहूयाब्रवीत्स्थ
काविस्मयककायमी॥ ॥प्रह्लाद उवाच॥ यतः प्रक्षनपन्नुषो यतश्चैकवचनावयी। कावर्णसकलस्यास्य सत्त्वाविष्णुः प्रसीदतु॥ ॥हिरण्यकशिपुरुवाच॥ दृष्टा
त्मा बध्यतामस्य नानेनार्थोस्ति जीवता। स्वपक्षहानिकर्तृत्वाद्यः कुलाङ्गारतां गतः॥ ॥पञ्चानन उवाच॥ इत्याज्ञप्तास्ततस्तेन प्रगृहीत महायुधाः। उग्रः

ता स्कन्धना शाय देय शततसहस्रशः॥ ॥प्रह्लाद उवाच॥ विष्णुः शस्त्रेषु युष्मासु मयि चासौ यथा स्थितः। देनयाक्तनसत्य न नाक्रामन्त्वायुधानि मे॥ ॥पञ्चानन
उवाच॥ ततस्तैः शतशो दैत्यैः शस्त्रौघैराहतोपि सन्। नावाप वेदनामल्पां मभ्रत्वैव पुनर्नवः॥ ॥हिरण्यकशिपुरुवाच॥ दुर्बुद्धे विनिवर्तस्व वैरिपक्षस्तवाद
नः। अभयं ते प्रयच्छामि मा तिमूढमतिर्भव॥ ॥प्रह्लाद उवाच॥ भयं भयानामपहारिणि स्थिते मनस्यनन्ते मम कुत्र तिष्ठति। यस्मिन्स्मृते जन्मजरान्तकादि भ
यानि सर्वाण्यपयान्ति तात॥ ॥हिरण्यकशिपुरुवाच॥ भो भोः सर्पाः दुराचारमेनमत्यन्तदुर्मतिं। विषज्वालाकुलैर्वक्त्रैः सद्यो नयत संक्षयं॥ ॥पञ्चानन
उवाच॥ इत्युक्तास्ते ततः सर्पाः कुहकास्तक्षकादयः। अदंशन्त समस्तेषु गात्रेष्वतिविषोल्बणाः॥ स त्वासक्तमतिः कृष्णे दश्यमानो महोरगैः। न विवेदात्मनो गात्र
न्तत्स्मृत्याह्लादसंस्थितः॥ ॥सर्पा ऊचुः॥ दंष्ट्रा विशीर्णा मणयः स्फुटन्ति फणेषु तापो हृदयेषु कम्पः। नास्य त्वचः स्वल्पमपीह भिन्नं प्रशाधि दैत्येश्वर कार्यमन्यत्॥
॥हिरण्यकशिपुरुवाच॥ हे दिग्गजाः संकटदन्तमिश्रा घ्नतैनमस्मद्रिपुपक्षभिन्नं। तज्जा विनाशाय भवन्ति तस्य यथारणेः प्रज्वलितो हुताशः॥ ततः स दिग्गजैर्बाला:

हृष्टस्त्रुश्चखवसीन्त्रिस्तः। पामितात्रवणीपष्ठ विषालीनवपी डितमासनतस्कस्यले विन्ध्यमिरुदकाः सरुप्रशः। शीर्षविक्रसल्लीप्राप्यस्पाहपितवीतर्दोः॥ दिव्यगङ्गा
नाकुलिशाग्रनिष्ठवाः शीर्णयदत नवलीमभेतन् । महाविपत्यामविनाशनार्यगनाद्दनानूस्मवसमनूरावः॥ ॥हिरण्यकशिपूरवाच॥ काल्यनामसर्वावह्नि
नूपसर्पतदिग्गजाभवायाः समथयायिर्विदधनामषपापकृत् ॥ ॥पवनशवडवाच॥ महाकाष्ठवयस्कन्धमसूसकन्द्रमूर्तनतः। प्रज्ञाल्यपानवाक्यागित्यदद्दूःत्वा
मिन्नाद्वितः॥ ॥प्रह्लादउवाच॥ नानेषवद्धिःपवन विनापि नमीद्रुह्यत्रसमस्तनाहं। पश्यामिपश्यास्त्रवणास्ववतानि शीतानिसर्वाणि दिशांमुखानि॥ अथदैत्ये
श्वरीप्राक्तुर्गगवस्यात्मजाद्धिताः। प्रनाद्धितामहात्मानःशाम्नासीत्सूसर्वानिनः॥ नाऊन्निशम्यनीकापा वालत्रकनयनिरु । कापदवनिकायसूननूतसरुल्लायत
॥ तथ्यतत्वेनीवालीनस्रुरूविष्यामहवरी । यथाविपदोनागायविनीतस्करविष्यतिः॥ वालत्वसर्वदोषाणांदेयनागास्यदियतः। तनात्रक्षापमहात्वंयाकुमर्ह:
सिनार्हक॥ नस्यस्त्नामिदवःपक्तमस्माकंवदनायदि। तताःहत्यी विधायास्यकविद्याभयनिवर्तिनों॥ ॥पवनशवडवाच॥ त्रकमस्यपितास्कृत्सवाऊःपवा। ४३
दे।

नि
हितः। दैत्यैर्धिःमयामासपूर्वीपावकसंश्वयान्॥ ततागुरुनगृहवालःसवसन्वालदानवान् । अध्यापयामासमूहरूनपद्मशान्तरगुवाः॥ अयताप्रवमात्मभदे
नयादितितासुताः। नवान्यथेतन्मनकथं नात्रसाराहिकारणं॥ ऊन्मवात्यीततःसर्वागिह्यःप्राप्नोतियौवने। अथवालेवरवनितृतानादिवसंतवाः॥ ततः
धर्मस्यमस्यतिजन्तुर्दिस्यम्थवात्मजाः॥ प्रत्यकृदेश्वमवेतपुस्माकीरवकान्कथम । ततस्त्ववपनऊन्महकस्यगतवनाथम॥ आगमापितथसर्वनापापदानीविनाहव
:गर्कवापादियावत्पुनर्जन्मापपार्हंनी। समस्कवरकर्तावद्धःखमवावगम्यती। ऋत्तुष्णपसमन्कावस्थाताम्वपसमीसूखं॥ मन्यतेवालवुद्धिकादुःखमवद्दि
तत्पनः। अस्यक स्कि मिकार्गीनीयायामनसुरवेविणां । आकिहानावकाद्धाणां प्रहावापिसुखायत॥ कशवीवमलेपाणां श्लेष्मादीनामलावयः। कशांकिंतासो
नयकमनीयादयागुणाः॥ मांसासृक्पूयविन्मूत्रस्नायुमज्ज्ञास्थिसंहतौ। देहेवस्त्रीतिमान्मूढा रुविनानतकपिसः॥ अन्येःसीतननीयस्यरूपालकास्यवहू
प्ना। क्रियतसुरवकर्तीतद्विताममस्यवततो। कवाप्यतिरुदेयसतायावन्मात्रीपनियहं॥ तावन्मात्रीसनवास्यदुःखंवकाचिमितऊतिः। यावतःकुरुतेजन्तुः
श्य।

सम्यक्श्रान्तमनसः प्रियान् ॥ तावत्कास्यनिषेव्यस्य हृदयं शोकसंकटः । यद्यदृच्छन्तमनपि यत्र तत्रावतिष्ठतः ॥ नागदारापशवश्चात्रकस्यास्यैवातिष्ठति । जन्मन्यत्र महद्
दुःखं म्रियमाणस्य वा मितम् ॥ यातनास्वयमस्याग्रे गर्भसंक्रमणेषु वा । गर्भे पि सुखलेशो पि भवद्भिरनुमीयते ॥ यदि तत्कथ्यतामेवं सर्वदुःखमयं जगत ॥ त
देवमतिदुःखानामास्पदेत्र भवार्णवे ॥ एवं तावत्कथ्यतेस्मि विष्णुः कष्टपारायणं । मातानीतवयी वालादरुषदरूषं शान्यतः ॥ जरायौवनजन्माद्या धर्मा देह
स्य नात्मनः ॥ बालोहं तावदिच्छातो यतिष्ये श्रेयसे युवा । युवाहं वार्द्धके प्राप्ते करिष्याम्यात्मनो हितं ॥ वृद्धोहं मम कार्याणि समस्तानि न गोचरे । किं करिष्या 46
मि मन्दात्मा समर्थेन न यत्कृतं ॥ एवं दुराशया क्षिप्तमानसः पुरुषः सदा । श्रेयसो विमुखो याति न कदाचित् पिपासितः ॥ बाल्ये क्रीडनकासक्ता यौवने विषयो
न्मुखाः । अज्ञा नयन्त्यशक्त्या च वार्द्धकं समुपस्थितं ॥ तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदा । बाल्ययौवनवृद्धाद्यैर्देहभावैरसंयुतः ॥ तदेतद्वो मयाख्या
तं यदज्ञानीतनानृकं । तदस्मस्नाग्य विष्णुः समर्थनीवधर्मकिदः ॥ आयासस्मरणे कस्य स्मृतिर्यस्य न जायते । पापक्षयश्च भवति स्मरतां तमहर्निशं । सर्वभू



तस्थितमस्मिन्नमितिर्माप्रादिवानिशं । एवमीशयतामेवं सर्वक्लेशानप्रहास्यथ ॥ त्रयं नाशितुं यथामयस्विसीदगत । तदालम्ब्य प्रपूजनाय द्वयी प्राह्लः कथा तिक
शास्त्र यस्त्रानि रूपानि हीनशक्तिवर्जितमपर्व । मर्दितस्थापि कुर्वन्ति तानि निर्द्वेषकलीपर्व ॥ मर्दितस्थापि कुर्वन्ति तानि निर्ध्वस्तलीयतः । वृद्धवेनापि रूपानि निष्पर्षकुर्वन्ति वर्ल
तः ॥ ब्यानितानि माहेन व्यापानी तिमणीघिनां । जगति चन्द्रमौदेस्या विकल्पः कचिन्ता मया ॥ कृत्वाश्यूपागमीतसीकृपक्ष्यू यतामिमः विस्तारः सर्वरूपस्य
विष्णोर्विश्वमिदं स्वमिदं जगत् । द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥ समन्तस्यात्मनेतावियस्मास्पूर्यं यथावयी । तथायवर्त्तकविष्णामा यथा प्राप्स्यामनिर्वृ
तिं । यानाग्निनानवार्केण नेन्दुना नेव वायुना ॥ पर्जन्यवरुणाभ्यां वा न सिद्धैर्न च राक्षसैः । न यक्षैर्न च दैत्येन्द्रैर्नोरगैर्न च किन्नरैः ॥ नमनस्थैर्न पशुभिर्दोषैर्न
वात्मसमुद्भवैः । ज्वराक्षिरोगातिसारप्लीहगुल्मादिकैस्तथा ॥ द्वेषेर्ष्यामत्सराद्यैर्वा रागलोभादिभिः क्षयं । न चान्यैर्नीयते कश्चिन्नित्यायास्य कनिर्मला ॥ ख तामा
प्राप्य मलिन्यस्यकेशवस्यरूपेनतः । असारसंसारविवर्त्तनाय मायाम तोपि प्रमरे ब्रवीमि ॥ सर्व्वत्र दैत्याः समतामुपेत समत्वमाराधनमच्युतस्य । अस्मिन्प्र

सत्रक्लिमिज्ञस्य तस्थौ धर्म्मार्थकामेन लभस्य कास्य। दमाग्निनावध्य तवावन्तक त्रिःसीयसी प्राप्स्यथ वेमहाफली॥ इति श्री विष्णुपुराणे प्रथमांशे सप्तदशो
ध्यायः॥ ॥पराशर उवाच॥ तस्यैवं दानवाश्चेष्टां दृष्ट्वा दैत्यपतेर्भयात्। आचचक्षुः स चोवाच सूदानाहूय सत्वरः॥ ॥हिरण्यकशिपुरुवाच॥ हे सूदा मम पु
त्रोसावन्येषामपि दुर्मतिः। कुमार्गदेशको दुष्टो हन्यतामविलम्बितं॥ हालाहलं विषं तस्य सर्वभक्षेषु दीयतां। अविज्ञातमसौ पापो वध्यतां मा विचार्यतां॥
पराशर उवाच॥ ततस्ते तथैव प्रह्लादाय महात्मने। विषदानं यथाज्ञप्तं पित्रा तस्य महात्मनः॥ हालाहलं विषं घोरमनन्तोच्चारणेन सः। अभिमन्त्र्य सहान्ने ४९
न मैत्रेय बुभुजे तदा॥ अविकारं स तद्भुक्त्वा प्रह्लादः स्वस्थमानसः। अनन्तख्यातिनिर्वीर्यं जरयामास तद्विषं। ततः सूदा भयत्रस्ता जीर्णं दृष्ट्वा महद्वि
षं। दैत्येश्वरमुपागम्य प्रणिपत्य इदमब्रुवन्॥ दैत्यराज विषं दत्तमस्माभिरतिभीषणं। जीर्णं तेन सहान्नेन प्रह्लादेन सुतेन ते॥ ॥हिरण्यकशिपुरुवाच॥ त्व
र्यतां त्वर्यतां हे दैत्या दैत्यपुरोहिताः। कृत्यां तस्य विनाशाय उत्पादयत मा चिरं॥ ॥पराशर उवाच॥ सकाशमागम्य ततः प्रह्लादस्य पुरोहिताः। सामपूर्वम



थोचुस्ते प्रह्लादं विनयान्वितं॥ ॥पुरोहिता ऊचुः॥ जातस्त्रैलोक्यविख्यात आयुष्मन् ब्रह्मणः कुले। दैत्यराजस्य तनयो हिरण्यकशिपोर्भवान्॥ किं देवैः किमनन्तेन कि
मन्येन तवाश्रयः। पिता ते सर्वलोकानां त्वं तथैव भविष्यसि। तस्मात्परित्यजैनां त्वं विपक्षस्तवसंहितां॥ श्लाघ्यः पिता समस्तानां गुरूणां परमो गुरुः॥ ॥प्रह्लाद उवाच
॥ एवमेतन्महाभागाः श्लाघ्यमेतन्महाकुलं। मरीचेः सकलेप्यस्मिं त्रैलोक्ये नान्यथा वदेत्॥ पिता च मम सर्वस्मिं जगत्युत्कृष्टचेष्टितः। एतदप्यवगच्छामि सत्यमत्रापि नान्
तं॥ गुरूणामपि सर्वेषां पिता परमको गुरुः। यदुक्तं भ्रान्तिस्तत्रापि स्वल्पापि हि न विद्यते॥ पिता गुरुर्न संदेहः पूजनीयः प्रयत्नतः। तत्रापि नापराध्यामीत्येवं मन
सि मे स्थितं॥ यच्चैतत् किमनन्तेनेत्युक्तं युष्माभिरीदृशं। को ब्रवीति यथान्याय्यं किन्तु नैतद्वचोर्थवत्॥ इत्युक्त्वा सोभवन्मौनी तेषां गौरवयन्त्रितः। प्रहस्य च पुनः प्राह
किमनन्तेन साध्विति॥ साधु भोः किमनन्तेन साधु भो गुरवो मम। श्रूयतां यदनन्तेन यदि खेदं न यास्यथ॥ धर्म्मार्थकाममोक्षाख्यः पुरुषार्थ उदाहृतः। चतुष्टयमिदं यस्मा
त्तस्मात्किमिदं वृथा॥ मरीचिमिश्रैर्दक्षेण तथैवान्यैरनन्ततः। धर्म्मः प्राप्तस्तथैवान्यैरर्थः कामस्तथा परैः॥ तत्तत्त्ववेदिनो भूत्वा ज्ञानध्यानसमाधिभिः। अवापुर्मुक्ति

मपरं पुरुषाध्यक्षं वन्दे न॥ सम्पद्यैश्वर्य्यमाहात्म्यज्ञानसन्ततिकर्म्मणी। विमुक्तिश्चैकतो लभ्या मूलमाराधनं हरेः॥ यतो धर्मार्थकामाख्यं मुक्तिश्चापि फलं द्विजाः।
तेनापि किं किमन्यैश्च वमनन्तेन किं सखा॥ किं वा प्रवक्तुनाक्तेन एवं गुरुर्वा मम। एवं किं साधुवासाधु विवेकास्माकमल्पकः॥ ० ॥ पुरोहिता ऊचुः॥ दह्यमानस्त्वम
स्माभिरग्निना बाल रक्षितः। भूयो नैवं वदिष्यसि नैवं ज्ञातो ह्यबुद्धिमान्॥ यद्यस्मद्वचनान्मोहग्राहं न त्यक्ष्यते भवान्। ततः कृत्यां विनाशाय तव स्रक्ष्याम दुर्म्मते॥ ॥
प्रह्लाद उवाच॥ कः केन हन्यते जन्तुर्जन्तुः कः केन रक्ष्यते। हन्ति रक्षति चैवात्मा ह्यसत्साधु समाचरन्॥ ० ॥ पराशर उवाच॥ इत्युक्तास्तेन ते क्रुद्धा दैत्यराजपुरोहि ४८
ताः। कृत्यामुत्पादयामासुर्ज्वालामालोज्ज्वलाकृतिम्॥ अतिभीमा समागम्य पादन्यासक्षतक्षितिः। शूलेन साधु संक्रुद्धा तं जघानाशु वक्षसि॥ तत्तस्य हृदयं प्राप्य शूलं
बालस्य दीप्तिमत्। जगाम खण्डितं भूमौ तत्रापि शतधा गतम्॥ यत्रानपायी भगवान् हृद्यास्ते हरिरीश्वरः। भङ्गो भवति वज्रस्य तत्र शूलस्य का कथा॥ अपापे तत्र पापैश्च पा
तिता दैत्ययाजकैः। तानेव सा जघानाशु कृत्या नाशं जगाम च॥ कृत्यया दह्यमानांस्तान् विलोक्य स महामतिः। हा कृष्णानन्तेति वदन्नभ्युपपद्यत॥ सर्वव्यापिन् ज
मतिः।

गद्रूप जगत्स्रष्टर्जनार्दन। त्राहि विप्रानिमानस्माद्दुःसहान्मन्त्रपावकात्॥ यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः। विष्णुरेव तथा सर्वे जीवन्त्वेते पुरोहिताः॥ यथा सर्वगतं
विष्णुं मन्यमानोऽनपायिनम्। चिन्तयाम्यरिपक्षेऽपि जीवन्त्वेते पुरोहिताः॥ ये हन्तुमागता दत्तं यैर्विषं यैर्हुताशनः। यैर्दिग्गजैरहं क्षुण्णो दष्टः सर्पैश्च यैरपि॥ तेष्वहं मित्रभावेन
समः पापोऽस्मि न क्वचित्। यथा तेनाद्य सत्येन जीवन्त्वसुरयाजकाः॥ ॥ पराशर उवाच॥ इत्युक्तास्तेन ते सर्वे संस्पृष्टाश्च निरामयाः। समुत्तस्थुर्द्विजा भूयस्तमूचुः
प्रश्रयान्वितम्॥ ॥ पुरोहिता ऊचुः॥ दीर्घायुरप्रतिहतो बलवीर्यसमन्वितः। पुत्रपौत्रधनैश्वर्यैर्युक्तो वत्स भवोत्तम॥ इत्युक्त्वा तं ततो गत्वा यथावृत्तं पुरोहिताः। दैत्यरा
जाय सकलमाचचख्युर्महामुने॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे अष्टादशोऽध्यायः॥ ॥ पराशर उवाच॥ हिरण्यकशिपुः श्रुत्वा तां कृत्यां वितथीकृताम्। आहूय पुत्रं पप्र
च्छ प्रभावस्यास्य कारणम्॥ ॥ हिरण्यकशिपुरुवाच॥ प्रह्लाद सुप्रभावोऽसि किमेतत्ते विचेष्टितम्। एतन्मन्त्रादिजनितमुताहो सहजं तव॥ ॥ पराशर उवाच॥ एवं पृ
ष्टस्तदा पित्रा प्रह्लादोऽसुरबालकः। प्रणिपत्य पितुः पादाविदं वचनमब्रवीत्॥ न मन्त्रादिकृतस्तात न च नैसर्गिको मम। प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि॥

अध्यषीया न पापानि विक्रयत्यात्मनाय था। तस्य पापागमस्तात दुष्टुत्वान्न विद्यते ॥ कर्मणा मनसा वाचा वाक्ये पर पीडीकरा मितः। तद्बीजं जन्म फलति प्रभूतं तस्य चा-
शुभं ॥ सोऽहं न पापमिच्छामि केनेथा गिवदामि वा। चिन्तयन्सर्वभूतस्थमवाप्यसि च केशवं ॥ शारीरं मानसं दुःखं दैवं भूतभवं तथा। सर्वत्र शुभचित्तस्य तस्य मे जाय-
ते कुतः ॥ एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी। कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिं ॥ ॥पराशर उवाच॥ इति श्रुत्वा स दैत्येन्द्रः प्रासादशिखरे स्थितः। क्रोधा-
न्धकारितमुखः प्राह दैतेयकिंकरान् ॥ दुरात्मा क्षिप्यतामस्मात्प्रासादाच्छतयोजनात् । गिरिपृष्ठे पतत्वस्मिन् शिलाभिन्नाङ्गसंहतिः ॥ ततस्तं चिक्षिपुः सर्वे बाला- ४९
दैतेयकिंकराः। पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन्हरिं ॥ पतमानं जगद्धात्री जगद्धातरि केशवे। भक्तियुक्तं दधारैनमुपसंगम्य मेदिनी। ततो विलोक्य तं स्वस्थ-
मविशीर्णास्थिपञ्जरं। हिरण्यकशिपुः प्राह शम्बरं मायिनां वरं ॥ नास्माभिः शक्यते हन्तुमसौ दुर्बुद्धिबालकः। मायां वेत्ति ततस्त्वं हि मायया एनं निषूदय ॥ ॥
शम्बर उवाच ॥ सूदयाम्येष दैत्येन्द्र पश्य मायाबलं मम। सहस्रमत्र मायानां पश्य कोटिशतं तथा ॥ ॥पराशर उवाच॥ ततः स ससृजे मायां प्रह्लादे शम्बरोऽसुरः

नि१ द्वि२

विनाशमिच्छन्दुर्बुद्धिः सर्वत्र समदर्शिनः ॥ समाहितमना भूत्वा सर्वथापि विमत्सरः। मैत्रेय सोऽपि प्रह्लादः सस्मार मधुसूदनं ॥ ततो भगवता तस्य रक्षार्थं चक्रमुत्तमं
। आजगाम समाज्ञप्तं ज्वालामालि सुदर्शनं ॥ तेन मायासहस्रं तत् शम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैकस्य निराकृतं ॥ संशोषकं तथा वायुं दैत्येन्द्रस्त्विदम-
ब्रवीत्। शीघ्रमेष ममादेशाद्दुरात्मा नीयतां क्षयं ॥ तथेत्युक्त्वा तु सोऽप्येनं विवेश पवनो लघुः। शीतोऽतिरूक्षः शोषाय तद्देहस्यातिदुःसहः ॥ तेनाविष्टमथात्मानं स
बुद्ध्वा दैत्यबालकः। हृदयेन महात्मानं दधार धरणीधरं ॥ हृदयस्थस्ततस्तस्य तं वायुमतिभीषणं। पपौ जनार्दनः क्रुद्धः स ययौ पवनः क्षयं ॥ क्षीणासु सर्वमायासु
पवने च क्षयं गते। जगाम सोऽपि भवनं गुरोरेव महामतिः ॥ अहन्यहन्यथाचार्यो नीतिं राज्यफलप्रदां। ग्राहयामास तं बालं राज्ञामुशनसा कृतां ॥ गृहीतनीति-
शास्त्रं तं विनीतं स यदा गुरुः। मेने तदैनं तत्पित्रे कथयामास शिक्षितं ॥ ॥आचार्य उवाच॥ गृहीतनीतिशास्त्रस्ते पुत्रो दैत्यपते कृतः। प्रह्लादस्तत्त्वतो वेत्ति भार्ग-
व नयदीरितं ॥ ॥हिरण्यकशिपुरुवाच॥ मित्रेषु वर्तेत कथमरिवर्गेषु भूपतिः। प्रह्लाद त्रिषु लोकेषु मध्यस्थेषु कथं चरेत् ॥ कथं मन्त्रिष्वमात्येषु बाह्येष्वाभ्यन्त-

सुवावत्सपोत्रवर्गेषु शंकिमासिसतत्वषय ॥ करुणाकृत्या विधानेनैव दुर्भटविकसाधनी । प्रज्ञादकथनीसम्यक् तथा कर्णकशोधनी । एतत्त्वान्यत्र सकलं मधीमहि व
नायधा । तथाप्तकथनीशान्तिं नववक्तामिमनागती ॥ ॥पञ्चमं कण्डवाव ॥ प्रणिपत्य ततःपादौ पितुःप्रश्रयरूपेण । प्रज्ञादस्त्राद्देवेन्द्रं कृताञ्जलिपुटः स्थितः ॥ ॥
प्रज्ञाय उवाच ॥ समापादि सकलं गुरूणां नात्र संशयः । गृहीतं च मया किन्तु न सदनं न्यमे मम ॥ सामदानप्रदानं संहृदयं तथापि च । उपायं कथितां च ग
मित्रादीनां च साधनं ॥ नानवादं न पश्यामि मित्रादीनां तमाकुधं । साध्यासावमदावाहा साधनं किं प्रयागती ॥ सर्वकृतात्मकं नाम तनात्यज्ञानमथ । पवमा ३०
सनिगमविन्दमित्रामित्रकथाकृतः ॥ त्वय्यात्किरुगवान् विष्णु मयिवान्वतवा स्थितः । यतस्तु नायं मित्रं मे तच्चाप्यतिपथकं कृतं ॥ गदैवलमत्यर्थं दूरस्था नीरा कि
विरूपे च विद्यान्तर्गनिर्यतः कर्तव्यं स्वाम्येन ॥ विद्यावद्धितविद्याया मलनातामनायत । वासानिकिन्नवद्यमम्पवम्बवमन्यम ॥ मत्तमर्त्यनवद्वाय ।
सा विद्याया विमुक्तय । आयासायापर्वकर्म विद्यान्या लत्लानेपूनी ॥ तदनदवगम्यात्समासावसाध्यमरूनी । निशामयमहाराग प्राणिपत्यखवी मियत ॥ नविक्रय

निकायार्थ क्राधनेनाति वीवुन्ति । तथापि राव्यमवेगान् दूरत्यप्राप्यमानवे ॥ सर्वपवमहाराग महत्वीपतिसाध्यमः तथापि पृसी राज्यमिनायमास्मीकृतवः ॥
ऊतानामविवकानी मन्त्रवाणामपिप्रस्ता । राज्यराज्यनिवार्थानि सीयनीतिमनामपि ॥ तस्मात्वगतपूर्व्वश्चयश्चुतमरुतामिन्द्रियौ । यतितव्यं समस्त्वापि निर्वाणम
पियक्तत ॥ एवाम नष्ट्याः पशवः पद्विवदसवास्रपाः । नूपमनयतःस्य विश्वस्तिन्नमिवस्थितौ ॥ एतद्विज्ञानतासर्वज्ञगतरूपवतूगमी । प्रसत्यमात्मवद्विष्णु र्यता
यीविश्वसूपचूपधक ॥ एवंज्ञानमहत्वाननादिः पवमश्ववः । प्रसादस्य च महसिन्वसन्नक्षशसदयः ॥ ॥पष्ठंकण्डवाव ॥ नतकृत्वा तुकापेन समुत्कापवमासन
कृ । हितस्थकशिपुः पूर्वं पदावदस्य नाभ्यम् ॥ इवावसवकापन सामर्षः प्रज्वलन्निव । तिः पिष्यपाणि नापानिं हुलुका मातगयथा ॥ दुविप्रविलरुनाहाहव
नसमहाद्विवानागपालो दृष्टर्बुद्धादिपयतामा विलाञ्छामी ॥ अन्यथा सकलालोकस्मधर्मदेशयमयानवाः । अनन्त्यौ सकिमूर्तस्य मगमस्य दूवास्मनः । वदूल्म
वाविना स्मारितवया पापस्य थापपः । कृत्वा तिदूष्टानां विधः वापकामकः ॥ ॥पञ्चमंकण्डवाव ॥ ततस्कासत्वनोयित्या वज्ञातिनागवस्थने । हर्दर्वाह्नीपूरस्कः ।

गुणि

२८

ददृशुश्चित्रवक्तासिद्धः नस्यायामि वन्दवियो। तृष्टि गीहृग कक्कडुः पालेलं वनमथा नृत्तेः। हाटिक वन्ध खल स्वभ खेताय्दहना। उक्त। लावनदामे नक्त्रा। लि
र लीनिना ग लो स्वा भेल ठं त्या मि [illegible] लिगस्ते स्नन नि त्रिभू। उवनूक मुदे सनस्त्र क्षो वा विगम स्त्रियः ॥ ग

य विचिक्षिपुः सलिलार्णवे ॥ ततश्चचाल चलता प्रह्लादेन महार्णवः ॥ उद्वेलोऽभूत्परं क्षोभमुपेत्य च समन्ततः ॥ भूर्लोकमखिलं दृष्ट्वा प्लाव्यमानं महाम्भसा । हिरण्य
कशिपुर्दैत्यानिदमाह महामते ॥ दैतेयाः सकलैः शैलैरत्रैव वरुणालये । निश्छिद्रैः सर्व्वतः सर्व्वैश्चीयतामेष दुर्म्मतिः ॥ नाग्निर्दहति नैवायं शस्त्रैश्छिन्नो न चोरगैः
। क्षयं नीतो न वातेन न विषेण न कृत्यया ॥ न मायाभिर्न्न चैवोच्चात्पातितो न च दिग्गजैः । बालोऽतिदुष्टचित्तोऽयं नानेनार्थोऽस्ति जीवता । तदेष तोयमध्ये तु समाक्रा
न्तो महीधरैः ॥ तिष्ठत्वब्दसहस्रान्तं प्राणान्हास्यति दुर्म्मतिः ॥ ततो दैत्या दानवाश्च पर्व्वतैस्तं महोदधौ । आक्रम्य चयनं चक्रुर्योजनानि सहस्रशः ॥ स चितः सर्व्वतेनन्तः स ३।
मुद्रस्य महामतिः । तुष्टावाह्निकवेलायामेकाग्रमतिरच्युतं ॥ ॥प्रह्लाद उवाच ॥ नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम । नमस्ते सर्व्वलोकात्मन् नमस्ते तिग्मचक्रिणे
॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते नमः । रुद्ररूपाय कल्पान्ते नमस्तुभ्यं
त्रिमूर्त्तये ॥ देवा यक्षासुराः सिद्धा नागा गन्धर्व्वकिन्नराः । पिशाचा राक्षसाश्चैव मनुष्याः पशवस्तथा ॥ पक्षिणः स्थावराश्चैव पिपीलिकसरीसृपाः । भूम्यापोऽग्निर्न

भो वायुः शब्दः स्पर्शस्तथा रसः ॥ रूपं गन्धो मनो बुद्धिरात्मा कालस्तथा गुणाः । एतेषां परमार्थश्च सर्व्वमेतत्त्वमच्युत ॥ विद्याविद्ये भवान्सत्यमसत्यं विषामृते । प्रवृ
त्तञ्च निवृत्तञ्च कर्म्म वेदोदितं भवान् ॥ समस्तकर्म्मभोक्ता च कर्म्मोपकरणानि च । त्वमेव विष्णो सर्व्वाणि सर्व्वकर्म्मफलञ्च यत् ॥ मय्यन्यत्र तथान्येषु भूतेषु भुवने
षु च । तवैव व्याप्तिरैश्वर्यगुणसंसूचिका प्रभो ॥ त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च याजिनः । हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥ रूपं महत्ते स्थितमत्र
विश्वं ततश्च सूक्ष्मं जगदेतदीश । रूपाणि सूक्ष्माणि च भूतभेदास्तेष्वन्तरात्माख्यमतीव सूक्ष्मं ॥ तस्माच्च सूक्ष्मादिविशेषणानामगोचरे यत्परमात्मरूपं । कि
मप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय ॥ सर्व्वभूतेषु सर्व्वात्मन्या शक्तिरपरा तव । गुणाश्रया नमस्तस्यै शाश्वतायै सुरेश्वर ॥ यातीतगोचरा वा
चां मनसाञ्चाविशेषणा । ज्ञानिज्ञानपरिच्छेद्या तां वन्दे स्वेश्वरीं परां ॥ ॐ नमो वासुदेवाय तस्मै भगवते सदा । व्यतिरिक्तं न यस्यास्ति व्यतिरिक्तोऽखिलस्य यः ॥ न
मस्तस्मै नमस्तस्मै नमस्तस्मै महात्मने । नाम रूपं न यस्यैको योऽस्तित्वेनोपलभ्यते ॥ यस्यावताररूपाणि समर्च्चन्ति दिवौकसः । अपश्यन्तः परं रूपं नमस्

स्थैपरमात्मने॥ यत्किञ्चिन्नगोचरस्य पश्यतीशः उस्रोत्तरं। तं सर्व्वसाक्षिणं विष्णुं नमस्ये परमेश्वरं॥ नमोस्तु विष्णवे तस्मै यस्याभिन्नमिदं जगत्। ध्येयस्स जगतामा-
द्यः स प्रसीदतु मेव्ययः॥ यत्रोतमेतत्प्रोतञ्च विश्वमक्षयमव्ययं। आधारस्सर्व्वभूतानां स प्रसीदतु मे हरिः॥ नमोस्तु विष्णवे तस्मै नमस्तस्मै पुनः पुनः। यत्र
सर्व्वं यतः सर्व्वं यः सर्व्वं सर्व्वसंश्रयः। सर्व्वगत्वादनन्तस्य स एवाहमवस्थितः॥ मत्तः सर्व्वमहं सर्व्वं मयि सर्व्वं सनातने। अहमेवाक्षयो नित्यः परमात्मात्मसं-
श्रयः॥ ब्रह्मसंज्ञोहमेवाग्रे तथान्ते च परः पुमान्॥ इति श्रीविष्णुपुराणे प्रथमेंशे प्रह्लादचरिते एकोनविंशोध्यायः॥ ॥पराशर उवाच॥ एवं संचिन्तयन्वि- ३२
ष्णुमभेदेनात्मनो द्विज। तन्मयत्वमवापाग्र्यं मेने चात्मानमच्युतं॥ विस्मृत्य च तथात्मानं नान्यत्किञ्चिदजानत। अहमेवाव्ययोनन्तः परमात्मेत्यचिन्त-
यत्। तस्य तद्भावनायोगात्क्षीणपापस्य वै क्रमात्॥ शुद्धेन्तःकरणे विष्णुस्तस्थौ ज्ञानमयोच्युतः॥ योगप्रभावात्प्रह्लादे जाते विष्णुमयेसुरे॥ चलत्युरगब-
न्धैस्तैर्मैत्रेय त्रुटितं क्षणात्। भ्रान्तग्राहगणः सोर्म्मिर्ययौ क्षोभं महार्णवः॥ चचाल च मही सर्व्वा सशैलवनकानना। स च तं शैलसंघातं दैत्यैर्न्यस्तमथोप-
नरवे ईजसमप्रहेः। मं कमार्थमात्मानं सर्व्वतः पर्य्यवेक्षितः॥

रि॥ प्रक्षिप्य सलिलात्तस्मान्निश्चक्राम महामतिः। दृष्ट्वा च स जगद्भूयो गगनाद्युपलक्षणं॥ प्रह्लादोस्मीति सस्मार पुनरात्मानमात्मना। तुष्टाव च पुनर्धीमाननादिं पुरु-
षोत्तमं॥ एकाग्रमतिरव्यग्रो यतवाक्कायमानसः॥ ॥प्रह्लाद उवाच॥ ओं नमः परमार्थार्थ स्थूलसूक्ष्म क्षराक्षर। व्यक्ताव्यक्त कलातीत सकलेश निरञ्ज-
न। गुणाञ्जन गुणाधार निर्गुणात्मन्गुणस्थित॥ मूर्त्तामूर्त्त महामूर्त्ते सूक्ष्ममूर्त्ते स्फुटास्फुट। करालसौम्यरूपात्मन् विद्याविद्यामयाच्युत॥ सदसद्रूपसद्भा-
व सदसद्भावभावन। नित्यानित्यप्रपञ्चात्मन् निष्प्रपञ्चामलाश्रित॥ एकानेक नमस्तुभ्यं वासुदेवादिकारण। यः स्थूलसूक्ष्मः प्रकटप्रकाशः। यः सर्व्वभूतो न
च सर्व्वभूतः। विश्वं यतश्चैतदविश्वहेतोर्नमोस्तु तस्मै पुरुषोत्तमाय॥ ॥पराशर उवाच॥ तस्य तच्चेतसो देवः स्तुतिमित्थं प्रकुर्व्वतः। आविर्ब्बभूव भगवान्पीताम्ब-
रधरो हरिः॥ ससंभ्रमस्तमालोक्य समुत्थायाकुलाक्षरं। नमोस्तु विष्णवेत्येतद्व्याजहारासकृद्द्विज॥ ॥प्रह्लाद उवाच॥ देव प्रपन्नार्त्तिहर प्रसादं कुरु केशव
नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं। तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि॥ या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्माप
अवलोकनदानेन भूयो मां पावयाच्युत॥ ॥श्रीभगवानुवाच॥ कुर्व्वतस्ते प्रसन्नोहं भक्तिमव्यभिचारिणीं। यथाभिलषितो मत्तः प्रह्लाद व्रियतां वरः॥ ॥प्रह्लाद उवाच॥

सर्प्पेत् ॥ ❀ ॥ श्रीभगवानुवाच ॥ मयि भक्तिस्तवास्त्येव भूयोप्येवं भविष्यति । वरस्तु मत्तः प्रह्लाद व्रियतां यस्तवेप्सितः ॥ ॥ प्रह्लाद उवाच ॥ मयि द्वेषानुबन्धोभू-
त्संस्तुतावुद्यते तव । मत्पितुस्तत्कृतं पापं देव तस्य प्रणश्यतु ॥ शस्त्राणि पातितान्यङ्गे क्षिप्तो यच्चाग्निसंहतौ । दंशितश्चोरगैर्दत्तं यद्विषं मम भोजने ॥ बद्ध्वा समुद्रे य-
त्क्षिप्तो यच्चितोस्मि शिलोच्चयैः । अन्यान्यप्यसाधूनि यानि पित्रा कृतानि मे ॥ त्वयि भक्तिमतो द्वेषादघं तत्संभवं च यत् । त्वत्प्रसादात्प्रभो सद्यस्तेन मुच्येत मे पिता
॥ ॥ श्रीभगवानुवाच ॥ प्रह्लाद सर्वमेतत्ते मत्प्रसादाद्भविष्यति । अन्यं च ते वरं दद्मि व्रियतामसुरात्मज ॥ ॥ प्रह्लाद उवाच ॥ कृतकृत्योस्मि भगवन्
वरेणानेन यत्त्वयि । भवित्री त्वत्प्रसादेन भक्तिरव्यभिचारिणी ॥ धर्मार्थकामैः किं तस्य मुक्तिस्तस्य करे स्थिता । समस्तजगतां मूले यस्य भक्तिः स्थिरा त्व-
यि ॥ ॥ श्रीभगवानुवाच ॥ यथा ते निश्चलं चेतो मयि भक्तिसमन्वितं । तथा त्वं मत्प्रसादेन निर्वाणं परमाप्स्यसि ॥ ॥ पराशर उवाच ॥ इत्युक्त्वान्तर्दधे विष्णुस्त-
स्य मैत्रेय पश्यतः । स चापि पुनरागम्य ववन्दे चरणौ पितुः ॥ तं पिता मूर्ध्न्युपाघ्राय परिष्वज्य च पीडितं । जीवसीत्याह वत्सेति बाष्पार्द्रनयनो द्विज ॥ प्रीतिमांश्चा-
त्य

भवत्स्निग्धोनुतापी महासुरः । गुरौ पितरि चाचार्ये शुश्रूषां सोपि धर्मवित् ॥ पितर्युपरतिं नीते नरसिंहस्वरूपिणा । विष्णुना सोपि दैत्यानां मैत्रेयाभूत्पतिस्ततः ॥ ततः
[illegible] प्राप्य कर्मशुद्धिकरीं द्विज । पुत्रपौत्रांश्च सुबहूनवाप्यैश्वर्यमेव च ॥ क्षीणाधिकारः स यदा पुण्यपापविवर्जितः । तदा स भगवद्ध्यानात्परं निर्वाण-
माप्तवान् ॥ एवं प्रभावो दैत्योसौ मैत्रेयासीन्महामतिः । प्रह्लादो भगवद्भक्तो यं त्वं परिपृच्छसि ॥ यस्त्वेतच्चरितं तस्य प्रह्लादस्य महात्मनः । शृणोति तस्य पापानि सद्यो
गच्छन्ति संक्षयं ॥ अहोरात्रकृतं पापं प्रह्लादचरितं नरः । शृण्वन्पठंश्च मैत्रेय व्यपोहति न संशयः ॥ पौर्णमास्याममावास्यामष्टम्यामथवा पठन् । द्वादश्यां वा तदाप्नोति
गोप्रदानफलं द्विज ॥ प्रह्लादं सकलापत्सु यथा रक्षितवान्हरिः । तथा रक्षति यस्तस्य शृणोति चरितं सदा ॥ इति श्रीविष्णुपुराणे प्रथमेंशे विंशतितमोध्यायः ॥
पराशर उवाच ॥ संह्रादपुत्र आयुष्मान् शिबिर्बाष्कल एव च । विरोचनस्तु प्राह्लादिर्बलिर्जज्ञे विरोचनात् ॥ बलेः पुत्रशतं त्वासीद्बाणज्येष्ठं द्विजोत्तम । हिरण्याक्ष-
सुताश्चासन् सर्व एव महाबलाः ॥ उत्कुरः शकुनिश्चैव भूतसन्तापनस्तथा । महानाभो महाबाहुः कालनाभस्तथापरः ॥ अभवन्दनुपुत्राश्च द्विमूर्द्धा शंकरस्तथा

अयामुखः शंकुशिराः कपिलः शंबरस्तथा ॥ एकचक्रो महाबाहुः कालनाभस्तथापरः । स्त्रानकश्च महाबलः । स्वर्भानुर्वृषपर्वा विपुलामा च महाबलः ॥ एतद्दना
ः सुताः ख्याता विप्रचित्तिश्च वीर्यवान् । स्वर्भानोश्च प्रभा कन्या शर्मिष्ठा वार्षपर्वणी ॥ उपदानवी हयशिरा प्रख्याता वरकन्यका । वैश्वानरसुते चोभे पुलोमा कालका
स्तथा ॥ उभे सुते महाभागे मरीचेस्तु परिग्रहः । ताभ्यां पुत्रसहस्राणि षष्टिर्दानवसत्तमाः ॥ पौलोमाः कालकेयाश्च मरीचस्तनयास्मृताः । तथापर महावीर्या
दारुणा सुघोरा निर्घृणाः ॥ सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा । व्यंशः शल्यश्च बलवान् नलश्चैव महाबलः ॥ वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा । अं ३४
जको नरकश्चैव कालनाभस्तथैव च ॥ स्वराहुश्च महावीर्या वक्त्रयोधी महासुरः । वंशे वै दानवाः श्रेष्ठा दनुवंशविवर्द्धनाः ॥ एतेषां पुत्रपौत्राश्च शतशोऽथ स
हस्रशः । प्रह्लादस्य तु दैत्यस्य निवातकवचाः कुले ॥ उत्पन्नाश्च सुमहात्मा तपसा भावितात्मनः । षट् सुताः सुमहासत्त्वास्ताम्रायाः परिकीर्तिताः ॥ काकी श्येनी च भासी
च सुग्रीवी शुचिगृध्रिका । काकी तु काकानजनयदुलूकी प्रत्युलूककान् ॥ श्येनी श्येनांस्तथा भासी भासान् गृध्रांश्च गृध्र्यपि । शुचिरौदकान् पक्षिगणान् सुग्रीवी तु व्यजायत

अश्वानुष्ट्रान् गर्दभांश्च ताम्रावंशः प्रकीर्तितः । विनतायास्तु पुत्रौ द्वौ विख्यातौ गरुडारुणौ ॥ सुपर्णः पततां श्रेष्ठो दारुणः पन्नगाशनः । सुरसायाः सहस्रं तु सर्पाणाममि
तौजसाम् । अनेकशिरसां ब्रह्मन् खेचराणां महात्मनाम् । काद्रवेयास्तु बलिनः सहस्रममितौजसः । सुपर्णवशगा ब्रह्मन् जज्ञिरे नैकमस्तकाः ॥ तेषां प्रधाना सततं
शेषवासुकितक्षकाः । ऐरावतो महापद्मः कम्बलाश्वतरौ तथा ॥ एलापत्रस्तथा नागः कर्कोटकधनञ्जयौ । एते चान्ये च बहवो दन्दशूका विषोल्बणाः ॥ गन्धर्वा
धवश्च विद्धि मत्स्याः सर्व्वे वै दंष्ट्रिणः स्थलजाः पक्षिणो ग्राह्याश्च दारुणाः पिशिताशनाः ॥ मुस्तु वैजनयामास सुरभिर्महिषीस्तथा । इरा वृक्षलतावल्लीस्तृणजातीश्च सर्व्व
शः ॥ पिशाचयक्षरक्षांसि मुनिरप्सरसस्तथा । अरिष्टा तु महासत्त्वान् गन्धर्वानमितौजसः । एवं कश्यपदायादाः कीर्तिताः स्थाणुजङ्गमाः ॥ येषां पुत्राश्च पौत्राश्च श
तशोऽथ सहस्रशः । एष मन्वन्तरे सर्गो व्याख्यातो वो विशाम्पते ॥ वैवस्वते महाकीर्ते पुण्ये विनिर्गतो । ब्रह्मणस्तु सुबन्धाणां प्रजासर्गं इहोच्यते । सूर्ये यज्ञे स
र्षीन् उत्पन्नान् सप्त मानसान् । पुत्रत्वे कल्पयामास स्वयमेव पितामहः ॥ गन्धर्वशापि देवानां दानवानां च सत्तम । दितिर्विनष्टपुत्रा वै तोषयामास कश्यपं ॥

तयाराधितः सम्यक् कश्यपस्तपतां वरः। वरेण च्छन्दयामास सा च वव्रे ततो वरं॥ पुत्रमिन्द्रवधार्थाय समर्थममितौजसं। स च तस्यै वरं प्रादात् प्रार्थितं मुनिसत्त
मः॥ दत्वा च वरमत्युग्रं कश्यपः प्राह तां पुनः। शक्रं पुत्रो निहन्ता ते यदि गर्भं शरच्छतं॥ समाहितातिप्रयता शुचिर्नी धारयिष्यसि। इत्येवमुक्त्वा तां देवीं संग
तः कश्यपो मुनिः॥ दधार सा च तं गर्भं सम्यक् शौचसमन्विता। गर्भमात्मवधार्थाय ज्ञात्वा तं मघवानपि॥ शुश्रूषुस्तामथागच्छद्विनयादमरादमराधि
पः। तस्याश्चैवान्तरप्रेप्सुरतिष्ठत्पाकशासनः॥ ऊने वर्षशते चास्या ददर्शान्तरमात्मना। अकृत्वा पादयोः शौचं दितिः शयनमाविशत्॥ निद्रामाहारया ३१
मास तस्याः कुक्षिं प्रविश्य सः। वज्रपाणिर्महागर्भं चिच्छेदाथ स सप्तधा॥ स पाट्यमानो वज्रेण प्ररुरोदातिदारुणं॥ मा रोदीरिति तं शक्रः पुनः पुनरभाषत।
सोऽभवत्सप्तधा गर्भस्तमिन्द्रः कुपितः पुनः। एकैकं सप्तधा चक्रे वज्रेणारिविदारिणा॥ मरुतो नाम देवास्ते बभूवुरतिवेगिनः॥ यदुक्तं वै मघवता तेनैव
मरुतोऽभवन्। देवा एकोनपञ्चाशत्सहाया वज्रपाणिनः॥ इति श्रीविष्णुपुराणे प्रथमेंऽशे एकविंशतितमोऽध्यायः॥ ॥पराशर उवाच॥ यदाभिषिक्तः स

पृथुः पूर्व्वं राज्ये महर्षिभिः। ततः क्रमेण राज्यानि ददौ लोकपितामहः॥ नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः। सोमं राज्ये दधद्ब्रह्मा यज्ञानां तपसा
मपि॥ राज्ञां वैश्रवणं राज्ये जलानां वरुणं तथा। आदित्यानां पतिं विष्णुं वसूनामथ पावकं॥ प्रजापतीनां दक्षन्तु वासवं मरुतामपि। दैत्यानां दानवानां च
प्रह्लादममितौजसं॥ पितॄणां धर्म्मराजानं यमं राज्येऽभ्यषेचयत्। ऐरावतं गजेन्द्राणामशेषाणां पतिं ददौ॥ पतत्रिणां च गरुडं देवानामपि वासवं। उच्चैः
श्रवसमश्वानां वृषभन्तु गवामपि॥ शेषन्तु नागराजानं मृगाणां सिंहमीश्वरं। वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत्॥ एवं विभज्य राज्यानि दिशां पालाननन्त
रं। प्रजापतिपतिर्ब्रह्मा स्थापयामास सर्व्वतः॥ पूर्व्वस्यां दिशि राजानं वैराजस्य प्रजापतेः। दिशःपालं सुधन्वानं राजानं सोऽभ्यषेचयत्। दक्षिणस्यां दिशि त
था कर्द्दमस्य प्रजापतेः॥ पुत्रं शंखपदं नाम राजानं सोऽभ्यषेचयत्। पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतं॥ केतुमन्तं महात्मानं राजानमभिषिक्तवान्। त
था हिरण्यरोमाणं पर्ज्जन्यस्य प्रजापतेः। उदीच्यां दिशि दुर्द्धर्षं राजानं सोऽभ्यषेचयत्॥ तैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना। यथाप्रदेशमद्यापि धर्म्म

प्राप्य
नः प्रतिसञ्चरे ॥ एते सर्व्वप्रवृत्तस्य स्थितौ विष्णोर्महात्मनः। विभूतिभूता राजानो ये चान्ये मुनिसत्तम ॥ ये भविष्यन्ति ये भूताः सर्व्वभूतेश्वरा द्विज । ते सर्व्वे
सर्व्वभूतस्य विष्णोरंशा द्विजोत्तम ॥ ये तु देवाधिपतयो ये च दैत्याधिपास्तथा। दानवानां च ये नाथा ये नाथाः पिशिताशिनां ॥ पशूनां ये च पतयः पतयो ये च
पक्षिणां। मनुष्याणां च सर्पाणां नागानां चाधिपाश्च ये ॥ वृक्षाणां पर्व्वतानां च ग्रहाणां चापि येधिपाः। अतीता वर्त्तमानाश्च ये भविष्यन्ति चापरे ॥ ते सर्व्वे
सर्व्वभूतस्य विष्णोरंशसमुद्भवाः। न हि पालनसामर्थ्यमृते सर्व्वेश्वरं हरिं ॥ स्थितौ स्थितं महाप्राज्ञ भवत्यन्यस्य कस्यचित् । सृजत्येष जगत्सृष्टौ स्थितौ पाति स ३८
नातनः ॥ हन्ति चैवान्तकत्वेन रजःसत्वादिसंश्रयः। चतुर्विभागः संसृष्टौ चतुर्द्धा संस्थितः स्थितौ ॥ प्रलयं च करोत्यन्ते चतुर्भेदो जनार्द्दनः। एकेनांशेन
ब्रह्मासौ भवत्यव्यक्तमूर्त्तिमान् ॥ मरीचिमिश्राः पतयः प्रजानामन्यभागतः। कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः। इत्थं चतुर्द्धा संसृष्टौ वर्त्ततेसौ रजोगु
णः ॥ एकांशेन स्थितो विष्णुः करोति प्रतिपालनं । मन्वादिरूपी चान्येन कालरूपोपरेण च ॥ सर्व्वभूतेषु चान्येन संस्थितः कुरुते स्थितिं । सत्वं गुणं समाश्रित्य

जगतः पुरुषोत्तमः ॥ आश्रित्य तमसो वृत्तिमन्तकाले तथा पुनः। रुद्रस्वरूपो भगवानेकांशेन भवत्यजः ॥ अग्न्यन्तकादिरूपेण भागेनान्येन वर्त्तते । कालस्व
रूपो भागोन्यः सर्व्वभूतानि चापरः ॥ विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः। विभागकल्पना ब्रह्मन् कथ्यते सार्व्वकालिकी ॥ ब्रह्मा दक्षादयः कालस्तथैवाखिल
जन्तवः ॥ विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥ विष्णुर्मन्वादयः कालः सर्व्वभूतानि च द्विज । स्थितेर्न्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ रुद्रः कालान्तकाद्याश्
च समस्ताश्चैव जन्तवः। चतुर्द्धा प्रलयायैता जनार्द्दनविभूतयः। जगदादौ तथा मध्ये सृष्टिराप्रलयाद्द्विज ॥ धात्रा मरीचिमिश्रैश्च क्रियते जन्तुभिस्तथा। ब्रह्मा सृ
जत्यादिकाले मरीचिप्रमुखास्ततः। उत्पादयन्त्यपत्यानि जन्तवश्च प्रतिक्षणं ॥ कालेन न विना ब्रह्मा सृष्टिनिष्पादको द्विज । न प्रजापतयः सर्व्वे न चैवाखिलज
न्तवः ॥ एवमेव विभागोयं स्थितावप्युपदिश्यते । चतुर्द्धा देवदेवस्य मैत्रेय प्रलये तथा ॥ यत्किंचित्सृज्यते येन सत्वजातेन वै द्विज । तस्य सृज्यस्य संभूतौ तत्स
र्व्वं वै हरेस्तनुः ॥ हन्ति यावच्च यत्किंचित्सत्वं स्थावरजंगमं । जनार्द्दनस्य तद्रौद्रं मैत्रेयान्तकरं वपुः ॥ एवमेष जगत्स्रष्टा जगत्पाता तथा जगत् । जगद्भक्षयिता दे

व समस्तस्य जनार्दनः॥ सर्गस्थित्यन्तकालेषु त्रिविधैव प्रवर्त्तते। गुणप्रवृत्त्या परमं पदं तस्यागुणं महत्॥ तद्विज्ञानमयी व्यापि स्वसंवेद्यमनौपमं। चतुःप्र
कारं तदपि स्वरूपं परमात्मनः॥ ॥मैत्रेय उवाच॥ चतुःप्रकारता तस्य ब्रह्मभूतस्य वै मुने। ममाचक्ष्व यथान्यायं यदुक्तं परमं पदं॥ ॥पराशर उवाच॥
मैत्रेय कारणं प्रोक्तं साधनं सर्ववस्तुषु। साध्यं च वस्त्वभिमतं यत्साधयितुमात्मनः॥ योगिनां मुक्तिकामस्य प्राणायामादि साधनं। साध्यं च परमं ब्रह्म पुनर्ना
वर्त्तते यतः॥ साधनालम्बनं ज्ञानं मुक्तये योगिनां हि यत्॥ स भेदः प्रथमस्तस्य ब्रह्मभूतस्य वै मुने। युञ्जतः क्लेशमुक्त्यर्थं साध्यं यद्ब्रह्म योगिनः॥ तदालम्बनविज्ञा ३१
नं द्वितीयोंशो महामुने। उभयोस्त्वविभागेन साध्यसाधनयोर्हि यत्॥ विज्ञानमद्वैतमयं तद्भागोन्यो मयोदितः॥ ज्ञानत्रयस्य वै तस्य विशेषो यो महामुने॥ तन्नि
राकरणद्वारा दर्शितात्मस्वरूपवत्। निर्व्यापारमनाख्येयं व्याप्तिमात्रमनौपमं॥ आत्मसंबोधविषयं सत्तामात्रमलक्षणं॥ प्रशान्तमभयं शुद्धं दुर्विभाव्यमसंश्रयं।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदं॥ तत्राज्ञानं निरोधेन योगिनो यान्ति ये लयं। संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विज॥ एवंप्रकारममलं नित्यं व्या

थी
य
विपु ३

पकमक्षयं। समस्तहेयरहितं विष्ण्वाख्यं परमं पदं॥ तद्ब्रह्म परमं योगी यतो नावर्त्तते पुनः। श्रयत्यपुण्योपरमे क्षीणक्लेशोतिनिर्मलः॥ द्वे रूपे ब्रह्मणस्त
स्य मूर्त्तं चामूर्त्तमेव च। क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते॥ अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्। एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा॥ परस्य
ब्रह्मणः शक्तिस्तथेदमखिलं जगत्। तत्राप्यासन्नदूरत्वाद्बहुत्वस्वल्पतामयः॥ ज्योत्स्नाभेदोस्ति तच्छक्तेस्तद्वन्मैत्रेय वर्त्तते। ब्रह्मविष्णुशिवा ब्रह्मन्प्रधाना ब्र
ह्मशक्तयः॥ ततश्च देवा मैत्रेय न्यूना दक्षादयस्ततः। ततो मनुष्याः पशवो मृगपक्षिसरीसृपाः॥ न्यूनान्न्यूनतराश्चैव वृक्षगुल्मादयस्तथा। तदेतदक्षयं
नित्यं जगन्मुनिवराखिलं॥ आविर्भावतिरोभावजन्मनाशविकल्पवत्। सर्वशक्तिमयो विष्णुः स्वरूपं ब्रह्मणः परं॥ मूर्त्तं यद्योगिभिः पूर्वं योगारम्भेषु चिन्त्य
ते। सालम्बनो महायोगः सबीजो यत्र संस्थितः॥ मनस्यव्याहते सम्यग्युञ्जतां जायते मुने। स परः सर्वशक्तीनां ब्रह्मणः समनन्तरः॥ मूर्त्तं ब्रह्म महाभाग स
र्वब्रह्ममयो हरिः॥ तत्र सर्वमिदं प्रोतमोतं चैवाखिलं जगत्॥ ततो जगज्जगत्तस्मिन्स जगच्चाखिलं जगत्। ततो जगज्जगत्तस्मिन्स जगच्चाखिलं मुने॥ क्षराक्ष

वमया विष्णुर्विभर्त्यखिलमीश्वरः। पुरुषाद्याज्जगन्मयी भूषणास्त्रस्वरूपधृक्॥ ॥मैत्रेय उवाच॥ भूषणास्त्रस्वरूपस्थं यथैतदखिलं जगत्। बिभर्ति भग
वान् विष्णुस्तन्ममाख्यातुमर्हसि॥ ॥पराशर उवाच॥ नमस्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे। कथयामि यथाख्यातं वसिष्ठेन यथार्थवित्॥ आत्मानमस्य ज
गतो निर्लेपमगुणामलं। बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिः। श्रीवत्ससंस्थानधरमनन्ते च समाश्रितं॥ प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे।
भूतादिमिन्द्रियादिं च द्विधाहङ्कारमीश्वरः॥ बिभर्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितं। चलस्वरूपमत्यन्तं जवेनान्तरितानिलं॥ चक्रस्वरूपं च मनो धत्ते ३८
विष्णुकरे स्थितं। पञ्चरूपा तु या माला वैजयन्ती गदाभृतः॥ सा भूतहेतुसंघाता भूतमाला च वै द्विज। यानीन्द्रियाण्यशेषाणि बुद्धिकर्मात्मकानि वै॥ शर
रूपाण्यशेषाणि तानि धत्ते जनार्दनः। बिभर्ति यच्चासिरत्नमच्युतोऽत्यन्तनिर्मलं॥ विद्यामयन्तु तज्ज्ञानमविद्याचर्मसंस्थितं। इत्थं पुमान्प्रधानञ्च बुद्ध्यह
ङ्कारमेव च। भूतानि च हृषीकेशे मनः सर्वेन्द्रियाणि च॥ विद्याविद्ये च मैत्रेय सर्वमेतत्समाश्रितं। अस्त्रभूषणसंस्थानस्वरूपं रूपवर्जितः॥ बिभर्ति मायारू

विपु ४

पोऽसौ श्रेयसे प्राणिनां हरिः। सविकारं प्रधानं च पुमांसं चाखिलं जगत्॥ बिभर्ति पुण्डरीकाक्षस्तदेवं परमेश्वरः। या विद्या या तथाविद्या यत्सद्यच्चासदव्ययं
॥ तत्सर्वं सर्वभूतेशे मैत्रेय मधुसूदने। कलाकाष्ठानिमेषादि दिनर्त्वयनहायनैः॥ कालस्वरूपो भगवानपापो हरिरव्ययः। भूर्लोकोऽथ भुवर्लोकः स्वर्लोको मुनि
सत्तम॥ महर्जनस्तपः सत्यं सप्त लोका इमे विभुः। लोकात्ममूर्त्तिः सर्वेषां पूर्वेषामपि पूर्वजः॥ आधारः सर्वविद्यानां स्वयमेव हरिः स्थितः। देवमानुषपश्वा
दिस्वरूपैर्बहुभिः स्थितः॥ ततः सर्वेश्वरोऽनन्तो भूतमूर्त्तिरमूर्त्तिमान्। ऋचो यजूंषि सामानि तथैवाथर्वणानि वै॥ इतिहासोपवेदाश्च वेदान्तेषु तथोक्तयः। वे
दाङ्गानि समस्तानि मन्वादिगदितानि वै॥ शास्त्राण्यशेषाण्याख्यानान्यनुवाकाश्च ये क्वचित्। काव्यालापाश्च ये केचिद्गीतकान्यखिलानि वै॥ शब्दमूर्त्तिधरस्यैत
द्वपुर्विष्णोर्महात्मनः। यानि मूर्त्तान्यमूर्त्तानि यान्यत्रान्यत्र वा क्वचित्। सन्ति वै वस्तुजातानि तानि सर्वाणि तद्वपुः॥ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः का
रणकार्यजातं। ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्ति॥ इत्येष तेंऽशः प्रथमः पुराणस्यास्य वै द्विज। यथावत्कथितो यस्मिन् श्रुते पापैः प्रमु

याति ॥ कार्त्तिक्यां पुष्करस्नाने द्वादशाब्देन यत्फलं । तदस्य श्रवणात्सर्वं मैत्रेयाप्नोति मानवः ॥ देवर्षिपितृगन्धर्वयक्षादीनां तु संभवं । भवन्ति शृण्वतः पुं-
सो देवाद्या वरदा मुने ॥ इति श्रीविष्णुपुराणे प्रथमोंऽशः समाप्तः ॥ ❁ ॥ मैत्रेय उवाच ॥ भगवन्सम्यगाख्यातं ममैतदखिलं त्वया । जगतः सर्गसंबंधि
यत्पृष्टोसि गुरो मम । योयमंशो जगत्सृष्टिसंबन्धो गदितस्त्वया ॥ तत्राहं श्रोतुमिच्छामि भूयोपि मुनिसत्तम । प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य
यौ ॥ तयोरुत्तानपादस्य ध्रुवः पुत्रस्त्वयोदितः । प्रियव्रतस्य नैवोक्ता भवता द्विज संततिः ॥ तामहं श्रोतुमिच्छामि प्रसन्नो वक्तुमर्हसि ॥ ॥ पराशर उवाच ॥ क- गो २
र्दमस्यात्मजां कन्यामुपयेमे प्रियव्रतः । सम्राट्कुक्षिश्च तत्कन्ये दशपुत्रास्तथापरे ॥ महाप्राज्ञा महावीर्या विनीता दयिताः पितुः । प्रियव्रतसुताः ख्यातास्तेषां
नामानि मे शृणु ॥ आग्नीध्रश्चाग्निबाहुश्च वपुष्मान्द्युतिमांस्तथा । मेधा मेधातिथिर्भव्यः सवनः पुत्र एव च ॥ ज्योतिष्मान्दशमस्तेषां सत्यनामा सुतोभवत् । प्रिय-
व्रतस्य पुत्रास्ते प्रख्याता बलवीर्यतः ॥ मेधाग्निबाहुपुत्रास्तु त्रयो योगपरायणाः । जातिस्मरा महाभागा न राज्याय मनो दधुः ॥ निर्म्ममाः सर्वकालं तु समस्तार्थे-

षु वै मुने ॥ चक्रुः क्रियां यथान्यायमपेक्षाकांक्षिणो हि ते । प्रियव्रतो ददौ तेषां सप्तानां मुनिसत्तम ॥ विभज्य सप्त द्वीपानि मैत्रेय सुमहात्मना । जम्बूद्वीप
महाभाग सोग्नीध्राय ददौ पिता । मेधातिथेस्तथा प्रादात्प्लक्षद्वीपमथापरं ॥ शाल्मले च वपुष्मन्तं नरेन्द्रमभिषिक्तवान् । ज्योतिष्मन्तं कुशद्वीपे राजानं कृतवान्प्र-
भुः ॥ द्युतिमन्तं च राजानं क्रौञ्चद्वीपे समादिशत् । शाकद्वीपेश्वरं चापि हव्यं चक्रे प्रियव्रतः । पुष्कराधिपतिं चक्रे सवनं चापि स प्रभुः ॥ जंबूद्वीपेश्वरो यस्तु आ-
ग्नीध्रो मुनिसत्तम । तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ॥ नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः । रम्यो हिरण्वान्षष्ठश्च कुरुर्भद्राश्व एव च ॥ केतुमालस्तथै-
वान्यः साधुचेष्टो नृपोभवत् । जम्बूद्वीपविभागांश्च तेषां विप्र निशामय ॥ पिता दत्तं हिमाह्वं तु वर्षं नाभेस्तु दक्षिणं । हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥ तृ-
तीयं नैषधं वर्षं हरिवर्षाय दत्तवान् । इलावृताय प्रददौ मेरुर्यत्र तु मध्यमः । नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता ॥ श्वेतं यदुत्तरं तस्मात्पित्रा पित्तं हि-
रण्वते । यदुत्तरं शृङ्गवतो वर्षं तत्कुरवे ददौ ॥ मेरोः पूर्वेण यद्वर्षं भद्राश्वाय प्रदत्तवान् । गन्धमादनपार्श्वे वर्षं केतुमालाय दत्तवान् । इत्येतानि ददौ तेभ्यः

धर्म्माधर्मौ२

पुत्रस्य पुनश्चवत्रः॥वर्षेस्वेतेषु तान्पुत्रा नभिषिच्य सहूपतिः। शालग्राम महापुण्यं मैत्रेय तपसे ययौ॥यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने। तेषां स्वाभावि
की सिद्धिः सुखप्राया ह्ययत्नतः॥विपर्य्ययो न तेष्वस्ति जरामृत्युभयं न च। न तस्वास्ती नोत्तमाधममध्यमाः॥न तेष्वस्ति युगावस्था क्षेत्रेष्वष्टसु सर्वदा। हिमाह्वयस्य
वै वर्षं नाभेरासीन्महात्मनः॥तस्यर्षभोऽभवत्पुत्रो मेरुदेव्यां महाद्युतिः। ऋषभाद्भरतो जज्ञे ज्येष्ठः पुत्रशतस्य सः॥कृत्वा राज्यं स्वधर्मेण तथेष्ट्वा विविधान्मखान्।
अभिषिच्य सुतं वीरं भरतं पृथिवीपतिः॥तपसे स महाभागः पुलहस्याश्रमं ययौ। वानप्रस्थविधानेन तत्रापि कृतनिश्चयः॥तपस्तेपे यथान्यायी सदा स महीः ६०
पतिः॥तपसा कर्षितोऽत्यर्थं कृशो धमनिसंततः॥नग्नो वीटां मुखे दत्वा वीराध्वानं ततो गतः॥ततश्च भारतं वर्षमेतल्लोकेषु गीयते॥भरताय यतः पित्रा दत्तं प्र
ष्ठितावनी। सुमतिर्भरतस्याभूत्पुत्रः परमधार्मिकः॥कृत्वा सम्यग्ददौ तस्मै राज्यमिष्टमखः पिता। पुत्रसंक्रामितश्रीस्तु भरतः स महीपतिः॥योगाभ्या
सरतः प्राणान् शालग्रामेऽत्यजन्मुने। अजायत च विप्रोऽसौ योगिनः प्रवरे कुले॥मैत्रेय तस्य चरितं कथयिष्यामि ते पुनः। सुमतेस्तेजसस्तस्मादिन्द्रद्युम्नो

नुर२ ति दि४

व्यजायत॥परमेष्ठी ततस्तस्मात्प्रतीहारस्तदन्वयः। प्रतिहर्त्तेति विख्यात उत्पन्नस्तस्य चात्मजः॥भवस्तस्मादथोद्गीथः प्रस्तावस्तत्सुतो विभुः। पृथुस्ततस्त
तो नक्तो नक्तस्यापि गयः सुतः॥नरो गयस्य तनयस्तत्पुत्रोऽभूद्विराट् ततः। तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत॥महान्तस्तत्सुतश्चाभून्मनस्युस्त
स्य चात्मजः। त्वष्टा त्वष्टुश्च विरजो रजस्तस्याप्यभूत्सुतः। शतजिद्रजसस्तस्य जज्ञे पुत्रशतं मुने। विश्वग्ज्योतिःप्रधानास्ते यैरिमा वर्द्धिताः प्रजाः॥तैरिदं भारतं वर्षं
नवभेदमलंकृतं। तेषां वंशप्रसूतैस्तु भुक्तेयं भारती पुरा॥कृतत्रेतादिसर्गेण युगाख्यामेकसप्ततिं। एष स्वायंभुवः सर्गो येनेदं पूरितं जगत्॥वाराहे
तु मुने कल्पे पूर्वमन्वन्तराधिपः॥इति श्रीविष्णुपुराणे द्वितीयेंऽशे प्रथमोऽध्यायः॥ ॥मैत्रेय उवाच॥कथितो भवता ब्रह्मन्सर्गः स्वायंभुवस्य च। श्रो
तुमिच्छाम्यहं त्वत्तः सकलं मण्डलं भुवः॥यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः। वनानि सरितः पुर्यो देवादीनां तथा मुने॥यत्प्रमाणमिदं सर्वं यदाधारं
यदात्मकं। संस्थानमस्य च मुने यथावद्वक्तुमर्हसि॥ ॥पराशर उवाच॥मैत्रेय श्रूयतामेतत्संक्षेपाद्गदतो मम। नास्य वर्षशतेनापि वक्तुं शक्यो हि विस्तरः॥

जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥ एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः । लवणेक्षुसुरासर्पिर्दधिदु
ग्धजलैः समं ॥ जम्बूद्वीपः समस्तानामेतेषां मध्यसंस्थितः । तस्यापि मेरुर्मैत्रेय मध्ये कनकपर्वतः ॥ चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रितः । प्रविष्टः षोडशाधस्ता
द्द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ मूले षोडशसाहस्रो विस्तारस्तस्य सर्वतः । भूपद्मस्यास्य शैलोऽसौ कर्णिकाकारसंस्थितः ॥ हिमवान्हेमकूटश्च निषधस्तस्य दक्षिणे । नील
श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे । सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥ भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतं ६१
। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज ॥ रम्यकं चोत्तरं वर्षं तस्यैवानु हिरण्मयं । उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥ नवसाहस्रमेकैकमेतेषां द्विजसत्त
म । इलावृतं च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः । मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तृतं ॥ इलावृतं महाभाग चत्वारश्चात्र पर्वताः । विष्कम्भा रचिता मेरोर्योजनायु
तमुच्छ्रिताः ॥ पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः । विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः ॥ कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च । एकादशशतायामाः

पादपा गिरिकेतवः ॥ जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने । महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै ॥ पतन्ति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः । रसेन त
स्याः प्रख्याता तत्र जम्बूनदीति वै ॥ सरित्प्रवर्तते सा च पीयते तन्निवासिभिः । न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः ॥ तत्पानात्स्वच्छमनसां जनानां तत्र जायते
तीरमृत्तत्र संप्राप्य सुखवायुविशोषिता ॥ जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणं । भद्राश्वः पूर्वतो मेरोः केतुमालश्च पश्चिमे ॥ वर्षे द्वे तु मुनिश्रेष्ठ तयोर्मध्य
मिलावृतः । वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनं ॥ वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतं । अरुणोदं महाभद्रमसितोदं समानसं ॥ सरांस्येतानि चत्वारि देव
भोग्यानि सर्वदा । शीतांशश्चक्रमुञ्जश्च कुररी माल्यवांस्तथा ॥ वैकङ्कप्रमुखा मेरोः पूर्वतः केसराचलाः । त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा । निष
धाद्या दक्षिणतस्तस्य केसरपर्वताः ॥ शिखिवासाः सवैदूर्यः कपिलो गन्धमादनः । जारुधिप्रमुखास्तद्वत्पश्चिमे केसराचलाः ॥ चतुर्दशसहस्राणि योजना
नां महापुरी । मेरोरुपरि मैत्रेय ब्रह्मणः प्रथिता दिवि ॥ तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च । इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुराः ॥ विष्णुपाद

विनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् । समन्ताद्ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः ॥ सा तत्र पतिता दिक्षु चतुर्द्धा प्रतिपद्यते । सीता चालकनन्दा च चक्षुर्भद्रा च वै क्र
मात् ॥ पूर्व्वेण शैलात्सीता तु शैलं यात्यन्तरीक्षगा । ततश्च पूर्व्ववर्षेण भद्राश्वेनैति सार्ण्णवं ॥ तथैवालकनन्दापि दक्षिणेनैत्य भारतम् । प्रयाति सागरं भूत्वा
सप्तभेदा महामुने ॥ वंक्षुस्तु पश्चिमगिरीनतीत्य सकलांस्ततः । पश्चिमं केतुमालाख्यं वर्षं गत्वैति सागरं ॥ भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून् । अ
तीत्योत्तरमम्भोधिं समभ्येति महामुने ॥ आनीलनिषधायामौ माल्यवद्गन्धमादनौ । तयोर्म्मध्यगतो मेरुः कर्ण्णिकाकारसंस्थितः ॥ भारताः केतुमालाश्च भद्रा ५२
श्वाः कुरवस्तथा । पत्राणि लोकपद्मस्य मर्य्यादापर्व्वताबुभौ ॥ तयोर्म्मध्यगतो मेरुः कर्ण्णिकाकारसंस्थितः । तौ दक्षिणोत्तरायामावानीलनिषधायतौ ॥ ग
धमादनकैलासौ पूर्व्वपश्चायतावुभौ । अशीतियोजनायामावर्ण्णवान्तर्व्यवस्थितौ ॥ निषधः पारिपात्रश्च मर्य्यादापर्व्वतावुभौ । तौ दक्षिणोत्तरायामावानील
निषधायतौ ॥ मेरोः पश्चिमदिग्भागे यथा पूर्व्वौ तथा स्थितौ । त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्व्वतौ ॥ पूर्व्वपश्चायतावेतावर्ण्णवान्तर्व्यवस्थितौ । इत्येते मु

निवर्योक्ता मर्यादापर्व्वतास्तव । जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्द्दिशं । मेरोश्चतुर्द्दिशं ये तु प्रोक्ताः केशरपर्व्वताः ॥ शीतान्ताद्या मुने तेषामतीव हि मनोरमाः । शै
लानामन्तरद्रोण्यः सिद्धचारणसेविताः ॥ सुरम्याणि तथा तासु काननानि पुराणि च । लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम ॥ तास्वायतनवर्याणि जुष्टानि नर
किन्नरैः । गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः ॥ क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्न्निशं । भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने ॥ नैतेषु पापकर्त्तारो
यान्ति जन्मशतैरपि । भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विज ॥ वराहः केतुमाले तु भारते कूर्म्मरूपधृक् । मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते जनार्द्दनः ॥ विश्वरू
पेण सर्व्वत्र सर्व्वः सर्व्वेश्वरो हरिः । सर्व्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः ॥ यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने । न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकं ॥
स्वस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्ज्जिताः । दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः ॥ न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै । कृतत्रेतादिका नैव तेषु स्थाने
षु कल्पना । सर्व्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ॥ नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे द्वितीयोऽध्यायः ॥ ॥[illegible]

वाः॥ उत्तरं यत् समुद्रस्य हिमाद्रेश्चापि दक्षिणं । वर्षन्तद्भारतं नाम भारती यत्र सन्ततिः॥ नवयोजनसाहस्रो विस्तारोस्य महामुने । कर्म्मभूमिरियं स्वर्गमपवर्ग
ञ्च गच्छतां । महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः॥ विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्व्वताः॥ अतः सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै॥ तिर्य्यक्त्वं न
रकञ्चापि यान्त्यतः पुरुषा मुने । इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते॥ न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते । भारतस्यास्य वर्षस्य नवभेदान्निशाम
य॥ इन्द्रद्वीपः कसेरुम्मान् ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः॥ अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः। योजनानां सहस्रन्तु ६३
द्वीपोयं दक्षिणोत्तरात्॥ पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः॥ इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थि
ताः॥ वेदस्मृतिमुखाश्चान्याः पारिपात्रोद्भवा मुने॥ नर्म्मदासुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः। तापीपयोष्णीनिर्व्विन्ध्याप्रमुखा ऋक्षसम्भवाः॥ गोदावरी भीमर
थी कृष्णवेण्यादिकास्तथा । सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः॥ कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः। त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृ

कामरूप २ नया ४ श्री २

ताः॥ ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसम्भवाः। शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः॥ आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः। तास्विमे कुरुपाञ्चाला मध्य
देशादयो जनाः॥ पूर्व्वदेशादिकाश्चैव पारिपात्रनिवासिनः॥ उड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्व्वशः। तथापरान्ताः सौरा ४ शूराभीरास्तथार्व्वुदाः॥ मारुका
मालिकाश्चैव पारिपात्रनिवासिनः। सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः॥ मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा। आसां पिबन्ति सलिलं सन्निधानि
नी सदा । चत्वारि भारते वर्षे युगान्यत्र महामुने॥ कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः॥ दानानि चात्र दीयन्ते पर
लोकार्त्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते॥ यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा । अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने॥ यतो हि कर्म्मभू
रेषा ह्यतोन्या भोगभूमयः। अत्र जन्मसहस्राणां सहस्रैरपि सत्तम॥ कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयात्॥ गायन्ति देवाः किल गीतकानि धन्यास्तु ते भा
रतभूमिभागे । स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्॥ कर्म्माण्यसङ्कल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्म्ममही

मनन्तं तस्मिन्सर्वं यथा त्वयीमं सन्न्यस्याप्स्यन्ति ॥ जानीम नैतत्क्व वयं विलीने स्वर्गप्रदे कर्म्मणि देहबन्धं । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते नेन्द्रियविप्रही
नाः ॥ नववर्षं तु मैत्रेय जम्बूद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात्कथितं तव ॥ जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः । मैत्रेय वलयाकारः स्थितः
क्षारोदधिर्बहिः ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे तृतीयोऽध्यायः ॥ ॥ पराशर उवाच ॥ क्षारोदेन यथा द्वीपो जम्बूसंज्ञोऽभिवेष्टितः । संवेष्ट्य क्षारमुदधिं
प्लक्षद्वीपस्तथा स्थितः ॥ जम्बूद्वीपस्य विस्तारः शतसाहस्रसम्मितः । स एव द्विगुणो ब्रह्मन् प्लक्षद्वीप उदाहृतः ॥ सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य ६४
वै । ज्येष्ठः शान्तभयो नाम शिशिरस्तदनन्तरः ॥ सुखोदयस्तथानन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते ॥ पूर्वं शान्तभयं वर्षं
शिशिरं सुखदं तथा । आनन्दं च शिवं चैव क्षेमकं ध्रुवमेव च ॥ मर्यादाकारकास्तेषां तथान्ये वर्षपर्वताः । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ॥ गोमेद
श्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः ॥ वर्षाचलेषु रम्येषु वर्षेष्वेतेष्वथानघाः । वसन्ति देवगन्धर्वसहिताः सततं

प्रजाः ॥ तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः । नाधयो व्याधयो वापि सर्वकालसुखं हि तत् ॥ तेषां नद्यश्च सप्तैव वर्षाणां तु समुद्रगाः । नामतस्ताः प्रवक्ष्यामि श्रुता
पापं हरन्ति याः ॥ अनुतप्ता शिखी चैव विपापा त्रिदिवाक्लमः । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥ एते शैलास्तथा नद्यः प्रधानाः कथितास्तव । क्षुद्रनद्य
स्तथा शैलास्तत्र सन्ति सहस्रशः ॥ ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अपसर्पिणी न तेषां वै न चैवोत्सर्पिणी द्विज ॥ न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्त
सु । त्रेतायुगसमः कालः सर्वदैव महामुने ॥ प्लक्षद्वीपादिषु ब्रह्मन् शाकद्वीपान्तिकेषु वै । पञ्चवर्षसहस्राणि जना जीवन्त्यनामयाः ॥ धर्म्माः पञ्च स्थितास्तेषु वर्णा
श्रमविभागजाः । वर्णाश्च तत्र चत्वारस्तान्निबोध वदामि ते ॥ आर्यकाः कुरवश्चैव विविंशा भाविनश्च ये । विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम ॥ जम्बूवृक्ष
प्रमाणस्तु तन्मध्ये सुमहांस्तरुः । प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम ॥ इज्यते तत्र भगवान् सर्ववर्णैर्जनार्दनः । सोमरूपी जगत्स्रष्टा सर्वः सर्वेश्वरो
हरिः ॥ प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपः समावृतः । तथैवेक्षुरसोदेन परिवेषानुकारिणा ॥ इत्येतत्तव मैत्रेय प्लक्षद्वीप उदाहृतः । संक्षेपेण मयाख्यातः श्रा

त्सर्वभागिनीमत॥ शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु। तेषां तु नामसंज्ञानि सप्तवर्षाणि तानि वै॥ श्वेतोऽथ हरितश्चैव जीमूतो रोहितस्तथा। वै
द्युतो मानसश्चैव सुप्रभश्च महामुने। शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः॥ विस्ताराद्द्विगुणेनाथ सर्वतः संवृतः स्थितः। तत्रापि पर्वताः सप्त विज्ञेया रत्न
योनयः॥ वर्षाभिव्यञ्जका ये तु तथा सप्त च निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः॥ द्रोणो यत्र महौषध्यः स चतुर्थो महीधरः। कङ्कस्तु पञ्चमः
षष्ठो महिषः सप्तमस्तथा॥ ककुद्मान् पर्वतवरः सरिन्नामानि मे शृणु। योनी तोया वितृष्णा च चन्द्रा शुक्ला विमोचनी॥ निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिद ३३
ाः। श्वेतं च हरितं चैव जीमूतं रोहितं तथा। वैद्युतं मानसं चैव सुप्रभं नाम सप्तमं॥ सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै। शाल्मले ये तु वर्णाश्च वसन्ति ते महामुने
॥ कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक्। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव यजन्ति तं॥ भगवन्तं समस्तस्य विष्णुमात्मानमव्ययं। वायुभूतं मख
श्रेष्ठैर्यज्विनो यज्ञसंस्थितं। देवानामत्र सान्निध्यमतीव सुमनोरमं॥ शाल्मलिश्च महावृक्षो नाम्ना निर्वृतिकारकः। एष द्वीपः समुद्रेण सुरोदेन समावृतः॥ विस्त

स्व

ाराच्छाल्मलस्यैव समेन तु समन्ततः। सुरोदकः परिवृतः कुशद्वीपेन सर्वतः॥ शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः। ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः शृणुष्व ता
न्॥ उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः। प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः॥ तस्यां वसन्ति मनुजाः सह दैतेयदानवैः। तथैव देवगन्धर्वयक्षकिं
पुरुषादयः॥ वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः। दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः। यथोक्तक
र्मकर्तृत्वात् स्वाधिकारक्षयाय ते॥ तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्दनं। यजन्तः क्षपयन्त्युग्रमधिकारफलप्रदं॥ विद्रुमो हेमशैलश्च द्युतिमान् पुष्टिमांस्तथा। कुशे
शयो हरिश्चैव सप्तमो मन्दराचलः॥ वर्षाचलास्तु सप्तैते तत्र द्वीपे महामुने। नद्यश्च सप्त तासां तु शृणु नामान्यनुक्रमात्॥ धूतपापा शिवा चैव पवित्रा सम्मति
स्तथा। विद्युदम्भा मही चान्या सर्वपापहरास्त्विमाः॥ अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः। कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत्स्मृतं॥ तत्प्रमाणेन स द्वी
पो घृतोदेन समावृतः। घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः॥ क्रौञ्चद्वीपो महाभाग श्रूयतां चापरो महान्। कुशद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तर

॥ क्रौञ्चद्वीपे द्युतिमतः सप्त पुत्रा महात्मनः। तन्नामानि च वर्षाणि तेषां चक्रे महीपतिः॥ कुशलो मनुगश्चोष्णः पीवरश्चान्धकारकः। मुनिश्च दुन्दुभिश्चैव:
सप्तैते तत्सुता मुने। तत्रापि देवगन्धर्वसेविताः सुमनोरमाः॥ वर्षाचला महाबुद्धे तेषां नामानि मे शृणु। क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः॥ देवावृ
त्पर्वतश्चात्र तथान्यः पुण्डरीकवान्। दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परं॥ द्वीपाद्द्वीपेषु ये शैलास्तथा द्वीपानि ते तथा। वर्षेष्वेतेषु रम्येषु वर्षशैलवरे
षु च॥ निवसन्ति निरातङ्काः सह देवगणैः प्रजाः। पुष्करा पुष्कला धन्या तिष्याख्या च महामुने॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमादिताः। तत्र नद्यो ६६
मैत्रेय याः पिबन्ति च ता नदीः॥ सप्त प्रधानाः शतशस्तत्रान्याः क्षुद्रनिम्नगाः। गौरी कुमुद्वती चैव संध्या रात्रिर्मनोजवा॥ ख्यातिश्च पुण्डरीका च सप्तैता वर्ष
निम्नगाः॥ तत्रापि वर्णरूपवान् पुष्कराद्यैर्जनार्दनः। यागै रुद्रस्वरूपश्च इज्यते यज्ञसंनिधौ॥ क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च। आवृतः सर्वतः
क्रौञ्चद्वीपतुल्येन मानतः॥ दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य विस्ताराद् द्विगुणेन महामुने॥ शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः

६२

। सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः॥ जलदश्च कुमारश्च सुकुमारो मणीचकः। कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः॥ तत्संज्ञान्येव तत्रापि सप्त व
र्षाण्यनुक्रमात्। तत्रापि पर्वताः सप्त वर्षविच्छेदकारिणः॥ पूर्वस्तत्रोदयगिरिर्जलधारस्तथापरः। तथा रैवतकः श्यामस्तथैवास्तगिरिर्द्विज॥ आम्बिकेय
स्तथा रम्यः केसरी पर्वतोत्तमः। शाकस्तत्र महावृक्षः सिद्धगन्धर्वसेवितः॥ यत्पत्रवातसंस्पर्शादाह्लादो जायते परः। तत्र पुण्या जनपदाश्चातुर्वर्ण्यसम
न्विताः॥ नद्यश्चात्र महापुण्याः सर्वपापभयापहाः। सुकुमारी कुमारी च नलिनी रेणुका च या॥ इक्षुश्च धेनुका चैव गभस्ती सप्तमी तथा॥ अन्याश्च शतशस्त
त्र क्षुद्रनद्यो महामुने॥ महीधरास्तत्र सन्ति शतशोऽथ सहस्रशः। ताः पिबन्ति मुदा युक्ता जलदादिषु ये स्थिताः॥ वर्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीं।
धर्महानिर्न तेष्वस्ति न संघर्षः परस्परम्। मर्यादाव्युत्क्रमो नापि तेषु देशेषु सप्तसु॥ मगाश्च मागधाश्चैव मानसा मन्दगास्तथा। मगा ब्राह्मणभूयिष्ठा मागधाः
क्षत्रियास्तु ते॥ वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मन्दगाः। शाकद्वीपे तु वै विष्णुः सूर्यरूपधरो मुने॥ यथोक्तैरिज्यते सम्यक् कर्मभिर्नियतात्मभिः। शाक

द्वीपस्तु मैत्रेय क्षीरोदेन समन्ततः ॥ शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः । क्षीराब्धिः सर्वतो ब्रह्मन् पुष्कराख्येन वेष्टितः ॥ पुष्करः शाकद्वीपात्तु द्विगुणेन समन्ततः
। पुष्करे सवनस्यापि महावीरो ऽभवत्सुतः । धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते ॥ महावीरं तथैवान्यद्धातकीखण्डसंज्ञितम् । एकश्चात्र महाभाग प्रख्यातो वर्ष
पर्वतः ॥ मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः । योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः ॥ तावदेव च विस्तीर्णः सर्वतः परिमण्डलः । पुष्करद्वीपवल
यं मध्येन विभजन्निव । स्थितोऽसौ तेन विच्छिन्नं जातं तद्वर्षकद्वयम् ॥ वलयाकारमेकैकं तयोर्वर्षं तथा गिरिः । दशवर्षसहस्राणि तत्र जीवन्ति मानवाः ॥ निरा ६१
मया विशोकाश्च रागद्वेषविवर्जिताः । अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज ॥ नेर्ष्यासूयाभयं रोषो दोषो लोभादिकं न च । महावीरं बहिर्वर्षं धातकी
खण्डमन्ततः ॥ मानसोत्तरशैलस्य देवदैत्यादिसेवितम् । सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिते । न तत्र नद्यः शैला वा द्वीपे वर्षद्वयान्विते । तस्मिन्निवस
ति ब्रह्मा पूज्यमानः सुरासुरैः ॥ स्वादूदकेनोदधिना पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्तारान्मण्डलात्तथा ॥ एवं द्वीपाः समुद्रैस्तु सप्त सप्तभि

रावृताः ॥ द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ ॥ पयांसि सर्वदा सर्वसमुद्रेषु समानि वै । न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते । स्थालीस्थमग्निसंयोगा
दुद्रेकि सलिलं यथा ॥ तथेन्दुवृद्धौ सलिलमम्भोधौ द्विजसत्तम । अन्यूनानतिरिक्ताश्च वर्धन्त्यापो ह्रसन्ति च ॥ उदयास्तमनेष्विन्दोः पक्षयोः शुक्लकृष्णयोः ॥
दशोत्तराणि पञ्चैव ह्यङ्गुलानां शतानि वै ॥ अपां वृद्धिक्षयौ दृष्टौ सामुद्रीणां महामुने । भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् ॥ षड्रसं भुञ्जते विप्र प्रजाः सर्वाः
सदैव हि । स्वादूदकस्य परतो दृश्यते लोकसंस्थितिः ॥ द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता ॥ लोकालोकस्ततः शैलो योजनायुतविस्तृतः ॥ उच्छ्रायेणापि
तावन्ति सहस्राण्यपि हि स्थितः ॥ ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् ॥ तमश्चाण्डकटाहेन समन्तात्परिवेष्टितम् ॥ पञ्चाशत्कोटिविस्तारा सेयमुर्वी महामुने ॥
सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा ॥ सेयं धात्री विधात्री च सर्वभूतगुणाधिका ॥ आधारभूता सर्वेषां मैत्रेय जगतामिति ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे
चतुर्थोऽध्यायः ॥ ॥पराशर उवाच ॥ विस्तार एष कथितः पृथिव्या भवतो मया । सप्ततिस्तु सहस्राणि द्विजोच्छ्रायोऽपि कथ्यते ॥ दशसाहस्रमेकैकं पातालं मु

मग्

निसत्तम । अतलं वितलं चैव नितलं च गभस्तिमत् । महाख्यं सुतलं चाग्र्यं पातालं चापि सप्तमं ॥ शुक्लकृष्णारुणा पीता शर्क्कराः शैलकाञ्चनाः । भूमयो यत्र मैत्रेय व-
रप्रासादशोभिता ॥ तेषु दानवदैतेय यक्षाद्यैः शतसंघशः । निवसन्ति महानागजातयश्च महामुने ॥ स्वर्लोकादपि रम्याणि पातालानीति नारदः । प्राहस्व-
र्गसदां मध्ये पातालेभ्यो गतो दिवि ॥ आह्लादकारिणः शुभ्रा मणयो यत्र सुप्रभाः । नागाभरणभूषाश्च पातालं केन तत्समं । दैत्यदानवकन्याभिरितश्चेत-
श्च शोभिते । पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते । दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपं ॥ शशिनश्च न शीताय निशि द्योताय केवलं । भक्ष्यभोज्यम- ७८
हापानमुदितैरपि भोगिभिः ॥ यत्र न ज्ञायते कालो गतोपि दनुजादिभिः । वनानि नद्यो रम्याणि सरांसि कमलाकराः ॥ पुंस्कोकिलादिलापाश्च मनोज्ञान्यम्बराणि
च । भूषणान्यतिरम्याणि गन्धाढ्यं चानुलेपनं ॥ वीणावेणुमृदङ्गानां स्वना तूर्याणि च द्विज । एतान्यन्यानि चोदारभाग्यभोग्यानि दानवैः । दैत्योरगैश्च भुज्यन्ते
पातालान्तरगोचरैः । पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ॥ शेषाख्या यद्गुणान्वक्तुं न शक्ता दैत्यदानवाः । योऽनन्तः पठ्यते सिद्धैर्देवो देवर्षिपूजितः ॥
वा ।

स सहस्रशिरा व्यक्तस्वस्तिकामलभूषणः । फणामणिसहस्रेण यः स विद्योतयन्दिशः ॥ सर्व्वान्करोति निर्वीर्यान्हिताय जगतोऽसुरान् । मदाघूर्णितनेत्रोसौ यः
सदैवैककुण्डलः ॥ किरीटी स्रग्धराभाति साग्निः श्वेत इवाचलः । नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः ॥ साभ्रगङ्गाप्रवाहोसौ कैलासाद्रिरिवापरः । लाङ्ग-
लासक्तहस्ताग्रो बिभ्रन्मुशलमुत्तमं ॥ उपास्यते स्वयं कान्त्या या च वारुणमूर्त्तिया । कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः । सङ्कर्षणात्मको रुद्रो नि-
ष्क्रम्यात्ति जगत्त्रयं । स बिभ्रच्छेखरीभूतमशेषं क्षितिमण्डलं ॥ आस्ते पातालमूलस्थः शेषोऽशेषसुरार्च्चितः । तस्य वीर्यं प्रभावश्च स्वरूपं रूपमेव च ॥ न हि वर्णयि-
तुं शक्यं ज्ञातुं च त्रिदशैरपि । यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ॥ आस्ते कुसुममालेव कस्तद्वीर्यं वदिष्यति । यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचन-
ः ॥ तदा चलति भूरेषा साद्रितोया सकानना । गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः ॥ नान्तं गुणानां गच्छन्ति ततोऽनन्तोऽयमव्ययः । यस्य नागवधूहस्तै-
र्लेपितं हरिचन्दनं ॥ तेनेयं नागवर्येण शिरसा विधृता मही । बिभर्ति मालां लोकानां सदेवासुरमानुषां ॥ इति श्री विष्णुपुराणे द्वितीयेंशे पञ्चमोध्यायः ॥ ॥

पराशर उवाच॥ ततश्च नरका विप्र भुवोऽधः सलिलस्य च। पापिनो येषु पात्यन्ते ताञ्छृणुष्व महामुने॥ रौरवः सूकरो रोधस्तालो विशसनस्तथा। महाज्वालास्तप्त
कुम्भो लवणोथ विलोहितः॥ रुधिराम्भो वैतरणी कृमीशः कृमिभोजनः। असिपत्रवनं कृष्णो लालाभक्षश्च दारुणः॥ तथा पूयवहः पापो वह्निज्वालो ह्यधःशि
राः। सन्दंशः कालसूत्रश्च तमश्चावीचिरेव च॥ श्वभोजनोथाप्रतिष्ठश्चाप्रचिश्च तथापरः। इत्येवमादयश्चान्ये नरका भृशदारुणाः॥ यमस्य विषये घोरा
शस्त्राग्निभयदायिनः। पतन्ति येषु पुरुषाः पापकर्मरतास्तु ये॥ कूटसाक्षी तथासम्यक् पक्षपातेन यो वदेत्। यश्चान्यदनृतं वक्ति स नरो याति रौरवम्॥ भ्रूणहा पु ६९
रहन्ता च गोघ्नश्च मुनिसत्तम। यान्ति ते नरकं रोधं यश्चोच्छ्वासनिरोधकः॥ सुरापो ब्रह्महा हर्ता सुवर्णस्य च सूकरे। यान्ति यान्नरकं यश्च तैः संसर्गमुपैति
वै॥ राजन्यवैश्यहा ताले तथैव गुरुतल्पगः। तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः॥ साध्वीविक्रयकृद्बन्धपालः केसरविक्रयी। तप्तलोहे पतन्त्येते यश्च
भक्तं परित्यजन्॥ स्नुषां सुतां चापि गत्वा महाज्वाले निपात्यते। अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः॥ वेददूषयिता यश्च वेदविक्रयकश्च यः। अगम्यगा



मीयश्च स्यात्ते यान्ति लवणं द्विज॥ चौरो विलोहे पतति मर्यादादूषकस्तथा। देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः॥ स याति कृमिभक्षे वै कृमीशे च दुरिष्टकृत्
। पितृदेवातिथींस्त्यक्त्वा पर्यश्नाति नराधमः॥ लालाभक्षे स यात्युग्रे शरकर्ता च वेधके। करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः॥ प्रयान्त्येते विशसने नरके
दारुणे। असत्प्रतिग्रहीता तु नरके यात्यधोमुखे॥ अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः। वेगी पूयवहे चैको याति मिष्टान्नभुङ्नरः॥ लाक्षामांसरसानां च
तिलानां लवणस्य च। विक्रेता ब्राह्मणो याति तमेव नरकं द्विज॥ मार्जारकुक्कुटच्छागश्ववराहविहङ्गमान्। पोषयन्नरकं याति तमेव द्विजसत्तम॥ रङ्गो
पजीवी कैवर्त्तः कुण्डाशी गरदस्तथा। सूची माहिषिकश्चैव पर्वगामी च यो द्विज॥ आगारदाही मित्रघ्नः शकुनिग्रामयाजकः। रुधिरान्धे पतन्त्येते सोमं विक्रीण
ते च ये॥ मधुहा ग्रामहन्ता च याति वैतरणीं नरः। रेतःपातादिकर्त्तारो मर्यादाभेदिनो हि ये॥ ते कृच्छ्रे यान्त्यशौचाश्च कुहकाजीविनश्च ये। असिपत्र
वनं याति वनच्छेदी वृथैव यः। औरभ्रिका मृगव्याधा वह्निज्वाले पतन्ति वै॥ यान्त्येते द्विज तत्रैव ये चापाकेषु वह्निदाः। व्रतानां लोपको यश्च स्वाश्रमाद्विच्युतश्च

यः॥संध्ययोर्यानसामध्ये पतनस्तावुभावपि।दिवास्वप्नप्रसक्तश्च पतनावधकवाविनः॥पूर्वोक्तश्चापि नायवतपतन्ति श्वभोजन।एते चान्ये च नरकाः शत
शोऽथसहस्रशः॥तेषु दुःकृतिकर्म्माणः पच्यन्ते यातनागताः॥तथैव पापान्येतानि तथान्यानि सहस्रशः॥भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः॥वर्णाश्रम
विरुद्धं च कर्म्म कुर्व्वन्ति ये नराः॥कर्म्मणा मनसा वाचा निरयेषु पतन्ति ते।अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः॥देवाश्चाधोमुखान्सर्व्वानधः पश्यन्ति
नारकान्॥स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः॥धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमं॥सहस्रभागप्रथमा द्वितीयानुक्रमास्तथा॥सर्व्वे ह्येते महाभाग यावन्मुक्तिसमाश्रयाः॥यावन्तो ज ७०
न्तवः स्वर्गे तावन्तो नरकौकसः॥पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः॥पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा।तथा तथैव संस्मृत्य प्रोक्तानि परमे
ष्ठिना॥पापे गुरूणि गुरूणि स्वल्पान्यल्पे च तद्विदः॥प्रायश्चित्तानि मैत्रेय जगुः स्वायम्भुवादयः॥प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै।यानि तेषा
मशेषाणां कृष्णानुस्मरणं परं॥कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते।प्रायश्चित्तन्तु तस्यैकं हरिसंस्मरणं परं॥प्रातर्न्निशि तथा संध्यामध्याह्नादिषु संस्म

रन्।नारायणमवाप्नोति सद्यः पापक्षयं नरः॥विष्णुसंस्मरणात्क्षीणसमस्तक्लेशसंचयः।मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते॥वासुदेवे मनो यस्य जप
होमार्च्चनादिषु।तस्यान्तरायो मैत्रेय दहर्न्निशं विष्णुं संस्मरन्पुरुषो मुने॥न याति नरकं शुद्धः संक्षीणाखिलपातकः।मनःप्रीतिकरः स्वर्गो नरकस्तद्विप
र्ययः॥नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम।वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च॥कोपाय च यतस्तस्माद्वस्तु दुःखात्मकं कुतः॥तदेव प्रीतये भूत्वा पु
नर्दुःखाय जायते॥तदेव कोपाय यतः प्रसादाय च जायते।तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकं।मनसः परिणामोऽयं सुखदुःखोपलक्षणः॥भूः
नभवपरीलोका सत्यलोका विराजते॥भूपन्नर्भावकायत्रब्रह्मलोकादिसंस्थितः।पादगम्यस्तु यत्किंचिद्वस्त्वस्ति पृथिवीमयं॥स भूर्लोकः समाख्यातो विस्त
रोऽस्य मया द्विज॥भूमिसूर्यान्तरं यच्च सिद्धादिमुनिसेवितं॥भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम।ध्रुवसूर्यान्तरं यच्च नियुतानि चतुर्द्दश॥स्वर्लोकः सोऽपि ग
दितो लोकसंस्थानचिन्तकैः।त्रैलोक्यमेतत्कृतकं मैत्रेय परिपठ्यते॥जनस्तपस्तथा सत्यमिति चाकृतकं त्रयं।कृतकाकृतयोर्मध्ये महर्लोक इति श्रुतिः

॥श्च्यारुवमितिकल्पान्तं यावत्तिष्ठन्ति न विनश्यति । एतत्सप्तकमयालोका मैत्रेय कथितास्तव ॥ पातालानि च सप्तैव ब्रह्माण्डस्यैष विस्तरः ॥ एतदण्डकटाहेन तिर्यक्चोर्ध्वम
धस्तथा ॥ कपित्थस्य यथा बीजं सर्वतो वै समावृतं । दशोत्तरेण पयसा मैत्रेयाण्डं च तद्वृतं ॥ सर्वोम्बुपरिधानोसौ वह्निना वेष्टितो बहिः ॥ वह्निश्च वायुना वायुर्मैत्रेय
नभसावृतः ॥ भूतादिना नभः सोपि महता परिवेष्टितः ॥ दशैतान्यवशेषाणि मैत्रेयैतानि सप्त वै ॥ महान्तञ्च समावृत्य प्रधानं समवस्थितं । अनन्तस्य न तस्या
न्तः संख्यानं चापि विद्यते ॥ तदनन्तमसंख्यातप्रमाणं चापि वै यतः । हेतुभूतमशेषस्य प्रकृतिः सा परा मुने ॥ अण्डानान्तु सहस्राणां सहस्राण्ययुतानि च । ईदृ ७१
शानां तथा तत्र कोटिकोटिशतानि च ॥ दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । प्रधानेवस्थितो व्यापी चेतनात्मात्मवेदनः ॥ प्रधानञ्च पुमांश्चैव सर्वभूतात्म
भूतया । विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥ तयोः सैव पृथग्भावकारणं संश्रयस्य च । क्षोभकारणभूता च सर्गकाले महामते ॥ यथा शैत्यं जले वातो बिभर्त्ति कणिका
गतं । जगच्छक्तिस्तथा विष्णोः प्रधानपुरुषात्मिका ॥ यथा च पादपो मूलस्कन्धशाखादिसंयुतः ॥ आदिबीजात्प्रभवति बीजान्यन्यानि वै ततः ॥ प्रभवन्ति ततस्ते

मपु१

भ्यो भवन्त्यन्ये द्रुमाः ॥ तेपि तल्लक्षणद्रव्यकारणानुगता मुने ॥ एवमव्याकृतात्पूर्वं जायन्ते महदादयः ॥ विशेषान्तास्ततस्तेभ्यः सम्भवन्त्यसुरादयः ॥ तेभ्य
श्च पुत्रास्तेषाञ्च पुत्राणामपरे सुताः ॥ बीजाद्वृक्षप्ररोहेण यथा नापचयस्तरोः ॥ भूतानां भूतसर्गेण नैव नापचयस्तथा । सन्निधानाद्यथाकाशकालाद्याः कार
णं तरोः ॥ तथैवापरिणामेन विश्वस्य भगवान्हरिः ॥ व्रीहिबीजं यथा मूलं नालं पत्राङ्कुरौ तथा ॥ काण्डं कोषस्तथा पुष्पं क्षीरं तद्वच्च तण्डुलः ॥ तुषाः कणाश्च सन्तो वै या
न्त्याविर्भावमात्मनः ॥ प्ररोहहेतुसामग्रीमासाद्य मुनिसत्तम । तथा कर्म्मस्वनेकेषु देवाद्यास्तनवः स्थिताः ॥ विष्णुशक्तिं समासाद्य प्ररोहमुपयान्ति वै ॥ स च
विष्णुः परं ब्रह्म यतः सर्वमिदं जगत् ॥ जगच्च यो यत्र चेदं यस्मिंश्च लयमेष्यति । तद्ब्रह्म तत्परं धाम सदसत्परमं पदं ॥ यस्य सर्वमभेदेन जगदेतच्चराच
रं । स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः ॥ तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति ॥ कर्त्ता क्रियाणां स च इज्यते क्रतुः स एव तत्कर्म्मफलञ्च तस्य यत् ।
स्रगादि यत्साधनमप्यशेषतो हरेर्न्न किञ्चिद्व्यतिरिक्तमस्ति ॥ इति श्रीविष्णुपुराणे द्वितीयेंशे सप्तमोध्यायः ॥ ॥ व्याख्यातमेतद्ब्रह्माण्डसंस्थानं तव सुव्रत

त।तत्कःप्रमाणसंख्याने सूर्यादीनां शृणुष्व मे॥योजनानां सहस्राणि भास्करस्य रथस्तथा नव।ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम॥सार्द्धकोटिस्तथा सप्त नियु
तान्यधिकानि वै।योजनानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितं॥त्रिनाभिमति पंचारे षण्नेमिन्यक्षयात्मके।संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितं॥चत्वारिंशत्सह
स्राणि द्वितीयोक्षो विवस्वतः।पंचान्यानि तु सार्द्धानि स्यन्दनस्य महामते।अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः॥ह्रस्वोक्षस्तद्युगार्द्धं तु ध्रुवाधारे रथस्य वै॥द्विती
येक्षे तु तच्चक्रं संस्थितं मानसाचले।हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु॥गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च।अनुष्टुप्पंक्तिरित्युक्ताश्छन्दांसि हरयो ७२
याद्दवश्च मानसोत्तरशैले तु पूर्वतो वासवी पुरी।दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य च॥उत्तरेण च सोमस्य तासां नामानि मे शृणु।वस्वौकसारा शक्रस्य या
म्या संयमनी तथा।पुरी सुखा जलेशस्य सोमस्य तु विभावरी॥काष्ठां गतो दक्षिणतः क्षिप्तेषुरिव सर्पति।मैत्रेय भगवान्भानुर्ज्योतिषां चक्रसंयुतः॥अहोरा
त्रव्यवस्थानकारणं भगवान्रविः।देवयानः परः पन्था योगिनां क्लेशसंक्षये॥दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः।सर्वद्वीपेषु मैत्रेय निशार्द्धस्य च सम्मु

खः॥उदयास्तमने चैव सर्वकालं तु सम्मुखः।निशास्वशेषासु तथा मैत्रेय विदिशासु च॥यैर्यत्र दृश्यते भास्वान्स तेषामुदयः स्मृतः।तिरोभावं च यत्रैति तत्रै
वास्तमनं रवेः॥नैवास्तमनमर्कस्य नोदयः सर्वदा सतः।उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः।शक्रादीनां पुरे तिष्ठन्स्पृशत्येष पुरत्रयं॥विकर्णौ द्वौ
विकर्णस्थस्त्रीन्कोणान्द्वे पुरे तथा।उदितो वर्द्धमानाभिरामध्याह्नात्तपन्रविः॥ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति।उदयास्तमनाभ्यां च स्मृते पूर्वापरे
दिशौ॥यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः।ऋते अमरगिरेर्मेरोरुपरि ब्रह्मणः सभां॥ये ये मरीचयोर्कस्य प्रयान्ति ब्रह्मणः सभां।ते ते निरस्तास्त
द्भासा प्रतीपमुपयान्ति वै॥तस्माद्दिश्युत्तरस्यां वै दिवा रात्रिः सदैव हि।सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः॥प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे।विशत्य
ग्निमतो रात्रौ वह्निर्दूरात्प्रकाशते॥वह्निपादस्तथा भानोर्दिनेष्वाविशति द्विज।अतीव वह्निसंयोगादतः सूर्यः प्रकाशते॥तेजसी भास्कराग्नेये प्रकाशोष्णस्वरू
पिणी।परस्परानुप्रवेशादाप्यायेते दिवानिशं॥दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्करे।अहोरात्रं विशत्यम्भस्तमःप्राकाश्यशीलवत्॥आताम्रा हि भवन्त्या

पा दिवानक्तप्रवेशनात् । दिनं विशति वै वाम्भो भास्करेस्तमुपागते ॥ तस्माच्छुक्ली भवन्त्यापो नक्तमह्नः प्रवेशनात् । एवं पुष्करमध्येन यदा याति दिवाकरः ॥ त्रिं
शद्भागन्तु मेदिन्यास्तदा मौहूर्त्तिकी गतिः । कुलालचक्रपर्यन्तो भ्रमन्नेष दिवाकरः । करोत्यहस्तथा रात्रिं विमुञ्चन्मेदिनीं द्विज । अयनस्योत्तरस्यादौ मकरं याति
भास्करः ॥ ततः कुम्भञ्च मीनञ्च राशे राश्यन्तरं द्विज । त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ॥ प्रयाति सविता कुर्वन्नहोरात्रं ततः समम् । ततो रात्रिः क्षयं याति
वर्द्धतेनुदिनं दिनं ॥ ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः । राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनं ॥ कुलालचक्रपर्यन्तो यथा शीघ्रं विवर्त्तते । तथातिवेगि ७३
गत्या कालं वायुमार्गविलाश्रवनं ॥ तस्मात्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति । सूर्यो द्वादशभिः शैघ्र्यान्मुहूर्त्तैर्द्दक्षिणायने ॥ त्रयोदशार्द्धमृक्षाणां मह्नान्तु
चरते द्विज । मुहूर्त्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् ॥ कुलालचक्रमध्यस्थो यथा मन्दं विसर्प्पति । तथोदगयने सूर्यः सर्प्पते मन्दविक्रमः ॥ तस्माद्दीर्घे
ण कालेन तु भूमिमल्पान्तु गच्छति । अष्टादश मुहूर्त्तं यदुत्तरायणपश्चिमं ॥ अहर्भवति तच्चापि चरते मन्दविक्रमः । त्रयोदशार्द्धमह्नान्तु ऋक्षाणां चरते रवि

ः । मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥ अतो मन्दतरं नाभ्यां चक्रं भ्रमति वै यथा ॥ मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा । कुलालचक्रनाभिस्तु यथा त
त्रैव वर्त्तते ॥ ध्रुवस्तथा हि मैत्रेय तत्रैव परिवर्त्तते । उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि च ॥ दिवा नक्तञ्च सूर्यस्य मन्दा शीघ्रा च वै गतिः । मन्दाह्नि यस्मिन्नय
ने शीघ्रा नक्तन्तथा गतिः । शीघ्रा निशि यदा चास्य तदा मन्दा गतिर्द्दिवा ॥ एकप्रमाणमेवैष मार्गं याति दिवाकरः । अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ॥ षड
व राशीन् यो भुङ्क्ते रात्रावन्यांश्च षड् दिवा । राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने ॥ तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता । दिनादेर्द्दीर्घह्रस्वत्वं तद्भोगेनै
व जायते । उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्द्दिवा । दक्षिणे त्वयने चैव विपरीता विवस्वतः ॥ उषा रात्रिः समाख्याता व्युष्टिश्चाप्युच्यते दिनं । प्रोच्यते च तथा सं
ध्या उषाव्युष्ट्योर्यदन्तरं । सन्ध्याकाले तु सम्प्राप्ते रौद्रे परमदारुणे ॥ मन्देहा राक्षसा घोराः सूर्यमिच्छन्ति खादितुं । प्रजापतिकृतः शापस्तेषां मैत्रेय रक्षसां ॥ अ
क्षयत्वं शरीराणां मरणञ्च दिने दिने । ततः सूर्यस्य तैर्युद्धं भवत्यत्यन्तदारुणं ॥ ततो द्विजोत्तमास्तोयं यत्क्षिपन्ति महामुने । ओंकारब्रह्मसंयुक्तं गायत्र्याचा

हिमन्द्रिकी॥ दक्षकन्ननपापाक्र्जाहूतनवाविना।अम्भिदात्त द्रूपपया।समन्त्रा प्रथमार्गे निष्ठाःसूर्याभिमुखःसत्प्रांशुःकृत्वा दीप्यतिनाकृतः।ॐकारार:
गवाद्विषु त्रिधमावतसापाकिः।तद्याव्रणसहस्तु विनाशयाकिवादसाः॥विष्णुवांशःपवःसूर्याप्रांकर्षाजितसीभूतः।अक्षिप्रायकतुं कावस्कृस्यस्प्रवक
ःपवः।तेनतस्मुविनिश्चा।निशाकीवणा।पयीप्तिमतू॥दस्त्ययशेषवत्कोपि मन्देहाख्यानयानिवे।तस्मात्कालेघनेकार्यं सन्ध्योपासनकर्म्मणिः॥सहस्रि
र्यसंध्यायीत्नापाकिंकृत्वतहिमः।ततःप्रयाति गवानत्राक्कोणैव तिवद्विनः॥वालखिल्यादिदिव्यैवड्गतःपालनागतः।काष्ठानिमेषादश पञ्चैव १४
त्रिंशत्काष्ठागणयत्कलान्की।त्रिंशत्कलाश्चैव भवन्मुहूर्त्तः स्फुत्रिंशतावाप्यदनीसमतः॥त्रासत्कौखत्यहोरात्रि दिवसानायथाक्रमं।सन्ध्यामुहूर्त्तमाख्यातं
ह्रासवृद्धीसमास्मृता।लेखात्प्रभृत्यथादित्ये त्रिमुहूर्त्तगतेरवौ॥प्रातस्तनःस्मृतःकालाभागश्चाह्नःसपंचमः।तस्मात्प्रातस्तनात्कालात्त्रिमुहूर्त्तस्तुसंगमः॥
मध्याह्नस्त्रिमुहूर्त्तस्तु तस्मात्कालात्तुसंगवात्।तस्मान्मध्याह्निकात्कालादपराह्ण इष्यतेः॥जेषएवमुहूर्त्तस्तु कालभागस्मृतोबुधैः।अपराह्णव्यतीप

तःकालःसायाह्न उच्यते॥दशपंचमुहूर्त्तोसौ मुहूर्त्तस्तु यएव वा।दशपंचमुहूर्त्तोवै अहर्वैषुवतेस्मृतं॥वर्द्धते दार्ढ्ये सतिव अयनदक्षिणामहः व।अह
स्तु यसतवाजिवा।निर्गसतिवासरं॥शरद्वसन्तयोर्मध्ये विषुवन्तु विभाव्यते।तुलामेषगतेभानौ समरात्रिदिनेतुतत्॥कर्कटावस्थितेभानौ दक्षिणायनमु
च्यते।उत्तरायणमप्युक्तं मकरस्थे दिवाकरे॥त्रिंशन्मुहूर्त्तकाघंउमहोरात्र तु यन्मया।तानि पक्षे दशप्रच्छन्नपक्षःस्यति धीयते॥मासपक्षद्वयानाम
मासौवा ऋतुः।तूलसंयरे संपन्न अयनवर्षदिङ्किने॥संवत्सरादयःपंचवातुमासविकल्पिताः।निश्चयःसर्वकालस्य मूगमित्यभिधीयते॥संवत्स
रस्तु प्रथमा द्वितीयःपरिवत्सरः।तद्वत्संवत्सरो यस्तु चतुर्थश्चानुवत्सरः॥वत्सरःपंचमश्चात्र कालोऽयंयुगसंज्ञितः।यःश्रवणस्याहूतःशैलशृङ्गवानि
कि विस्तृतः।त्रीणितस्यतु शृङ्गाणि येषुवसीशगवास्थितः।दक्षिणी वाल्यवयेव मध्यवैवस्वतेतथा॥मध्यवैवस्वतेतथा।गनद्वयेतथा मध्ये नक्षत्रांनुःप्रतिपद्यते॥म
षादीवतुलामेषवयोर मेषयाविषुवतिस्थतः।तयातुल्यमहोरात्रं करोति तिमिरापहः॥दशपंचमुहूर्त्तैर्वे तपतद्रूपस्मृतं।प्रथमकृत्तिकाभागेषुयदास्वा

कृत्तिकानां॥ विशाखानां चतुर्थांशे मुनिसत्तम तिष्ठति। विशाखानां यदा सूर्यश्चरत्यंशं तृतीयकं॥ तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितं। तदैव विषुवाख्योऽयं
कालः पुण्योऽभिधीयते॥ तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः। ब्राह्मणेभ्यः पितृभ्यश्च मुखमेतत्तु दानजं॥ दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते। अ
होरात्राधिमासौ तु कलाः काष्ठाः क्षणास्तथा॥ पौर्णमासी तथा ज्ञेया अमावास्या तथैव च। सिनीवाली कुहूश्चैव राका चानुमतिस्तथा॥ तपस्तपस्यौ मधुमाधवौ
च शुक्रः शुचिश्चायनमुत्तरं स्यात्। नभो नभस्योऽथ इषः सहोर्जः सहः सहस्याविति दक्षिणं स्यात्॥ लोकालोकस्तु यः शैलः प्रागुक्तो भवतो मया। लोकपालास् १३
तु चत्वारस्तत्र तिष्ठन्ति सुव्रताः॥ सुधामा शंखपाच्चैव कर्दमस्यात्मजो द्विज। हिरण्यरोमा चैवान्यश्चतुर्थः केतुमानपि॥ निर्द्वन्द्वा निरभिमाना निस्तन्द्रा निःपरि
ग्रहाः। लोकपालाः स्थिता ह्येते लोकालोके चतुर्दिशं॥ उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणं। ऊर्ध्वं सप्तर्षिभ्यः पन्था देवयानस्तु स स्मृतः। पितृयानः स वै पन्थाः
वैश्वानरपथाद्बहिः॥ तत्रासते महात्मान ऋषयोऽग्निहोत्रिणः। भूतारम्भकृतं ब्रह्म शंसन्त ऋत्विगुद्यताः॥ प्रारभन्ते तु ये लोकास्तेषां पन्थाः स दक्षिणः। चलि

३१

तं ते पुनर्ब्रह्म स्थापयन्ति युगे युगे॥ संतत्या तपसा चैव मर्यादाभिः श्रुतेन च। जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै॥ पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेष्वि
ह। एवमावर्तमानास्ते तिष्ठन्त्याभूतसंप्लवात्॥ सवितुर्दक्षिणं मार्गं श्रिता ह्याचन्द्रतारकं। नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणं॥ उत्तरः सवितुः पन्था दे
वयानस्तु स स्मृतः। तत्र ते वशिनः सिद्धा विमला ब्रह्मचारिणः॥ संततिं ते जुगुप्सन्ति तस्मान्मृत्युर्जितश्च तैः। अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसां॥ उ
दक्पन्थानमर्यम्णः श्रितान्याभूतसंप्लवात्। तेऽसम्प्रयोगाल्लोभस्य मैथुनस्य च वर्जनात्॥ इच्छाद्वेषाप्रवृत्त्या च भूतारम्भविवर्जनात्। इच्छाद्वेषाप्रवृत्त्यादि भूतार
म्भविवर्जनात्। पुनश्चाकामसंयोगाच्छब्दादेर्दोषदर्शनात्॥ इत्येभिः कारणैः शुद्धास्तेऽमृतत्वं हि भेजिरे। आभूतसंप्लवस्थानममृतत्वं विभाव्यते॥ त्रैलोक्य
स्थितिकालोऽयमपुनर्मार उच्यते। ब्रह्महत्याश्वमेधाभ्यां पुण्यपापकृतो विधिः॥ आभूतसंप्लवान्ते तु क्षयमुक्तं तयोर्द्विज। यावन्मात्रप्रदेशे तु मैत्रेयावस्थितो
द्विजः॥ क्षयमायाति तावत्तु भूमेराभूतसंप्लवे। ऊर्ध्वोत्तरमृषिभ्यस्तु ध्रुवो यत्र व्यवस्थितः॥ एतद्विष्णुपदं दिव्यं तृतीयं व्योम्नि भासुरं। निर्धूतदोषपंकानां यतीनां सं

यत्रास्नातीक्तोनरस्त्वरमांविप्रपुण्यपापविवर्जितः।अपुण्यपुण्योपरमक्षीणाशेषाखिलमतः।यत्रगत्वानशोचन्ति तद्विष्णोः परमंपदं॥यत्रारुह्यभगवत्स्त्राति
वयं हि तं सवयावन्ते।ज्ञात्वायं विमुच्यन्ते तद्विष्णोः परमंपदं॥दिवीव चक्षुराततं यो गिनां तन्मयात्मना।विवेकयानरूढं यत् तद्विष्णोः परमंपदं॥यस्मिन्प्र
तिष्ठितं ह्याखिलं मनोरूपं स्वयं ध्रुवः।ध्रुवं च परं वैष्णवीं ग्याति सम्यगाम्यादिज॥ भगवत्यां तत्परं श्रेष्ठं पापपापिनी।आप्यायनी च सर्वेषां देवादीनां
महामुने॥ ततस्तस्य अङ्गुष्ठान्निर्याता पापिनाशकारिणी विष्णुपदीः।ततः कारणं गत्वा नक्तं स्नात्वा सिन्धुपुनः॥एवमनल्प दं विष्णोः कृतीयममलात्मकं।आश्चर्यं कृतीशाः नै८
कानीत्रयाणां रक्षकावर्णी॥ गङ्गाप्रवाहत्रयाक्षं सर्वपापहरा सरित्॥गङ्गा च गङ्गा नाम नीमनूलपनपिङ्गला।वामपादाम्बुजाङ्गुष्ठ नखस्रोतो विनिर्गता॥
विष्णोर्विभर्ति यां भक्त्या शिरसाहर्निशं ध्रुवः।ततः सप्तर्षयो यस्याः प्राणायामपरायणाः॥तिष्ठन्ति वीचिमालाभिः उह्यमानजटाजलं।वार्षौघैः सन्ततैर्यस्याः
प्लावितं शशिमण्डलं॥ भूयोधिकतमांकान्तिं वहत्ययं तदधिकं।मेरुपृष्ठे पतत्युच्चैर्निष्क्रान्ता शशिमण्डलात्॥जगतः पावनार्थायं यात्रा प्रयाति च दिक्षु॥

नं१

गावालकनन्दा च वैकुण्ठमार्गव्यवस्थिता॥एके चरणं वरुणादिग्वदं गतिं लक्षणा।शुद्धवालकनन्दाख्यां यस्याः सम्पापि दक्षिणे॥दधार शिरसा प्रीत्या वर्षाणामधि
कं शतं।शम्भो जटाकलापाच्च विनिष्क्रान्ता स्थिता शङ्करात्॥प्लावयित्वा दिवं निन्ये या पापान्सगरात्मजान्।स्नानस्य सलिलं यस्याः सद्यः पापं प्रणाशयति॥अपूर्वपुण्य
सम्प्राप्यपुण्यप्राप्तिश्च सद्या मैत्रेय जायते।दत्ताः पितृभ्यो यत्रापि स्मृतयोः श्रद्धया विभोः॥ समास्त्रयोपयच्छन्ति तृप्तिं मैत्रेय दुर्लभां।यस्यामिष्ट्वा महायज्ञैर्यज्ञेशं
पुरुषोत्तमं॥ द्विजभूपाः परां सिद्धिमवापुर्दिवि चेह च।स्नानादिधूतपापाश्च यच्छालयतयस्तथा॥केशवासक्तमनसः प्राप्ता निर्वाणमुत्तमं।यतः सा पावनार्थाय
त्रयाणां जगतामपि॥समुद्भूता परं तत्तु तृतीयं भगवत्पदं॥ ॥ इति श्रीविष्णुपुराणे द्वितीयांशे अष्टमोऽध्यायः॥ पराशर उवाच॥तारामयं भगवतः शिशु
माराकृतिः प्रभोः।दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः॥सैष भ्रमन्भ्रामयति चन्द्रादित्यादिकान्ग्रहान्।भ्रमन्तमनुतं यान्ति नक्षत्राणि च चक्रवत्॥सूर्या
चन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह।वाताबद्धा नमयेन ध्रुवे बद्धानि तानि वै॥शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि।नारायणपरं धाम्नो तस्याधारः

हि२

स्वर्गीयं हृदि॥ उत्तानपादपुत्रस्तु तमाराध्य प्रजापतिं। स तारा शिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः॥ आधारः शिशुमारस्य सर्वाध्यक्षो जनार्दनः। ध्रुवस्य शिशुमार
स्थो ध्रुवस्तत्र व्यवस्थितः। तदाधारं जगच्चेदं सदेवासुरमानुषं। येन विप्र विधानेन तन्मे एकमनाः शृणु॥ विवस्वानष्टमो मासैर्ग्रसत्यापो रसात्मिकाः। वर्षत्यथ
तच्चान्नमन्नाद्यप्यखिलं जगत्॥ विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलं। सोमं पुष्यत्यथेन्दुश्च वायुनाडीमयैर्दिवि॥ नालैर्विक्षिपत्यभ्रेषु धूमाग्न्यनिलमू
र्तिषु। न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः॥ अभ्रस्थाः प्रपतन्त्यापो वायुना समुदाहृताः। संस्कारं कालजनितं मैत्रेयासाद्य निर्मलाः॥ सरित्स ११
मुद्रभौमास्तु तथापः प्राणिसम्भवाः। चतुःप्रकारा भगवानादत्ते सविता मुने॥ आकाशगङ्गासलिलं तथादाय गभस्तिमान्। अनभ्रगतमेवोर्व्यां सद्यः क्षिपति
रश्मिभिः॥ तस्य संस्पर्शनिर्धूतपापपङ्को द्विजोत्तम। न याति नरकं मर्त्यो दिव्यं स्नानं हि तत्स्मृतं॥ दृष्टसूर्यं हि यद्वारि पतत्यभ्रैर्विना दिवः। आकाशगङ्गा
सलिलं तद्गोभिः क्षिप्यते रविः॥ कृत्तिकादिषु ऋक्षेषु विषमेष्वम्बु यद्दिवः। दृष्टार्कं पतितं ज्ञेयं तद्गाङ्गं दिग्गजोज्झितं॥ युग्मर्क्षेषु तु यत्तोयं पतत्यर्कोज्झि

धू

तं दिवः। तत्सूर्यरश्मिभिः सर्वं समादाय निरस्यते॥ उभयं पुण्यमत्यर्थं नृणां पापहरं द्विज। आकाशगङ्गासलिलं दिव्यं स्नानं महामुने॥ यत्तु मेघैः समुत्सृ
ष्टं वारि तत्प्राणिनां द्विज। पुष्णात्योषधयः सर्वा जीवनायामृतं हि तत्॥ तेन वृद्धिं परां नीतः सकलश्चौषधीगणः। साधकः फलपाकान्तः प्रजानां द्विज जायते॥
तेन यज्ञान्यथाप्रोक्तान्मानवाः शास्त्रचक्षुषः। कुर्वन्त्यहरहस्तैश्च देवानाप्याययन्ति ते॥ एवं यज्ञाश्च वेदाश्च वर्णाश्च द्विजपूर्वकाः। सर्वे देवनिकायाश्च व
र्णाश्च द्विजपूर्वकाः। सर्वे देवनिकायाश्च पशुभूतगणाश्च ये। वृष्ट्या धृतमिदं सर्वं मन्नं निष्पाद्यते यया॥ सापि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तम। आधा
रभूतः सवितुर्ध्रुवो मुनिवरोत्तम॥ ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणात्मकः। हृदि नारायणस्तस्य शिशुमारस्य संस्थितः॥ बिभर्ता सर्वभूतानामादिभूतः सना
तनः॥ इति श्रीविष्णुपुराणे द्वितीयांशे नवमोऽध्यायः॥ ॥पराशर उवाच॥ अशीतिमण्डलशतं काष्ठयोरुभयोर्यतः। आरोहणावरोहाभ्यां भानोरब्देन या
गतिः॥ स रथोऽधिष्ठितो देवैरादित्यैरृषिभिस्तथा। गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः॥ धाता क्रतुस्थला चैव पुलस्त्यो वासुकिस्तथा। रथभृद्ग्रामणीर्हे

भिस्तुम्बरुश्चैव सफम४॥ एतवसन्तिके वैशेष मधुमास सदेवहि। मैत्रयस्यन्दनरूणा४ सफमासाधिकारिणः॥ अर्यमा पुलहश्चैव रथौजापुञ्जिकस्थला। पहति
४कच्छनीरश्च नारदश्चरथस्वनः माधवे निवसन्त्येते शुक्रसंज्ञे निबोधत॥ मित्रात्रिस्तक्षकश्चैव पौरुषेयोऽथ मेनका। हाहा रथस्वनश्चैव मैत्रयेण वस
न्ति वै॥ वसिष्ठो वरुणो रम्भा सहजन्या हूहू रथः। रथचित्रस्तथा मासे वसन्त्याषाढसंज्ञके॥ विश्वावसुरङ्गिराः प्रम्लोचा नागोऽथ ऐलापत्रस्तथा। विश्वासीस नभस्यापि
कार्त्तिके वाधिकारिणः॥ इन्द्रश्च पुलस्त्यमेव स्यूतोऽप्सरा शङ्खपालस्तथावरुणी॥ विवस्वान् तस्था विष्णुमार्गशीर्षाधिकारिणः॥ क्रतुरुरगस्तथा अष्टाङ्गवसुः सूर्य४ कर्कोटकस् ७८
था॥ पूषिष्ठ नामिश्चैवाप्यायुर्विश्वावसुनामा४। पौषमासे वसन्त्येते सफलाः नभगुणे॥ लोकप्रकाशनार्थाय विप्रवर्याधिकारिणः४ द्वष्टाथ जमदग्निश्च क
म्बलाथ तिलोत्तमा४॥ ब्रह्मापवोथ अङ्गतिः धृतराष्ट्रश्च सफम४॥ माघमासे वसन्त्येते सफमैत्रयसत्तम॥ अथ सर्वाङ्गेपवस्त्रर्थे फाल्गुने निवसन्ति या। विष्णुरश्व
तरो रम्भा सूर्यवर्चाश्च सत्यजित्। मासमेतत्पूर्वमैत्रय वसन्त्यात्र सफकाः४॥ सवितुर्मण्डलं ब्रह्मन् विष्णुशक्त्युपबृंहिताः४ स्तुवन्ति मुनयः४ सूर्यं गन्धर्वैर्गीयते

कृ१

पुरः४॥ नृत्यन्त्यप्सरसो यान्ति सूर्यस्यानु निशाचराः४। वहन्ति पन्नगा यक्षैः४ क्रियतेऽभीषुसंग्रहः४॥ वालखिल्यास्तथैवैनं परिवार्य समासते। सोऽयं सफगणः४ सूर्य
मण्डले मुनिसत्तम॥ हिमोष्णवारिवृष्टीनां हेतुः४ स्वसमयागतः४॥ श्रीविष्णुपुराणे द्वितीयांशे दशमोऽध्यायः४॥ ॥मैत्रेय उवाच॥ यदेतद्भगवानाह गणः४ स
प्तविधो रवेः४ मण्डले हिमतापादेः४ कारणं तन्मया श्रुतम्॥ व्यापाराश्चापि कथिता गन्धर्वोरगरक्षसाम्। ऋषीणां वालखिल्यानां तथैवाप्सरसां गुरो॥ यक्षाणां च
रथे तानां विष्णुशक्तिधृतात्मनाम्॥ किं चादित्यस्य यत्कर्म तन्नात्रोक्तं महामुने॥ यदि सफगणो वारि हिममुष्णं च वर्षति। तत्किमत्र रवेर्येन वृष्टिः सूर्यादितीर्यते॥
विवस्वानुदितो मध्ये यात्यस्तमिति किं जनः४ ब्रवीत्येतत्समं कर्म यदि सफगणस्य तत्॥ ॥पराशर उवाच॥ मैत्रेय श्रूयतामेतद्यद्भवान्परिपृच्छति। यथा सफ
गणेऽप्येकः४ प्राधान्येनाधिको रविः४॥ या तु शक्तिः४ परा विष्णोरृग्यजुःसामसंज्ञिता। सैषा त्रयी तपत्यंहो जगतश्च हिनस्ति यत्॥ सैव विष्णुः४ स्थितः४ स्थित्यां जगतः४ पा
लनाय तु४॥ ऋग्यजुः४सामभूतोऽन्तः४ सवितुर्द्विज तिष्ठति॥ मासि मासि रविर्यो यस्तत्र तत्र हि सा परा४। त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै॥ ऋचः स्तुवन्ति

पूर्वाह्ने मध्याह्ने चैव यत्कृष्णमेः। वहुद्रव्यनवादीनि सामान्यं कृः शृणुयत्ववी ॥ अंगभवा त्वयी। विष्णुः अग्न्यर्कः सामसंहिता। विष्णुशक्ति नवधा नीमासादिलकथानिसा
॥ नकवलीनवीणक्ति वैष्णवी सात्वयी मयी। वृक्षाथ पत्रपुष्पाद्य यद्वस्तु यमरूढयी मयी। सर्गस्थित्यन्त्ययात्र यस्ति। विष्णुर्यतः सर्वमयः॥ नूतनसाममयान्कायण
सान्नरुस्यागु विद्धनिः। एवं सा सात्विकी शक्ति वैष्णवी यात्रयी मयी॥ अस्य सफलं स्कन्दे नारायणनमश्चिन्तिष्ठति। मयावाधिष्ठिताः सांपि गाढतानी निस्वात्महिः
॥ नमस्समस्कन्दगतीनां मनया निवाखिलं। पुनः क्रिनवेमनया गन्धर्वैर्यो यजनपतेः श्रयन्त्यप्सनसाया। क्रिनस्यवानूनिमवर्तः। वदक्रियत्वगायत्तः त्रिपथ
शावसंग्ररुः॥ वालखिल्याख्येष्वेव नपवित्रास्य समासतः। नादमानां स्कन्दनावकया विक्रक्रिनः पृथक् ॥ विष्णुविष्णुः पृथक्त्वसंगणास्तफमयाप्यपी। स्कन्दस्कं
दपतिमथति यायजन्नामस्त्वेनानवः॥ का यादर्शनिसंयोगसंप्राप्ताप्रथमतनः। एवं सा वैष्णवी सक्ति नैवापी निगमादिरू। मासानुमासीहास्वकमध्यास्कंनत्र
संस्थितं। पितृदेवमनुष्यादीन्सततं प्यायति यत्पुतः॥ पवित्रत्वदानार्त्तिकानन्यसंविता दिरा। सूर्यरश्मिः सुषुम्नाया तर्पितः स्कन्दचन्द्रमाः॥ कृष्णपक्षे मवेः अ

त्वत्पीयमानेवस्सुधामयः। पीतं विकलीसामी कृष्णपक्षद्वयाविरू ॥ पिवन्ति पितरस्त्वेषां शास्कवात्तर्पणं मथा। आप्यायत्व रश्मिशिर्यत्र स्थिता संस्कवसंवदिः॥ ममूस्तगानि
स्मानां पुष्पार्थं सस्यकद्वय। अन्नप्राणाम्यशेषाणि स्तुतानि रूगवानपि॥ पितृदेवमनुष्यादीन्वमाप्यायपयत्यसौ। पक्षहरुः क्रितुदवानापिह [illegible] णार्थेकम
प्रिकी॥ शश्वत्कृ प्रक्रिकमस्याणामेवप्यार्कः सयस्कृति ॥ इति श्रीविष्णुपुराणे द्वितीयांशे एकादशोऽध्यायः॥ ॥ पराशर उवाच॥ तथा क्रिस्कः सामस्य कन्या
स्त्रवाजिनः। वामदक्षिणायुक्ता दश तेन नवत्यसौ॥ वीथ्याश्रयाणि सक्षाणि ध्रुवाधारजवगिनी। सामसङ्क्रमस्तस्य रश्मीनां संविरूपथा॥ सूर्कस्य व
क्षिमस्याः सत्कृयकावदक्षिणं। कल्पमर्कमुनिश्रेष्ठ वा निगर्ह्समस्तवा॥ क्षीणं पीतं सुरेः सामम्माप्यायपनिदीप्तिमान्। मैत्रेयैककलासंस्कं रश्मिनैकन
स्कनः॥ क्रमेण येन पीतां सो देवैस्ततनिशाकरः। आप्याययत्यनुदिनं शास्कवावान्विस्कन॥ संभृतं चार्द्धमासेन तत्सामस्कं सुधामृतं। पिवन्ति देवमैत्रेय सुधा
हारायतः सुराः॥ त्रयस्त्रिंशत्सहस्राणि एकत्रिंशच्छतानि च। त्रयस्त्रिंशत्कथा देवाः पिवन्ति क्षणदाकरं॥ कलाद्वयावशिष्टस्तु प्रविष्टः सूर्यमण्डले। अमाख्यर ७९

य

भौद्रसत्वमास्या गतस्ततः ॥ अप्सु तस्मिन्नहोरात्रे पूर्वं विशति चन्द्रमाः ॥ ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ॥ क्षीणान्हि वीरुधो यस्तु वीरुत्सीसकनिशाकर । प
त्रं वा पातयते यस्तु ब्रह्महत्यां स विन्दति ॥ शेषपञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके । अपराह्णे पितृगणा जघन्ये पर्युपासते ॥ विवस्वति विकर्ते सामे निष्ठामतः
स्वधया कला । सुधामृततमयी पुण्या तामिन्दोः पितरो मृतम् ॥ निःसृतेन्दममावास्या गभस्तिभ्यः सदा मृतम् । मासतृप्तिमवाप्याग्र्यां पितरः सन्ति निर्वृताः ॥ सोम्या
बर्हिषदश्चैव अग्निष्वात्तास्तथैव च । एवं देवान् सितपक्षे कृष्णपक्षे तथा पितॄन् ॥ वीरुधश्चामृतमयैः शीतैरप्परमाणुभिः ॥ वाक्यादाप्याधिनोत्यसौ मनुष्यपशु ८०
कीटकान् ॥ आप्याययति शीतांशुः प्राकाश्याह्लादनेन तु । वाष्पन्नित्रयसंतर्पणा तथा चन्द्रमसः स्तवः ॥ पिसृंगस्तु बनीर्यक्राष्टौ स्फाष्ट्यो दीर्घा स्यूव गतिः । सवतृपः
पानकषाय कृत् सम्भवेदृयेः ॥ स्वापापस्यशपता कस्कुञ्चकस्यापि वत्सोमहान् । अष्टाङ्गवः काश्चनः श्रीमान् रौप्यस्यापि वत्समहान् ॥ पञ्चवाग्वनुत्तेरवंश्चै
संयुक्ता वह्निसंभवैः । अष्टौ तिष्ठपाण्डुरैर्युक्तैः स्वर्गतिः कार्केनवाध ॥ तस्मिन्तिष्ठति वर्षेवि बालाभा बालीचन्द्रमा तिः । आकाशसंभवैन श्चैः सवले

नेयुर्म, शने

ःस्यन्दनो लोहेः ॥ समायुक्तः शनैर्याति मन्दगामी श्वरः ॥ स्वर्भानोस्तु रथाश्चाष्टौ ग्नसाधूसवर्णः थी ॥ सकृद्युक्तास्तु मैत्रेय वहन्त्यविरतं सदा । आदित्यान्निःसृ
तो राहुः सोमं गच्छति पर्वसु ॥ आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु । तथा केतुरथस्याश्वा अप्यष्टौ वातरंहसः ॥ पलालधूमवर्णाभा लाक्षारसनिभारुणं
ः । तन्मया ग्रहाणां वै मया ख्याता रथास्तव ॥ सर्वे ध्रुवे महाभाग प्रबद्धा वायुरश्मिभिः ॥ ग्रहर्क्षताराधिष्ण्यानि ध्रुवे बद्धान्यशेषतः ॥ भ्रमन्त्युचितचारेण मैत्रेय
निलरश्मिभिः ॥ यावन्त्यश्चैव ताराः स्युस्तावन्तो वातरश्मयः ॥ सर्वे ध्रुवे निबद्धास्ते भ्रमन्तो भ्रामयन्ति तं । तैलपीडा यथा चक्रं भ्रमन्तो भ्रामयन्ति वै ॥ तथा हि भ्रमन्ति गृह्या
नाषि व्राताः विद्धा निसर्वनिःश्वाला गवस्रवश्यातिवातचक्रं विताति तु ॥ यस्मात् ज्योतींषि वहति प्रवहस्तेन सम्मतः । शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति
॥ सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम । यदह्ना कुरुते पापं दृष्ट्वा तं निशि मुच्यते ॥ यावन्त्यश्चैव ताराणि शिशुमाराश्रितानि वै । तावन्त्येव तु वर्षाणि जीव
त्यभ्यधिकानि तु ॥ उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः । यज्ञोऽधरश्च विज्ञेयो धर्मो मूर्द्धानमाश्रितः ॥ हृदि नारायणश्चास्ते अश्विनौ पूर्वपादयोः । वरुणश्च

र्मा चैव पश्चिमतस्य शक्थिनी॥ शिश्नः संवत्सरस्तस्य मित्रोपानं समाश्रितः। पुच्छाग्निश्च महेन्द्रश्च कश्यपोथ ततो ध्रुवः॥ तारका शिशुमारस्य नाक्षे भाति चतुष्टयी
॥ इत्येष सन्निवेशोयं पृथिव्या ज्योतिषां तथा॥ द्वीपानामुदधीनाञ्च पर्वतानाञ्च कीर्तितः। वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै॥ तेषां स्वरूपमाख्यातं संक्षेपः
श्रूयतां पुनः। यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा॥ पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता॥ ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य॥ ज्ञानस्वरूपो भगवान्यतोसावशेषमूर्तिर्न तु वस्तुभूतः। ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञान ८१
विजृम्भितानि॥ यदा तु शुद्धं निजरूपि सर्वं कर्मक्षये ज्ञानमपास्तदोषं। तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः॥ वस्त्वस्ति किं कुत्रचिदादिम
ध्यपर्यन्तहीनं सततैकरूपं। यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्वं॥ मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोणुः। जनैः
स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु॥ तस्मान्न विज्ञानमृतेस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं। विज्ञानमेकं निजकर्मभेदविभिन्नचि

त्तैर्बहुधाभ्युपेतं॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसंगः। एकं सदैकः परमः परेशः स वासुदेवो न यतोन्यदस्ति॥ सद्भाव एवं भवतो मयोक्तो
ज्ञानं यथा सत्यमसत्यमन्यत्। एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते॥ यज्ञः पशुर्वह्निरशेषऋत्विक् सोमः सुराः स्वर्गमयश्च कामः। इत्यादिकर्म
श्रितमार्गदृष्टं। भूरादिभोगाश्च फलानि तानि॥ यच्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि तत्र कर्मवश्यः। ज्ञात्वैवं ध्रुवमचलं सदैकरूपं तत्कुर्याद्विशति
हि येन वासुदेवं॥ इति श्रीविष्णुपुराणे द्वितीयांशे भुवनकोशः समाप्तः॥ ॥मैत्रेय उवाच॥ भगवन्सर्वमाख्यातं यत्पृष्टोसि मयाखिलं। भूसमुद्रादिसरितां सं
स्थानं ग्रहसंस्थितिः॥ विष्ण्वाधारं यथा चैतत्त्रैलोक्यं समवस्थितं। परमार्थश्च ते प्रोक्तो यथा ज्ञानं प्रधानतः॥ यत्त्वेतद्भगवानाह भरतस्य महीपतेः। कथयिष्यामि
चरितं संस्थानं ग्रहसंस्थितिः॥ विष्ण्वाधारं यथा चैतत्त्रैलोक्यं समवस्थितं। परमार्थश्च ते प्रोक्तो यथा ज्ञानं प्रधानतः॥ यत्त्वेतद्भगवानाह भरतस्य महीपतेः। कथयि
ष्यामि चरितं तन्ममाख्यातुमर्हसि॥ भरतः स महीपालः शालग्रामे वसत्किल। योगयुक्तः समाधाय वासुदेवे सदा मनः॥ पुण्यदेशप्रभावेण ध्यायतश्च सदा हरिं
ख्या।

कथन्नु नाम वन्मुक्तिर्यदङ्गत्साद्विजः पुनः। विप्रत्वे कतिमिन यज्ञस्य श्रमद्वात्मना॥ यत्कर्म्मस्विरतावन तन्ममाख्यातुमर्हसि॥ ॥पराशर उवाच॥ शालग्रामे म
हाभाग भगवन्न्यस्तमानसः। उवास स चिरं कालं मैत्रेय पृथिवीपतिः॥ अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः। अवाप परमां काष्ठां मनसश्चापि संयम
॥ यज्ञेशाच्युत गोविन्द माधवानन्त केशव। कृष्ण विष्णो हृषीकेशेत्याह राजा स केशवं॥ नान्यज्जगाद मैत्रेय किञ्चित्स्वप्नान्तरेष्वपि। एतत्पदं तदर्थं च विना
नान्यदचिन्तयत्॥ समित्पुष्पकुशादानं चक्रे देवक्रियाकृते। नान्यानि चक्रे कर्म्माणि निःसङ्गो योगतापसः। जगाम सोऽभिषेकार्थमेकदा तु महानदीं। सस्नौ त ८२
त्र तदा चक्रे स्नानस्यानन्तरक्रियां॥ अथाजगाम तत्तीर्थं जलं पातुं पिपासिता। आसन्नप्रसवा ब्रह्मन्नेकैव हरिणी वनात्॥ ततः समभवत्तत्र पीतप्राये जले तया
। सिंहस्य नादः सुमहान्सर्वप्राणिभयङ्करः॥ ततः सा सहसा त्रासादाप्लुता निम्नगा तटं। अत्युच्चारोहणेनास्या नद्यां गर्भः पपात वै॥ तमुह्यमानं वेगेन वीचीमा
लापरिप्लुतं। जग्राह स नृपो गर्भात्पतितं मृगपोतकं॥ गर्भप्रच्युतिदुःखेन प्रोत्तुङ्गाक्रमणेन च। मैत्रेय सापि हरिणी पपात च ममार च॥ हरिणीं तां विलो

क्याथ विपन्नां नृपतापसः। मृगपोतं समादाय पुनराश्रममागतः॥ चकारानुदिनं चासौ मृगपोतस्य वै नृपः। पोषणं पुष्यमाणश्च स तेन ववृधे मुनिः॥ चचाराश्र
मपर्यन्ते तृणानि गहनेषु सः। दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः॥ प्रातर्गत्वातिदूरं च सायमायात्यथाश्रमं। पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे॥
तस्य तस्मिन्मृगे दूरसमीपपरिवर्त्तिनि। आसीच्चेतः समासक्तं न ययावन्यतो द्विज॥ विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः। ममत्वं स चकारोच्चैस्तस्मि
न्हरिणबालके॥ किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः। चिरायमाने निष्क्रान्ते वटवः सामगा इव॥ हृष्टे विनगतेऽस्मिन्सर्वकमानसी मुनिः। प्रीतिप्र
सन्नवदनः पार्श्वस्थे चाभवन्मृगे। समाधिभङ्गस्तस्यासीत्तन्मयत्वादृतात्मनः॥ संत्यक्तराज्यभोगार्द्धस्वजनस्यापि भूपतेः। चपलं चपले तस्मिन्दूरगं दूरगामि
नि॥ मृगपोतेऽभवच्चित्तं स्थैर्यवत्तस्य भूपतेः। कालेन गच्छता सोऽथ कालं चक्रे महीपतिः॥ पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः। मृगमेव तदाद्राक्षीत्त्यजन्प्राणा
नसावपि। तन्मयत्वेन मैत्रेय नान्यत्किञ्चिदचिन्तयत्। ततश्च तत्कालकृतां भावनां प्राप्य तादृशीं॥ जम्बूमार्गे महारण्ये जातो जातिस्मरो मृगः। जातिस्मरत्वा

दृष्टिमयः सौवीरनृपद्विजात्मजम् ॥ विहायमानं नृपः शालग्राममुपाययौ। गुच्छेहृदस्थपर्ज्जं सकृद्धर्म्मासमाचरी ॥ भगवद्दत्तस्य कर्म्मणा निष्कृतिर्ययौ ॥ त
त्रवासस्य यत्नासौ गृह्यमानि समवाद्विज ॥ स्वावावनवनौ गुप्तयागिनीप्रवनकृत्स । सर्व्वविज्ञानसम्पन्नः सर्व्वशास्त्रार्थतत्त्ववित् ॥ अपश्यत् सवमेत्रयमात्मानं प्रकृतं
ः परं । आत्मनाधिगतज्ञानाद्देवादीनि महामुने ॥ सर्व्वभूतान्यभेदेन ददर्श स महामतिः ॥ नपपाठगुरुः प्राकृतकर्म्मापनयनं करोति ॥ न ददर्श विकर्म्माणि :
शास्त्राणि नग्रहेनव । उक्तापि वक्रेः किञ्चित् जनवाक्यमभाषत ॥ तमथ संस्कारगुणैर्ग्राम्यवाचोक्तिसंयुतं । अपध्वस्तवपुः साधु मलिनाम्बरधृग्द्विज ॥ क्लिन्नद ८३
न्तः सर्व्वैः प्रविकृतः स नागरैः । सम्माननापवीशानि योगर्द्धिकृतयत्नः ॥ जननावमतो योगी योगसिद्धिं हि विन्दति । तस्माच्चरेत वै योगी सतां धर्म्म
दूषयन् ॥ जना यथावमन्यवन् गच्छेयुर्न्नैव सङ्गतिं ॥ हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः ॥ आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने ॥ तं कालमाषवा
टादिभिः शाकैर्वन्यफलैः कणैः । यद्यदाप्नोति सुबह्वन्नं तदत्ति कालसंयमं ॥ पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः । कारितः क्षेत्रकर्म्मादि कदन्नाहारपोषितः

सविकृतपीनावयवो जडकारी च कर्म्मणि ॥ सर्व्वलोकोपकरणं बभूवाहारवेतनः ॥ तं तादृशमसंस्कारं विप्राकृतिविचेष्टितं । क्षत्ता सौवीरराजस्य विष्टियोग्य
ममन्यत ॥ स राजा शिविकारूढो गन्तुं कृतमतिर्द्विज । बभूवेक्षुमतीतीरे कपिलर्षेर्वराश्रमं ॥ श्रेयः किमत्र संसारे दुःखप्राये नृणामिति । प्रष्टुं तं मोक्षधर्म
ज्ञं कपिलाख्यं महामुनिं ॥ उवाह शिविकां तस्य क्षत्तुर्व्वचनचोदितः ॥ नृणां विष्टिगृहीतानामन्येषां सोऽपि मध्यगः ॥ गृहीतो विष्टिना विप्रः सर्व्वज्ञानैकभाजनं
जातिस्म[illegible]वासो पापस्य क्षयकाम उवाह तां ॥ ययौ जडगतिः सोऽथ युगमात्रावलोकनं । कुर्व्वन्मतिमतां श्रेष्ठस्तदन्ये त्वरितं ययुः ॥ विलोक्य नृपतिः सोऽथ वि
षमां शिविकागतिं । किमेतदित्याह समं गम्यतां शिविकावहाः ॥ पुनस्तथैव शिविकां विलोक्य विषमीकृतां । नृपः किमेतदित्याह भवद्भिर्गम्यतेऽन्यथा ॥ ह
पतन्वेदनस्य शुश्रूषत्वं वदन्नेवं । शिविकावाहकाः प्राहुरयं याति सत्वरं ॥ ॥राजोवाच॥ किं श्रान्तोस्यल्पमध्वानं त्वयोढा शिविका मम । किमायाससह
हो न त्वं पीवानसि निरीक्ष्यसे ॥ ॥ब्राह्मण उवाच॥ नाहं पीवा न चैवोढा शिविका भवतो मया । न श्रान्तोस्मि न वायासो वोढव्योस्ति महीपते ॥ ॥राजोवाच॥

प्रत्यक्षं दृश्यसे पीवा न यापि शिविका त्वयि । श्रमश्च भारोद्वहने भवत्येव हि देहिनां ॥ ॥ब्राह्मण उवाच॥ प्रत्यक्षं भवता भूप यद्दृष्टं मम तद्वद । बलवानबलश्चेति
वाच्यं पश्चाद्विशेषणं ॥ त्वयोढा शिविका चेति त्वय्यद्यापि वसी स्थिता । मिथ्यैतदत्र भवता श्रूयतां वचनं मम ॥ भूमौ पादयुगस्यास्ते जंघे पादद्वये स्थिते । ऊरू जंघ-
द्वयावस्थौ तदाधारं तथोदरं ॥ वक्षःस्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ । स्कन्धाश्रितेयं शिविका मम भारोत्र किं कृतः ॥ शिविकायां स्थितं चेदं देहं त्वदुपलक्षि-
तं ॥ तत्र त्वमहमप्यत्र प्रोच्यते चेदमन्यथा ॥ अहं त्वं च तथान्ये च भूतैरुह्याम पार्थिव । गुणप्रवाहपतितो भूतवर्गोपि यात्ययं ॥ कर्मवश्या गुणा ह्येते सत्वा- ८४
द्याः पृथिवीपते । अविद्यासंचितं कर्म तच्चाशेषेषु जन्तुषु ॥ आत्मा शुद्धोक्षरः शान्तो निर्गुणः प्रकृतेः परः ॥ प्रवृद्ध्यपचयौ नास्य एकस्याखिलजन्तुषु । यदा नोप-
चयस्तस्य न चैवापचयो नृप ॥ तदापीवानसीति त्वं कया युक्त्या त्वयेरितं । भूपादजंघाकट्यूरुजठरादिषु संस्थिता ॥ शिविकेयं यथा स्कन्धे तदा भारः समस्त्वया ।
तथान्यैर्जन्तुभिर्भूप शिविकोढा न केवलं ॥ शैलद्रुमगृहोत्थापि पृथिवीसंभवापि वा । यदा पुंसः पृथग्भावः प्राकृतैः कारणैर्नृप ॥ सोढव्यः स महाभारः

कतमो नृपते मया । यद्द्रव्या शिविका चेयं तद्द्रव्यो भूतसंग्रहः ॥ भवतो मेखिलस्यास्य ममत्वेनोपबृंहितः ॥ ॥पराशर उवाच॥ एवमुक्त्वाभवन्मौनी स वहञ्छि-
विकां द्विज । सोपि राजावतीर्योर्व्यां तत्पादौ जगृहे त्वरन् ॥ भो भो विसृज्य शिविकां प्रसादं कुरु मे द्विज । कथ्यतां को भवानत्र जाल्मरूपधरः स्थितः ॥ यो भवान्यन्निमित्तं
वा यदागमनकारणं । तत्सर्वं कथ्यतां विद्वन्मह्यं शुश्रूषवे त्वया ॥ ॥ब्राह्मण उवाच॥ श्रूयतां कोहमित्येतद्वक्तुं भूप न शक्यते । उपभोगनिमित्तं च सर्वत्राग-
मनक्रिया ॥ सुखदुःखोपभोगौ तु तौ देहाद्युपपादकौ । धर्माधर्मोद्भवौ भोक्तुं जन्तुर्देहादिमृच्छति ॥ सर्वस्यैव हि भूपाल जन्तोः सर्वत्र कारणं । धर्माधर्मौ यतः कस्मा-
त्कारणं पृच्छ्यते त्वया ॥ ॥राजोवाच॥ धर्माधर्मौ न संदेहः सर्वकार्येषु कारणं । उपभोगनिमित्तं च देहाद्देहान्तरागमः ॥ यत्त्वेतद्भवता प्रोक्तं कोहमित्येतदा-
त्मनः । वक्तुं न शक्यते श्रोतुं तन्ममेच्छा प्रवर्त्तते ॥ योस्ति सोहमिति ब्रह्मन् कथं वक्तुं न शक्यते । आत्मन्येष न दोषाय शब्दोहमिति यो द्विज ॥ ॥ब्राह्मण उवाच॥ शब्दो-
हमिति दोषाय नात्मन्येष तथैव तत् । अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः ॥ जिह्वा ब्रवीत्यहमिति दन्तोष्ठौ तालुके नृप । एते नाहं यतः सर्वे वाङ्नि-

ःपादनं देनवः ॥ किं तु निर्वदत्यपारं । गवाहुवेदे मितिस्वयं । तथापि वाङ्मारम्भनं दर्कुमित्कं नयथत ॥ पिण्डः पथग्य नःपूसः नियपाथ्यादित्वन्दुनः । गमा
दमिति कुत्र नीसंज्ञानाजन्कवाम्यहं ॥ ययन्याक्षिपवः कापि मनः पार्थिवसत्तमः । तदभावमपीवान्या वृक्कुमवमपीक्ष्यत ॥ यदा समस्तदेहेषु पुमानेकाथवा
स्थितः । तदा हि को भवान्कोहमित्येतद्विफलं वचः ॥ त्वं राजा शिविकाचयं वयं वाहाः पुरःसराः । अयं च भवतो लोको न सदेतन्नृपोच्यते । वृक्षाद्दारु ततश्चे
यं शिविका त्वदधिष्ठिता । कूटवद्वृक्षसंज्ञा या वास्या दारुसंज्ञाथवा नृप ॥ वृक्षारूढो महाराजा नायं वदति ते जनः । न च दारुणि सर्वस्त्वां ब्रवीति शिविकागतं ॥ शि ८७
विका दारुसंघातो रचनास्थितिसंस्थितिः । अन्विष्यतां नृपश्रेष्ठ तद्भेदे शिविका त्वया ॥ एवं छत्रशलाकानां पृथग्भावे विमृश्यतां । क्व यातं छत्रमित्येष न्याय
स्त्वयि तथा मयि ॥ पुमान्स्त्री गौरजो वाजी कुञ्जरो विहगस्तरुः । देहेषु लोकसंज्ञेयं विज्ञेया कर्महेतुषु ॥ पुमान्न देवो न नरो न पशुर्न च पादपः । शरीराकृतिः
भेदास्तु भूपैते कर्मयोनयः ॥ वस्तु राजेति यल्लोके यच्च राजभटात्मकं । तथान्यच्च न पश्यन्तु न सत्संकल्पनामयी ॥ यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै । स

ना ॥ परिणामादिसंभूतां तद्वस्तु नृप तच्च किं ॥ त्वं राजा सर्वलोकस्य पितुः पुत्रो रिपो रिपुः । पत्न्याः पतिः पिता सूनोः कस्त्वां भूप वदाम्यहं ॥ त्वं किमेतच्छिरः किन्तु शिरस्तव
तथोदरं । किमु पादादिकं त्वं वै तवैतत्किं महीपते ॥ समस्तावयवेभ्यस्त्वं पृथग्भूय व्यवस्थितः । कोहमत्रेति निपुणं भूत्वा चिन्तय पार्थिव ॥ एवं व्यवस्थिते तत्त्वे मया
हमिति भाषितुं । पृथक्करणनिष्पाद्यं शक्यते नृपते कथं ॥ ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे त्रयोदशोऽध्यायः ॥ ॥ पराशर उवाच ॥ निशम्य तस्य तद्वचः परमा
र्थसमन्वितं । प्रश्रयावनतो भूत्वा तमाह नृपतिर्द्विजं ॥ ॥ राजोवाच ॥ भगवन्यत्त्वया प्रोक्तं परमार्थमयं त्वया । श्रुते तस्मिन्भ्रमन्तीव मनसो मम वृत्तयः ॥ एतद्वि
वेकविज्ञानं यदशेषेषु जन्तुषु । भवता दर्शितं विप्र तत्परं प्रकृतेर्महत् ॥ नाहं वहामि शिविकां शिविका न मयि स्थिता । शरीरमन्यदस्मत्तो येनेयं शिविका धृता ॥
गुणप्रवृत्त्या भूतानां प्रवृत्तिः कर्मचोदिता । प्रवर्तन्ते गुणा ह्येते किं ममेति त्वयोदितं ॥ एतस्मिन्परमार्थज्ञ मम श्रोत्रपथं गते । मनो विह्वलतामेति परमार्था
र्थिताङ्गतं ॥ पूर्वमेव महाभागं कपिलर्षिमहं द्विज । प्रष्टुमभ्युद्यतो गत्वा श्रेयः किं त्वत्र शंस मे ॥ तदन्तरे च भवता यदेतद्वाक्यमीरितं । तेनैव परमार्थार्थं त्वयि चे

तः प्रश्नावनतिः ॥ कपिलर्षिर्भगवतः सर्वभूतस्य वै किल । विष्णोरंशो जगन्मोहनाशायोर्वीमुपागतः ॥ स एव भगवान्नूनमस्माकं हितकाम्यया । प्रत्यक्षतामत्र ग-
तो यथैतद्भवतोच्यते ॥ तन्मह्यं प्रणताय त्वं यच्छ्रेयः परमं द्विज । तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान् ॥ ॥ब्राह्मण उवाच ॥ भूप पृच्छसि किं श्रेयः परमार्थं
नु पृच्छसि । श्रेयांस्यपरमार्थानि अशेषाणि च भूपते ॥ देवताराधनं कृत्वा धनसम्पदमिच्छति । पुत्रानिच्छति राज्यं च श्रेयस्तस्यैव तन्नृप ॥ विवेकिनस्तु संयोगः
श्रेयो यः परमात्मना । श्रेयांस्येवमनेकानि शतशोऽथ सहस्रशः ॥ कर्मयज्ञात्मकं श्रेयः स्वर्लोकफलदायि यत् । श्रेयः प्रधानं च फलं तदेवानभिसंहितम् ॥ आ ८३
त्मा ध्येयः सदा भूप योगयुक्तैस्तथा परैः । श्रेयस्तत्परमार्थस्तु न त्वेतच्छ्रूयतां वचः ॥ धर्माय त्यज्यते किन्नु परमार्थो यदि । व्ययश्च क्रियते कस्मात् कामप्राप्त्यु-
पलक्षणः ॥ पुत्रश्चेत्परमार्थः स्यात्सोऽप्यन्यस्य नरेश्वर । परमार्थभूतः सोऽन्यस्य परमार्थो हि तत्पिता ॥ एवं न परमार्थोऽस्ति जगत्यस्मिंश्चराचरे । परमार्थो
हि कार्याणि कारणानामशेषतः ॥ राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि । परमार्था भवन्त्यत्र न भवन्ति च वै ततः ॥ ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं त-
व । परमार्थभूतं तत्रापि श्रूयतां गदतो मम ॥ यत्तु निष्पाद्यते कार्यं मृदा कारणभूतया । एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः ॥ निष्पाद्यते क्रिया या तु सा भवि-
त्री विनाशिनी । अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते ॥ तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम् । तदेवाफलदं कर्म परमार्थो मतस्तव । मुक्तिसाधनभूतत्वात्प-
रमार्थो न साधनम् । ध्यानं चैवात्मनो भूप परमार्थार्थशब्दितम् । भेदकारि परेभ्यस्तु परमार्थो न भेदवान् । परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतद-
न्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥ तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः ॥ परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम । एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः
॥ जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः । परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ॥ न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यति ॥ तस्यात्मपरदेहेषु सतोऽप्येक-
मयं हि यत् ॥ विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः । वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ॥ अभेदव्यापिनो वायोस्तथास्य परमात्मनः । एकत्वं रूपभेदश्च
बाह्यकर्मप्रवृत्तिजः ॥ देवादिभेदमध्यास्ते नास्त्येवावरणो हि सः ॥ इति श्रीविष्णुपुराणे द्वितीयेंऽशे चतुर्दशोऽध्यायः ॥ ॥पराशर उवाच ॥ इत्युक्ते मौनिनं तू-

यन्विकयानिमहीपतिः । प्रययावाथ विप्रासो वज्ञानकर्गनीकथां ॥ ॥ब्राह्मण उवाच॥ श्रूयतां नृपशार्दूल यद्गीतमृभुणा पुरा । अवबोधं जनयता निदाघस्य
द्विजन्मनः ॥ ऋतुर्नामाभवत्पुत्रो ब्रह्मणः परमेष्ठिनः । विज्ञाततत्वसद्भावो विसर्गादेव भूपते ॥ तस्य शिष्यो निदाघोऽभूत्पुलस्त्यतनयः पुरा । प्रादादशेषवि
ज्ञानं स तस्मै परया मुदा ॥ अवाप्तज्ञानतन्त्रस्य न तस्याद्वैतवासनां । स ऋतुस्तर्कयामास निदाघस्य नरेश्वर ॥ देविकायास्तटे वीरनगरं नाम वै पुरं ।
समृद्धमतिरम्यं च पुलस्त्येन निवेशितं ॥ रम्योपवनपर्यन्ते स तस्मिन्पार्थिवोत्तम । निदाघनामा योगज्ञ ऋतुशिष्योऽवसत्पुरा ॥ दिव्ये वर्षसहस्रे तु स ८८
मतीतेऽस्य तत्पुरं । जगाम स ऋतुः शिष्यं निदाघमवलोककः ॥ स तस्य वैश्वदेवान्ते द्वारालोकनगोचरः । स्थितस्तेन गृहीतार्घो निजवेश्म प्रवेशितः ॥ प्रक्षालि
ताङ्घ्रिपाणिं च कृतासनपरिग्रहं । उवाच स द्विजश्रेष्ठो भुज्यतामिति सादरं ॥ ॥ऋतुरुवाच॥ भो विप्रवर्य भोक्तव्यं यदन्नं भवतो गृहे । तत्कथ्यतां कदन्नेषु
न प्रीतिः सततं मम ॥ ॥निदाघ उवाच॥ सक्तुयावकवाट्यानामपूपानां च मे गृहे । यद्रोचते द्विजश्रेष्ठ तत्त्वं भुङ्क्ष्व यथेच्छया ॥ ॥ऋतुरुवाच॥ कदन्नानि द्विजै

तानि मिष्टमन्नं प्रयच्छ मे । संयावपायसादीनि द्रप्सफाणितवन्ति च ॥ ॥निदाघ उवाच॥ हे हे शालिनि मद्गेहे यत्किंचिदतिशोभनं । भक्ष्योपसाधनं मिष्टं तेनास्यान्नं
प्रसादय ॥ ॥ब्राह्मण उवाच॥ इत्युक्ता तेन सा पत्नी मिष्टमन्नं द्विजस्य यत् । प्रसाधितवती तद्वै भर्तुर्वचनगौरवात् ॥ तं भुक्तवन्तमिच्छातो मिष्टमन्नं महामुनिं । नि
दाघः प्राह भूपाल प्रश्रयावनतः स्थितः ॥ ॥निदाघ उवाच॥ अपि ते परमा तृप्तिरुत्पन्ना तुष्टिरेव च । अपि ते मानसं स्वस्थमाहारेण कृतं द्विज ॥ क्व निवासी भवान्वि
प्र क्व च गन्तुं समुद्यतः । आगम्यते च भवता यतस्तच्च द्विजोच्यतां ॥ ॥ऋतुरुवाच॥ क्षुद्यस्य तस्य भुक्तेऽन्ने तृप्तिर्ब्राह्मण जायते । न मे क्षुन्नाभवत्तृप्तिः कस्मान्मां परिपृ
च्छसि ॥ वह्निना पार्थिवे धातौ क्षपिते क्षुत्समुद्भवः । भवत्यम्भसि च क्षीणे नृणां तृडपि जायते ॥ क्षुत्तृष्णे देहधर्माख्ये न ममैते यतो द्विज । ततः क्षुत्सम्भवाभावात्तृप्तिर
स्त्येव मे सदा ॥ मनसः स्वस्थता तुष्टिश्चित्तधर्माविमौ द्विज । चेतसो यस्य तत्पृच्छ पुमानेभिर्न युज्यते ॥ पुमान्सर्वगतो व्यापी आकाशवदयं यतः । कुतः कुत्र क्व गन्ता
सीत्येतदप्यर्थवत्कथं ॥ सोऽहं गन्ता न चागन्ता नैकदेशनिकेतनः । त्वं चान्ये च न च त्वं च नान्ये नैवाहमप्यहं ॥ मिष्टं नामिष्टमप्येषा जिज्ञासा मे कृता तव । किं व

श्रुणां नित्यापि तृप्तानां द्विजसत्तम ॥ किमस्वाद्वथवा मिष्टं भुंजतोन्नं द्विजोत्तम । मिष्टमेव यदामिष्टं तदेवोद्वेगकारणं ॥ अमिष्टं जायते मिष्टं मिष्टादुद्विजते जनः
॥ आदिमध्यावसानेषु किमन्नं रुचिकारकं ॥ मृन्मयं हि मृदा यद्वद्गृहं लिप्तं स्थिरी भवेत् । पार्थिवोयं तथा देहः पार्थिवैः परमाणुभिः ॥ यवगोधूममुद्गादि घृतं
तैलं पयो दधि । गुडः फलादीनि तथा पार्थिवाः परमाणवः ॥ तदेतद्भवता ज्ञात्वा मिष्टामिष्टविचारि यत् । तन्मनः समतालम्बि कार्यं साम्यं हि मुक्तये ॥ ॥ब्रा ८
ह्मण उवाच ॥ इत्याकर्ण्य वचस्तस्य परमार्थाश्रितं नृप । प्रणिपत्य महाभागो निदाघो वाक्यमब्रवीत् ॥ प्रसीद मद्धितार्थाय कथ्यतां यस्त्वमागतः । नष्टो मोहस्तवाक
र्ण्य वचांस्येतानि मे द्विज ॥ ॥ऋभुरुवाच॥ ऋभुरस्मि तवाचार्यः प्रज्ञादानाय ते द्विज । इहागतोहं यास्यामि परमार्थस्तवोदितः ॥ एवमेकमिदं विद्धि न भेदि सक
लं जगत् । वासुदेवाभिधेयस्य स्वरूपं परमात्मनः ॥ ॥ब्राह्मण उवाच॥ तथेत्युक्त्वा निदाघेन प्रणिपातपुरःसरं । पूजितः परया भक्त्या इच्छातः प्रययावृभुः ॥ इति
श्री विष्णुपुराणे द्वितीयेंशे पंचदशोध्यायः ॥ ॥ब्राह्मण उवाच॥ ऋभुर्वर्षसहस्रेषु समतीतेनरेश्वर । निदाघज्ञानदानाय तदेव नगरं ययौ ॥ नगरस्य बहि

स्सोथ निदाघं ददृशे मुनिः । महाबलपरीवारे पुरं विशति पार्थिवे ॥ दूरे स्थितं महाभागं जनसंमर्दवर्जकं । क्षुत्क्षामकण्ठमायान्तमरण्यात्ससमित्कुशं ॥ दृष्ट्वा
निदाघं स ऋभुरुपगम्याभिवाद्य च । उवाच कस्मादेकान्ते स्थीयते भवता द्विज ॥ ॥निदाघ उवाच॥ भो विप्र जनसंमर्दो महानेष नरेश्वरः । प्रविविक्षुः पुरं रम्यं ते
नात्र स्थीयते मया ॥ ॥ऋभुरुवाच॥ नराधिपोत्र कतमः कतमश्चेतरो जनः । कथ्यतां मे द्विजश्रेष्ठ त्वमभिज्ञो मतो मम ॥ ॥निदाघ उवाच॥ योयं गजे
न्द्रमुन्मत्तमद्रिशृंगसमुच्छ्रितं । अधिरूढो नरेन्द्रोयं परिलोकस्तथेतरः ॥ ॥ऋभुरुवाच॥ एतौ हि गजराजानौ युगपद्दर्शितौ मम । भवता न विशेषेण पृ
थक्चिह्नोपलक्षितौ ॥ तत्कथ्यतां महाभाग विशेषो भवतानयोः । ज्ञातुमिच्छाम्यहं कोत्र गजः को वा नराधिपः ॥ ॥निदाघ उवाच॥ गजो योयमधो ब्रह्मन्नुपर्य
स्यैष भूपतिः । वाह्यवाहकसंबंधं को न जानाति वै द्विज ॥ ॥ऋभुरुवाच॥ जानाम्यहं यथा ब्रह्मन् तथा मामवबोधय । अधःशब्दनिगद्यं किं किं चोर्ध्वमभिधी
यते ॥ ॥ब्राह्मण उवाच॥ इत्युक्तः सहसारुह्य निदाघः प्राह तं ऋभुं । श्रूयतां कथयाम्येष यन्मां त्वं परिपृच्छसि ॥ उपर्यहं यथा राजा त्वमधः कुंजरो यथा

कृ

मवबोधयन्तद्यन्नु दृष्टान्तादर्शिता मया॥ ॥ऋभुरुवाच॥ नृपवद्द्विजश्रेष्ठ स्थितोऽहं गजवद्यदि। तदेतत्त्वं समावद्धकतमस्त्वमहं तथा॥ ॥ब्राह्मण उवा-
व॥ ततः स त्वरितं तस्य चरणावभिवाद्य सः॥ निदाघः प्राह भगवन्नाचार्यस्त्वमृभुर्ध्रुवं॥ नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा। यथाचार्यस्य तेन त्वां म-
न्ये प्राप्तमहं गुरुं॥ ॥ऋभुरुवाच॥ तवोपदेशदानाय पूर्वशुश्रूषणादृतः। गुरुस्तेहं ऋभुर्नाम निदाघ समुपागतः॥ तदेतदुपदिष्टं ते संक्षेपेण महामते। परमा-
र्थसारभूतं यदद्वैतमशेषतः॥ ॥पराशर उवाच॥ एवमुक्त्वा ययौ विद्वान् निदाघं स ऋभुर्गुरुः। निदाघोप्युपदेशेन तेनाद्वैतपरोऽभवत्॥ सर्वभूतान्यभेदेन ददृ- ८९
शे स तदात्मनः। तथा ब्रह्म ततो मुक्तिमवाप परमां द्विज॥ तथा त्वमपि धर्मज्ञ तुल्यात्मरिपुबान्धवः। भव सर्वगतं जानन्नात्मानमवनीपते॥ सितनीलादिभेदेन
यथैकं दृश्यते नभः। भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक्॥ एकः समस्तं यदिहास्ति किंचित् तदच्युतो नास्ति परं ततोऽन्यत्। सोहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहं॥ इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः। स चापि जातिस्मरणाप्तबोधस्तत्रैव जन्मन्यपवर्गमाप॥ इति भरतन-

स१

रेन्द्रसारवृत्तं कथयति यश्च शृणोति भक्तियुक्तः। स विमलमतिरेति नात्ममोहं भवति च संसरणेषु मुक्तियोग्यः॥ इति श्रीविष्णुपुराणे द्वितीयांशः समाप्तः॥
मैत्रेय उवाच॥ कथिता गुरुणा सम्यक् भूसमुद्रादिसंस्थितिः। सूर्यादीनां च संस्थानं ज्योतिषां चातिविस्तरात्॥ देवादीनां तथा सृष्टिः ऋषीणां चापि वर्णिता। चातुर्वर्ण्यस्य
चोत्पत्तिः तिर्यग्योनिगतस्य च॥ ध्रुवप्रह्लादचरितं विस्तराच्च त्वयोदितं। मन्वन्तराण्यशेषाणि श्रोतुमिच्छाम्यनुक्रमात्। मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान्
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो॥ ॥पराशर उवाच॥ अतीतानागतानीह यानि मन्वन्तराणि वै। तान्यहं भवतः सम्यक् कथयामि यथाक्रमं॥ स्वायंभु-
वो मनुः पूर्वं मनुः स्वारोचिषस्तथा। उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा॥ षडेते मनवोऽतीताः साम्प्रतं तु रवेः सुतः। वैवस्वतोऽयं यस्यैतत् सप्तमं वर्त्ततेन्तरं
॥ स्वायंभुवं तु कथितं कल्पादावन्तरं मया। देवाः सप्तर्षयश्चैव यथावत् कथितं मया॥ अत ऊर्ध्वं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु। मन्वन्तराधिपान् सम्यक् देवर्षीं-
स्तत्सुतांस्तथा॥ पारावताः सतुषिता देवाः स्वारोचिषेन्तरे। विपश्चित्तत्र देवेन्द्रो मैत्रेयासीन्महाबलः॥ ऊर्जः स्तम्भस्तथा प्राणो दत्तोलि ऋषभस्तथा। निश्चरश्चा-

वसिष्ठतनयास्तत्र सप्त सप्तर्षयोऽभवन् ।। अजः परशुदीप्याद्या तथोत्तममनोः सुताः ।। तामसस्यान्तरे देवाः स्वरूपा हरयस्तथा ।। समाश्च सुधियश्चैव सप्तविंशकाः
गणाः ।। शिबिरिन्द्रस्तथावासी छतयज्ञोपलक्षणः ।। सप्तर्षयश्च ये तेषां तत्र नामानि मे शृणु ।। ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा । पीवरश्चर्षयाह्येते
सप्त तत्रापि चान्तरे । नरः ख्यातिः सौकेत्या जानुजङ्घादयस्तथा ।। पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः । पञ्चमस्यापि मैत्रेय रैवतो नाम नामतः
।। मनुर्विभुश्च तत्रेन्द्रो देवांश्चैवान्तरे शृणु । अमिताभा भूतरया वैकुण्ठाः ससुमेधसः ।। एते देवगणास्तत्र चतुर्दश चतुर्दश । हिरण्यरोमा वेदश्री ऊर्ध्वबाहुस्तथा ९०
परः ।। वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ।। एते सप्तर्षयो विप्र तत्रासन्रैवतेऽन्तरे ।। बलबन्धुः ससम्भाव्यः सत्यकाद्याश्च तत्सुताः । नरेन्द्राश्च महावीर्या
बभूवुर्मुनिसत्तम ।। स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा । प्रियव्रतान्वया ह्येते चत्वारो मनवस्तथा ।। विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः । मन्वन्तराधि-
पानेताँल्लब्धवानात्मवंशजान् ।। षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तथा मनुः । मनोजवस्तथैवेन्द्रो देवानपि निबोध मे ।। आप्याः प्रसूतास्तथा भव्याः पृथुकाश्च दिवौ-

कसः । महानुभावा लेखाश्च पञ्चैते ह्यष्टका गणाः ।। सुमेधा विरजाश्चैव हविष्मानुत्तमो मधुः । अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ।। ऊरुः पूरुः शतद्युम्नप्र-
मुखाश्च महाबलाः । चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ।। विवस्वतः सुतो विप्र श्राद्धदेवो महाद्युतिः । मनुः संवर्त्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ।। आदित्यवसु-
रुद्राद्या देवाश्चात्र महामुने । पुरन्दरस्तथैवात्र मैत्रेय त्रिदशेश्वरः । वसिष्ठः काश्यपोऽथात्रिर्जमदग्निः सगौतमः ।। विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोऽभव ।
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ।। नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च । करूषश्च पृषध्रश्च सुमहाँल्लोकविश्रुतः ।। मनोर्वैवस्वतस्यैते नवपुत्राश्च
धार्म्मिकाः । विष्णुशक्तिरनौपम्या सत्त्वोद्रिक्ता स्थितौ स्थिता ।। मन्वन्तरेष्वशेषेषु देवत्वेनाधितिष्ठति । अंशेन तस्य जज्ञेऽसौ यज्ञः स्वायम्भुवेऽन्तरे ।। आकूत्यां मानसः
देव उत्पन्नः प्रथमेऽन्तरे । ततः पुनः स वै देवः प्राप्ते स्वारोचिषेऽन्तरे ।। तुषितायां समुत्पन्नो ह्यजितस्तुषितैः सह । औत्तमेऽपि पुनर्देवस्तुषितायां पुनः स वै ।। सत्यायामभ-
वत्सत्यः सत्यैः सह सुरोत्तमैः । तामसस्यान्तरे चैव सम्प्राप्ते पुनरेव हि ।। हर्यायां हरिभिः सार्द्धं हरिरेवाभवद्धरिः । रैवतेऽप्यन्तरे देवः सम्भूत्यां मानसोऽभवत् ।। सं

भावाङ्गस्यसार्द्धंदेवैर्देववराहरिः।चाक्षुषस्यान्तरेदेवोवैकुण्ठःपुरुषोत्तमः॥विकुण्ठायामसौजज्ञेवैकुण्ठैर्दैवतैःसह।मन्वन्तरेत्रसंप्राप्तेतथावैवस्वतेद्वि
ज॥वामनःकश्यपाद्विष्णुरदित्यांसंबभूवह।त्रिभिःक्रमैरिमांल्लोकान्जित्वायेनमहात्मना॥पुरन्दरायत्रैलोक्यंदत्तंनिहतकण्टकं।इत्येतास्तनवस्तस्य
सप्तमन्वन्तरेषुवै॥सप्तस्वेवाभवन्विप्रयाभिःसंवर्द्धिताःप्रजाः।यस्माद्विष्टमिदंसर्वंतस्यशक्त्यामहात्मनः।तस्मात्सप्रोच्यतेविष्णुर्विशेर्धातोःप्रवेशना
त्॥सर्वेचदेवामनवःसमस्ताःसप्तर्षयोयेमनुसूनवश्च॥इन्द्रश्चयोयंत्रिदशेशभूतोविष्णोरशेषास्तुविभूतयस्ताः॥इतिश्रीविष्णुपुराणेतृतीयेंशे ९१
प्रथमोध्यायः॥ १ ॥मैत्रेयउवाच॥प्रोक्तान्येतानिभवतासप्तमन्वन्तराणिवै।भविष्याण्यथविप्रर्षेममाख्यातुंत्वमर्हसि॥ ॥पराशरउवाच॥सूर्यस्यपत्
नीसंज्ञाभूत्तनयाविश्वकर्मणः।मनुर्यमोयमीचैवतदपत्यानिवैमुने॥असहन्तीतुसाभर्तुस्तेजश्छायांयुयोजवै।भर्तृशुश्रूषणेरण्यंस्वयंचतपसे
ययौ॥संज्ञेयमित्यथार्कश्चछायायामात्मजत्रयं।शनैश्चरंमनुंचान्यंतपतींचाप्यजीजनत्॥छायासंज्ञाददौशापंयमायकुपितायदा।तदान्येयमसौ

---

बुद्धिरित्यासीद्यमसूर्ययोः।ततोविवस्वानाख्यातंतयैवारण्यसंस्थितां॥समाधिदृष्ट्याददृशेतामश्वांतपसिस्थितां।वाजिरूपधरःसोपितस्यांदेवावथाश्विनौ॥
जनयामासरेवन्तंरेतसोन्तेचभास्करः।आनिन्येचपुनःसंज्ञांस्वस्थानंभगवान्रविः॥तेजसःशमनंचास्यविश्वकर्माचकारह।भ्रमिमारोप्यसूर्यंतुतस्यतेजोवि
शातनं॥कृतवानष्टमंभागंनव्यशातयदव्ययं।यत्तस्माद्वैष्णवंतेजःशातितंविश्वकर्मणा॥जाज्वल्यमानमपतत्तद्भूमौमुनिसत्तम।त्वष्टैवतेजसातेनविष्णोश्चक
मकल्पयत्।त्रिशूलंचैवशर्वस्यशिबिकांधनदस्यच॥शक्तिंगुहस्यदेवानामन्येषांचयदायुधं।तत्सर्वंतेजसातेनविश्वकर्माव्यवर्द्धयत्॥छायासंज्ञासुतोया
सौद्वितीयःकथितोमनुः।पूर्वजस्यसवर्णोसौसावर्णिस्तेनकथ्यते॥तस्यमन्वन्तरंह्येतत्सावर्णिकमथाष्टमं।तच्छृणुष्वमहाभागभविष्यत्कथयामिते॥सावर्णि
स्तुमनुर्योसौमैत्रेयभवितातनः।सुतपाश्चामिताभाश्चमुख्याश्चापितथासुराः॥तेषांगणश्चदेवानामेकैकोविंशकःस्मृतः।सप्तर्षीनथवक्ष्यामिभविष्यानथस
त्तम।दीप्तिमान्गालवोरामःकृपोद्रौणिस्तथापरः॥मत्पुत्रश्चतथाव्यासऋष्यशृङ्गश्चसप्तमः॥विष्णुप्रसादादनघःपातालान्तरगोचरः।विरोचनसुतस्तेषां

षां वालिखिल्या भविष्यति ॥ विरजाश्चार्व्ववीरांश्च निर्म्मोहाद्यास्तथापर । सावर्ण्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः॥ नवमो दक्षसावर्ण्णिर्भविष्यति मुने मनुः॥ पारा म
रीचिगर्भाश्च सुधर्म्माणस्तथा त्रिधा॥ भविष्यन्ति तथा देवा एकैको द्वादशो गणः॥ तेषामिन्द्रो महावीर्य्यो भविष्यत्यद्भुतो द्विज ॥ सवनो द्युतिमान्भव्यो वसुर्म्मेधातिथि
स्तथा। ज्योतिष्मान्सप्तमः सत्यश्चैते नवमहर्षयः॥ धृतकेतुर्द्दीप्तकेतुः पञ्चहस्तनिरामयाः। पृथुश्रवाद्याश्च तथा दक्षसावर्ण्णिकात्मजाः॥ दशमो ब्रह्मसावर्ण्णिर्भवि
ष्यति मुने मनुः। सुधामानो विरुद्धाश्च शतसंख्यास्तथा सुराः॥ तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः। सप्तर्षयो भविष्यन्ति ये तदा तच्छृणुष्व ह॥ हविष्मान्सुकृतिः ९२
सत्यस्तपोमूर्त्तिस्तथापरः। नाभागोऽप्रतिमौजाश्च सत्यकेतुस्तथैव च॥ सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश। ब्रह्मसावर्ण्णिपुत्रास्तु रक्षिष्यन्ति वसुन्धरां॥ ए
कादशश्च भविता धर्म्मसावर्ण्णिको मनुः। विहङ्गमाः कामगमाः निर्म्माणरतयस्तथा॥ गणास्त्वेते तदा मुख्या देवानां हि भविष्यतां। एकैकस्त्रिंशकस्तेषां गणश्चे
न्द्रश्चैव वृषः॥ निश्चरश्चाग्नितेजाश्च वपुष्मान्घृणिरारुणिः॥ हविष्माननघश्चैव भाव्याः सप्तर्षयस्तथा। सर्व्वत्रगः सुधर्म्मा च देवानीकादयस्तथा॥ भविष्य

मा

न्ति मनोस्तस्य तनयाः पृथिवीश्वराः। रुद्रपुत्रस्तु सावर्ण्णिर्भविता द्वादशो मनुः॥ ऋतधामा च तत्रेन्द्रो भविता शृणु मे सुरान्। हरिता रोहिता देवास्तथा सुमनसो द्वि
ज॥ सुकर्म्माणः सुरापाश्च दशकाः पञ्च वै गणाः॥ तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः॥ तपोधृतिर्द्युतिश्चान्यः सप्तमस्तु तपोधनः। देववांश्चोपदेवश्च देवश्रेष्ठा
दयस्तथा॥ भविष्यन्ति मनोस्तस्य महावीर्य्याः सुता नृपाः। त्रयोदशो रौच्यमाना भविष्यति मुने मनुः॥ सुत्रामाणः सुकर्म्माणः सुधर्म्माणस्तथामराः। त्रयस्त्रिंशद्वि
भेदास्ते देवानां यत्र वै गणाः॥ दिवस्पतिर्म्महावीर्य्यस्तेषामिन्द्रो भविष्यति। निर्मोहस्तत्त्वदर्शी च निष्प्रकम्प्यो निरुत्सुकः॥ धृतिमानव्ययश्चान्यः सप्तमः सुत
पा मुनिः। सप्तर्षयस्त्वमी तस्य पुत्रानपि निबोध मे॥ चित्रसेनविचित्राद्या भविष्यन्ति महीक्षितः। भौत्यश्चतुर्द्दशश्चात्र मैत्रेय भविता मनुः॥ शुचिरिन्द्रः सुरगणा
स्तत्र पञ्च शृणुष्व तान्। चाक्षुषाश्च पवित्राश्च कनिष्ठा भ्राजिकास्तथा॥ वाचावृद्धाश्च वै देवाः सप्तर्षीनपि मे शृणु। अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च॥ युक्तस्त
था जितश्चान्यो मनुपुत्रानतः शृणु। ऊरुगम्भीरबुद्ध्याद्या मनोस्तस्य सुता नृपाः॥ कथिता मुनिशार्दूल पालयिष्यन्ति ये महीं। चतुर्युगान्ते वेदानां जायते किल विप्लवः॥ प्र

वर्षाणि मानवस्य तु विसप्तर्षयो दिवः ॥ कलः कलिस्तु सर्वे प्रभवतो मा नृपो मनवः ॥ एवा यत् तु युगस्य तु यावन्मन्वन्तरं तु तत् । रवाकि य महाप्रया यावन्मन्वन्त :
न्तु ते ॥ तद्यथा शुकवैश्यैव नावस्तु परिपाल्यते । मनवः सप्तर्षयो देवा पालाश्च मनवः सत्तमाः ॥ मन्वन्तरं तु वत्स्यैव शक्रस्यैवाधिकारिणः ॥ चतुर्दश भिरेतैस्तु गतैर्म
न्वन्तरैर्द्विज ॥ सहस्रयुगपर्यन्तः कल्पो निःशेष उच्यते । तावत्प्रमाणा च निशा ततो भवति सत्तम ॥ ब्रह्मरूपधरः शेते शेषाहावम्बुसंप्लवे त्रैलोक्यमखिलं ग्रस्त्वा
भगवानादिकृद्विभुः ॥ स्वमायासंस्थितो विप्र सर्वभूतो जनार्दनः । ततः प्रबुद्धो भगवान्यथा पूर्वं तथा पुनः ॥ सृष्टिं करोत्यव्ययात्मा कल्पे कल्पे रजोगुणः ॥ म ६३
नवो भूभुजः सेन्द्रा देवाः सप्तर्षयस्तथा ॥ सात्त्विकोंऽशः स्थितिकरो जगतो द्विजसत्तम । चतुर्युगेष्वसौ विष्णुः स्थितिव्यापारलक्षणः ॥ युगव्यवस्थां कुरुते यथा मैत्र
य तच्छृणु । कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक ॥ ददाति सर्वभूतानां सर्वभूतहिते रतः ॥ चक्रवर्तिस्वरूपेण त्रेतायामपि स प्रभुः ॥ दुष्टानां निग्रहं कुर्वन्प :
रिपाति जगत्त्रयी । वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः ॥ करोति बहुलीभूतं वेदव्यासस्वरूपधृक् । वेदांस्तु द्वापरे व्यस्य कलेरन्ते पुनर्हरिः ॥ कल्किस्वरू

पी दुर्वृत्तानां मार्गे स्थापयति प्रभुः ॥ एवमेव जगत्सर्वं परिपाति करोति च ॥ हन्ति चान्तेष्वनन्तात्मा नास्त्यस्माद्व्यतिरेकि यत् । भूतं भव्यं भविष्यच्च सर्वभूतात्म
नात्मनः ॥ सद्भावेनान्यत्र वा विप्र सद्भावः कथितो मया । मन्वन्तराण्यशेषाणि कथितानि मया तव ॥ मन्वन्तराधिपाश्चैव किमन्यत्कथयामि ते ॥ इति श्रीविष्णुपुरा
णे विष्णुपुराणे तृतीयेंऽशे द्वितीयोऽध्यायः ॥ ॥ मैत्रेय उवाच ॥ ज्ञातमेतन्मया त्वत्तो यथा सर्वमिदं जगत् । विष्णुर्विष्णौ विष्णुतश्च न परं विद्यते ततः ॥ एत
त्तु श्रोतुमिच्छामि व्यस्ता वेदा महात्मना । वेदव्यासस्वरूपेण यथा तेन युगे युगे ॥ यस्मिन्यस्मिन्युगे व्यासो यो य आसीन्महामुने । तं ममाचक्ष्व भगवन् शाखाभे
दांश्च मे वद ॥ ॥ पराशर उवाच ॥ वेदद्रुमस्य मैत्रेय शाखाभेदाः सहस्रशः । न शक्यो विस्तराद्वक्तुं संक्षेपेण शृणुष्व तम् ॥ द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने । वेद
मेकं सुबहुधा कुरुते जगतो हितः ॥ वीर्यं तेजो बलं चाल्पं मनुष्याणामवेक्ष्य वै । हिताय सर्वभूतानां वेदभेदान्करोति सः ॥ यया स कुरुते तन्वा वेदमेकं पृथक् प्रभुः
वेदव्यासाभिधाना तु सा च मूर्तिर्मधुद्विषः ॥ यस्मिन्मन्वन्तरे व्यासा ये ये स्युस्तान्निबोध मे ॥ यथा च शाखा व्यासेन कृता यन्महामते । अष्टाविंशतिकृत्वो वै वेदा व्य :

ष्कामहर्षिणिः। वैवस्वतेन्तरे तस्मिन् द्वापरेषु पुनः पुनः॥ वेदव्यासा व्यतीता ये अष्टाविंशति सत्तम। चतुर्द्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः॥ द्वापरे प्रथमे व्यस्तः स्व-
यं वेदः स्वयंभुवा। द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः॥ तृतीये चोशना व्यासश्चतुर्थे च बृहस्पतिः। सविता पंचमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः॥ सप्तमे च
तथैवेन्द्रो वसिष्ठश्चाष्टमे स्मृतः। सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः॥ एकादशे तु त्रिशिखो भरद्वाजस्ततः परः। त्रयोदशे चान्तरिक्षो वर्णी चापि चतुर्दशे॥
त्रय्यारुणः पंचदशे षोडशे तु धनंजयः। कृतंजयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः॥ ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः। गौतमादुत्तरो व्यासो हर्यात्मा ९४
यो विधीयते। अथ हर्यात्मनो व्यासः स्मृतो वाजिश्रवा मुनिः॥ जतूकर्ण्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः। अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः॥ एको वेद-
श्चतुर्द्धा यैः कृतो वेदो द्वापरे युगे। भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति॥ व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुनौ। ध्रुवमेकाक्षरं ब्रह्म ओमित्येवं व्यवस्थितं॥ बृ-
हत्त्वाद् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयते। प्रणवावस्थितं नित्यं भूर्भुवःस्वरितीर्यते॥ ऋग्यजुःसामाथर्वाणो यत्तस्मै ब्रह्मणे नमः॥ जगतः प्रलयोत्पत्त्योर्यत्क-

कारणसंज्ञितं॥ महतः परमं गुह्यं तस्मै सुब्रह्मणे नमः॥ अगाधापारमक्षय्यं जगत्संमोहनालयं॥ स्वप्रकाशप्रवृत्तिभ्यां पुरुषार्थप्रयोजनं। सांख्यज्ञानवतां निष्ठा
गतिः शमदमात्मनां॥ यत्तदव्यक्तममृतं प्रवृत्तिर्ब्रह्म शाश्वतं। प्रधानमात्मयोनिश्च गुहासत्वं च शब्द्यते। अविभागं तथा शुक्रमक्षयं बहुधात्मकं। परमब्रह्मणे त-
स्मै नित्यमेव नमो नमः॥ यद्रूपं वासुदेवस्य परमात्मस्वरूपिणः। एतद्ब्रह्म त्रिधा भेदमभेदमपि स प्रभुः॥ सर्वभूतेष्वभेदोऽसौ भिद्यते भिन्नबुद्धिभिः। स ऋङ्मयः साममयः
सर्वात्मा स यजुर्मयः॥ ऋग्यजुःसामसारात्मा स एवात्मा शरीरिणां। स भिद्यते वेदमयः स वेदं करोति भेदैर्बहुभिः सशाखं। शाखाप्रणेता स समस्तशाखाज्ञान-
स्वरूपो भगवाननन्तः॥ इति श्रीविष्णुपुराणे तृतीयेंऽशे तृतीयोऽध्यायः॥ ॥ आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः। ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक्॥ त-
तोऽत्र मत्सुतो व्यासो अष्टाविंशतिमेऽन्तरे। वेदमेकं चतुष्पादं चतुर्द्धा व्यभजत् प्रभुः॥ यथा तु तेन वै व्यस्ता वेदव्यासेन धीमता। वेदास्तथा समस्तैस्तैर्व्यस्ता व्यासैस्तथा मया
॥ तदनेनैव वेदानां शाखाभेदान् द्विजोत्तम। चतुर्युगेषु रचितान् समस्तेष्ववधारय॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं। को ह्यन्यो भुवि मैत्रेय महाभार-

न्या।

नरूहवान् ॥ सन्त्यस्ता यथा व्यस्ता मत्पुत्रेण महात्मना । द्वापरे वत्र मैत्रेय तन्मे शृणु यथार्थतः ॥ ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे । अथ शिष्यान् स जग्राह चतु-
रो वेदपारगान् ॥ ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः । वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत् ॥ जैमिनिं सामवेदस्य तथैवाथर्ववेदविन् । सुमन्तुस्तस्य शि-
ष्योऽभूद् वेदव्यासस्य धीमतः ॥ रोमहर्षणनामानं वेदस्य वा गुरुं महाबुद्धिं महामुनिम् ॥ सूतं जग्राह शिष्यं स इतिहासपुराणयोः ॥ एक आसीद् यजुर्वेदस्तं चतुर्धा
व्यकल्पयत् । चातुर्होत्रमभूत् तस्मिंस्तेन यज्ञमथाकरोत् ॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः । औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥ ततः स ऋच उद्धृ-
त्य ऋग्वेदं कृतवान् मुनिः । यजूंषि च यजुर्वेदं सामवेदं च सामभिः ॥ राज्ञस्त्वथर्ववेदेन सर्वकर्माणि स प्रभुः । कारयामास मैत्रेय ब्रह्मत्वं च यथास्थितिः ॥ सोऽय- ९३
मेको महावेदतरुस्तेन पृथक्कृतः । चतुर्धाथ ततो जातं वेदपादपकाननम् ॥ विभेद प्रथमं विप्र पैलो ऋग्वेदपादपं ॥ इन्द्रप्रमितये प्रादाद् बाष्कलाय च संहिते । चतु-
र्धा स विभेदाथ बाष्कलिर्निजसंहिताम् । बोध्यादिभ्यो ददौ तास्तु शिष्येभ्यः स महामुनिः ॥ बोध्याग्निमाढवौ तद्वद् याज्ञवल्क्यपराशरौ । प्रतिशाखास्तु शाखायास्तस्यास्ते जगृ-



हुर्मुने ॥ इन्द्रप्रमितिरेकां तु संहितां स्वसुतं ततः । माण्डुकेयं महात्मानं मैत्रेयाध्यापयत् तदा ॥ तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यक्रमाद् ययौ । वेदमित्रस्तु शाकल्यः संहिता-
मधीतवान् ॥ चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः । तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु ॥ मुद्गलो गोमुखश्चैव वात्स्यः शालीय एव च । शिशिरः पञ्चमश्चासी-
न्मैत्रेय सुमहामतिः ॥ संहितात्रितयं चक्रे शाकपूर्णिस्तथेतरः । निरुक्तमकरोत् तद्वच्चतुर्थं मुनिसत्तम ॥ क्रौञ्चो वैतालिकस्तद्वद् बलाकश्च महामुनिः । निरुक्तकृच्चतुर्थोऽभू-
द् वेदवेदाङ्गपारगः ॥ इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम । बाष्कलिश्चापरास्तिस्रः संहिताः कृतवान् द्विज ॥ शिष्यः कालायनिर्गार्ग्यस्तृतीयश्च कथाजवः । इत्ये-
ते बह्वृचाः प्रोक्ताः संहिता यैः प्रवर्तिताः ॥ इति श्रीविष्णुपुराणे तृतीयांशे चतुर्थोऽध्यायः ॥ ॥ यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः । वैशम्पायननामासौ व्यास-
शिष्यश्चकार वै । प्रददौ ताश्च शिष्येभ्यो जगृहुस्तेऽप्यनुक्रमात् ॥ याज्ञवल्क्यस्तु तस्याभूद् ब्रह्मरातसुतो द्विज । शिष्यः परमधर्मज्ञो गुरुवृत्तिपरः सदा ॥ ऋषिर्योऽयं महामेरौ
समाजे नागमिष्यति । तस्य वै सप्तरात्रान्तु ब्रह्महत्या भविष्यति ॥ पूर्वमेवं मुनिगणैः समयो यः कृतो द्विज । वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तथा ॥ स्वस्रीयं बालकं

पर्द

शाथ प्रदाद्दष्टम घातयत् । शिष्यानात्वया शिष्यो ब्रह्मरुस्यावमं ॥ वन धंमत्कृ गमस्व न विचार्य्यमिदं तथा । अथाह याज्ञवल्क्यस्तु किमर्थ भगवन् द्विज ॥ क्लेशितास्त्वया तस्य त
आत्मिश्च निश्चह मिदं वनं । न मः कृद्धाज्ञवल्क्यह याज्ञवल्क्य महामति ॥ मुच्यतां यत्त्वयाधीतं मत्तो विप्र मयार्पितं । निष्कृत सा वदस्य नान्यश्च ब्राह्मणपुंगवान् ॥ मेन शिष्यान
नात्यश्चसि समाख्यातं गंगां काविणा ॥ याज्ञवल्क्यस्तदा प्राह तत्त्कतस्तु मयाधिगतं ॥ समाप्यतीत्वयाधीतं तन्मया मादिर्धं द्विज ॥ ॥ पराशर उवाच ॥ इत्युक्त्वा वधिनाक्ता
नि सरूपाणि यजूंषि वै । ऊर्द्ध यित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥ यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज । जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः ॥ ब्रह्म ९३
हत्या पदैर्वीर्णेच्छुक्त्वा चरणाध्वर्युम्भूवेः चरकाध्वर्यवस्तेन चरणान्मुनिसत्तम ॥ याज्ञवल्क्योथ मैत्रेय प्राणायामपरायणः ॥ तुष्टाव प्रणतः सूर्य्यं यजूंष्यभिलषंस्तत
थः ॥ ॥ याज्ञवल्क्य उवाच ॥ नमः सवित्रे द्वाराय मुक्तेः अमिततेजसे । ऋग्यजुःसामभूताय त्रयीधामवते नमः ॥ नमोग्निषोमभूताय जगतः कारणात्मने । भास्करा
यपरं तेजः सौषुम्नरविभ्रते ॥ कलाकाष्ठानिमेषादि कालज्ञानात्मने नमः । ध्येयाय विष्णुरूपाय परमाक्षररूपिणे ॥ बिभर्ति यः सुरगणानाप्याय्येन्दुं स्वरश्मिभिः

विग

नू
स्वधामृतेन च पितॄंस्तस्मै तृप्त्यात्मने नमः ॥ नमो हिमाम्बुतापाय सर्व्वसिद्धिकराय च । हिमाम्बुधर्म्मवृष्टीनां कर्त्ता भर्त्ता च यः प्रभुः ॥ तस्मै त्रिकालरूपाय नमः सूर्य्याय
वेधसे । अपहन्ति तमो यश्च जगतोस्य जगत्पतिः ॥ सत्त्वधामधरो देवो नमस्तस्मै विवस्वते । सत्कर्म्मयोग्यो न जनो नैवापः शौचकारणं ॥ यस्मिन्ननुदिते तस्मै नमो देवाय
भास्वते । स्पृष्टो यदंशुभिर्लोकः क्रियायोग्यो हि जायते ॥ पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥ नमः सवित्रे सूर्य्याय भास्कराय विवस्वते ॥ आदित्यायादिभूताय देवादीनां
नमो नमः ॥ हिरण्मयं रथं यस्य केतवोमृतवाजिनः ॥ वहन्ति भुवनालोकचक्षुषं तं नमाम्यहं ॥ ॥ पराशर उवाच ॥ इत्येवमुक्तो यदा तस्मै यजूंषि भगवान् रविः । आययौ
यामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥ यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम । वाजिनस्ते समाख्याताः सूर्य्योश्वः सोभवद्यतः ॥ शाखा भेदास्तु येषां वै दश पञ्च च वाजिनां ।
काण्वाद्यास्तु महाभाग याज्ञवल्क्यप्रवर्त्तिताः ॥ इति श्रीविष्णुपुराणे तृतीयेंशे पञ्चमोध्यायः ॥ ॥ पराशर उवाच ॥ सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः । क्रमे
ण येन मैत्रेय विभेद शृणु तन्मम ॥ सुमन्तुस्तस्य पुत्रोभूत् सुकर्म्मास्यापि तत्सुतः ॥ अधीतवन्तावेकैकां संहितां तौ महामुनी ॥ क्रमेण येन मैत्रेय विभेद शृणु तन्मम ॥

हन

साहस्रं संहिताभेदं सुकर्म्मा तत्सुतस्ततः॥ चकार तञ्च तच्छिष्यौ जगृहाते महाव्रतौ। हिरण्यनाभः कौशल्यः पौष्पिञ्जिश्च द्विजोत्तमः॥ उदीच्याः सामगाः शिष्यास्तस्य पं
चदशस्मृताः॥ हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः॥ गृहीतास्तेपि चोच्य प्राच्यसामगाः॥ लोकाक्षिः कुथुमिश्चैव कुसीदि लाङ्गलिस्तथा॥ पौष्पिञ्जिशिष्यास्तद्भे
दैः संहिता बहुलीकृताः॥ हिरण्यनाभशिष्यास्तु चतुर्विंशति संहिताः॥ तैश्चापि सामवेदासौ शाखाभिर्बहुलीकृतः॥ अथर्व्वणामथो वक्ष्ये संहितानां समुच्चयं॥ अथर्व्ववेदं स
मुनिः सुमन्तुरमितद्युतिः॥ शिष्यमध्यापयामास कबन्धं सोपि च द्विधा॥ कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान्॥ देवदर्शस्य शिष्यास्तु मौदो ब्रह्मबलिस्तथा॥ शौल्कायनिः २७
पप्पलादस्तथान्यामुनिसत्तम॥ पथ्यस्यापि त्रयः शिष्याः कृता यैर्द्विज संहिताः॥ जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज॥ शौनकस्तु द्विधा कृत्वा ददावेकां तु बभ्र
भ॥ द्वितीयां संहितां प्रादात्सैन्धवायनसंज्ञिने॥ सैन्धवा मुञ्जिकेशश्च भिन्ना द्विधा पुनस्त्रिधा॥ नक्षत्रकल्पो वेदानां संहितानां तथैव च॥ चतुर्थः स्यादाङ्गिरसः शान्तिकल्प
श्च पञ्चमः॥ श्रेष्ठास्त्वथर्व्वणामेते संहितानां विकल्पकाः॥ आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः॥ पुराणसंहितां चक्रे पुराणार्थविशारदः॥ प्रख्यातो व्यास

शिष्याभूत्सूतो वै लोमहर्षणः॥ पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥ सुमतिश्चाग्निवर्च्चाश्च मित्रयुः शांशपायनः॥ अकृतव्रणोथ सावर्ण्णिः षट् शिष्यास्तस्य चाभवन्॥
काश्यपः संहिताकर्त्ता सावर्ण्णिः शांशपायनः॥ लोमहर्षणिका चान्या तिसृणां मूलसंहिता॥ चतुष्टयेनाप्येतेन संहितानामिदं मुने॥ आद्यं सर्वपुराणानां पुराणं ब्राह्मम
च्यते॥ अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते॥ ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा॥ तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमं॥ आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा
॥ दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतं॥ वाराहं द्वादशञ्चैव स्कान्दञ्चात्र त्रयोदशं॥ चतुर्दशं वामनञ्च कौर्म्मं पञ्चदशं स्मृतं॥ मात्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परं॥ सर्गश्च
प्रतिसर्गश्च वंशो मन्वन्तराणि च॥ सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितञ्च यत्॥ यदेतत्तव मैत्रेय पुराणं कथ्यते मया॥ एतद्वैष्णवसंज्ञं वै पाद्मस्य समनन्तरं॥ सर्गे च प्रतिसर्गे
च वंशमन्वन्तरादिषु॥ कथ्यते भगवान्विष्णुरशेषेष्वेव सत्तम॥ अङ्गानि चत्वारो वेदा मीमांसा न्यायविस्तरः॥ पुराणं धर्म्मशास्त्रं च विद्या ह्येताश्चतु र्दश॥ आयुर्वेदो
धनुर्वेदो गान्धर्व्वश्चैव ते त्रयः॥ अर्थशास्त्रं चतुर्थन्तु विद्या ह्यष्टादशैव ताः॥ ज्ञेया ब्रह्मर्षयः पूर्व्वं तेभ्यो देवर्षयः पुनः॥ राजर्षयः पुनस्तेभ्य ऋषिप्रकृतयस्त्रयः॥ इति शाख

ःप्रसिद्ध्याताः शाखाशयास्तथैव च। कस्मिन्नेव शाखानां तदहं श्रोतुमिच्छथादिनः॥ सर्वमन्वन्तरेष्वेव शाखाभेदाः समास्मृताः॥ प्राजापत्या श्रुतिर्नित्या तद्विकल्पास्त्विमे
द्विज॥ एतत्सर्वादि सर्वं यत्पृष्टोऽहमिह त्वया॥ अथ यच्चापरं वक्ष्यं किमन्यत्कथयामि ते॥ इति श्रीविष्णुपुराणे तृतीयांशे शाखाप्रणयने षष्ठोऽध्यायः॥ ॥मैत्रेय उवा
च॥ यथावत्कथितं सर्वं यत्पृष्टोऽसि मया द्विज। श्रोतुमिच्छाम्यहं त्वेकं तद्भवान्प्रब्रवीतु मे॥ सप्तद्वीपानि पातालवीथ्यश्च सुमहामुने। सप्त लोकाश्च ये ऽन्तःस्था ब्रह्माण्ड
स्यास्य सर्वतः। स्थूलैः सूक्ष्मैस्तथा सूक्ष्मसूक्ष्मात्सूक्ष्मतरैस्तथा॥ स्थूलैः स्थूलतरैश्चैव सर्वं प्राणिभिरावृतं। अङ्गुलस्याष्टभागोऽपि न सोऽस्ति मुनिसत्तम॥ न सन्ति प्राणिनो यत्र २८
कर्मबन्धनिबन्धनाः॥ सर्वे चैते वशं यान्ति यमस्य भगवन्किल। आयुषोऽन्ते तथा यान्ति यातनास्तत्प्रचोदिताः॥ यातनाभ्यः परिभ्रष्टा देवाद्यास्वथ योनिषु। जन्तवः परिवर्त
न्ते शास्त्राणामेष निर्णयः। सोऽहमिच्छामि तच्छ्रोतुं यमस्य वशवर्तिनः॥ न भवन्ति नरा येन तत्कर्म कथयामि मे॥ ॥पराशर उवाच॥ अयमेव मुने प्रश्नो नकुलेन
महात्मना। पृष्टः पितामहः प्राह भीष्मो यत्तच्छृणुष्व मे॥ ॥भीष्म उवाच॥ पुरा ममागतो वत्स सखा कालिंगको द्विजः। स मामुवाच पृष्टो वै मया जातिस्मरो मुनि

ः। तेनाख्यातमिदं चेदमित्थं चैतद्भविष्यति। तथा च तदभूद्वत्स यथोक्तं तेन धीमता॥ स पृष्टश्च मया भूयः श्रद्दधानवता द्विजः। यद्यदाह न तद्दृष्टमन्यथा हि मया क्वचि
त्॥ एकदा तु मया पृष्टं यदेतद्भवतोदितं। प्राह कालिंगको विप्रः स्मृत्वा तस्य मुनेर्वचः॥ जातिस्मरेण कथितं रहस्यं परमं मम। यमकिंकरयोर्यत्तु संवादं तद्ब्र
वीमि ते॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान्प्रभुरहमन्यनृणां न वैष्णवानां॥ अहममरवरार्चितेन धात्रा य
म इति लोकहिताहिते नियुक्तः। हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः॥ कनकमुकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकं।
सुरपशुमनुजादयस्तथान्ते गुणकलुषेण सनातनेन तेन॥ हरिममरवरार्चिताङ्घ्रिपद्मं प्रणमति यः परमार्थतो हि मर्त्यः। तमपगतसमस्तपापबन्धं व्रज परिहृत्य
यथाग्निमाज्यसिक्तं॥ इति यमवचनं निशम्य पाशी यमपुरुषस्तमुवाच धर्मराजं। कथय मम विभो समस्तधातुर्भवति हरेः खलु यादृशोऽस्य भक्तः॥ ॥यम उवाच
॥ न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे। न हरति न च हन्ति किञ्चिदुच्चैः सितमनसं तमवेहि विष्णुभक्तं॥ कलिकलुषमलेन यस्य नात्मा विमलः

मिव

मतमर्मितिनीकमलभूमनी । मनसि कृतजनार्दनमनुष्यं सगतमवहि दृश्यवगीवरूपं ॥ कनकमणिनिरूपस्य वक्षवृक्षा हृणानपियश्चसमवाणिवेपनधी । रुवतिवरुवरेण्यन
न्यश्वता पुरुषवरं तमवादि विष्णुरूपं ॥ स्फटिकमणिशिलामश्च विष्णुमनसि नणीध्रवमत्स्यवादिदोषश्च । नहि तु हि न मरुषवरनिपुरिह रुवति दृतागनदी फिरश्चप्रनाप
श्च ॥ विमलमति वमत्सनश्चपुराणकश्च गुविवविता खिलसत्वमिन्द्ररूपश्च । प्रियहितवचनाक्रमानमाथावपतिसदा हृदितस्यवासुदेवः ॥ वसतिहृदि सनातनवविष्णुरू
वतिपुमाक्तगभास्यसौम्यरूपश्च । तिं हि वसमतिस्य मालनाकश्च कथयति वाचमेयवगमलपोतश्च । यमनियमविधूतकल्मषाणीं मनुदिनमच्युतसक्तमानसानां ॥ श्रु
पागत     मुत्सवाणीं वरुरूपंदू वनवनमानवानां । हृदियदि रुगवानना दिवास्य हृविनुसिंशंखगदाधरावयात्मा ॥ तदहमघविघातकर्तृहितं रुवतिक
र्थसतिवाश्वकामकं । रुवतिपरधनीनिरुकिजन्हुनूदतिमथा । न्तनिष्टुवाणियश्चात्रु शुरुमेतिं तिनदुर्म्मदस्यपुंसः कल्मषमभहृदि कस्यनास्मनकश्च । नसहृतिपव
स्पवविनिन्दी कल्मषमतिश्चकुवरतसमामसाधुश्च ॥ नंगयतिनदयातियश्चमक्त मननमिन तस्यजनार्दनोस्य धमस्य । परमसहृधिवाश्चकालत सागतनयापिहमात्रह     ९८

स्यवर्गे ॥ श०मतिरुपयामियानुरुच्चं तमधमथ वृमवहिनास्यरुक् । श्रुगुरुमतिवसत्युदूर्लिसकाश्च सततमनार्थविगात्तसंगमरूश्च ॥ अनुदिनकृतपापवश्चयतश्चपु
रुषपगुन्तहि वासुदेवरुकश्च । सकलमिदमहं च वासुदेवश्च परमपुमान्परमेश्वरश्च स एकश्च ॥ इतिमतिरमलारुवयनन्त हृदयगतंव्रजता विद्दूवान् । कमल
नयनवासुदेवविष्णु धरणिधराच्युतशंखचक्रपाणे ॥ रुवशरणं मितीरयन्तियेवै त्यजरतदूरतरमानपापान् । ववसिमनसियस्य थाव्ययात्मा पुरुषव
रस्यवतस्यदृष्टिपाते ॥ गवगतिरथवाममाक्रिवक्र प्रतिहतवीर्यवलस्यलोकश्च ॥     ॥ कलिंगउवाच ॥ इतिनिजरतटमास्नायदवा व्रविनयश्च स किलाह्ध
मवीजश्च । ममकथितमिदं श्रुतं नरारुवी कृतव वरसम्यगिदंममापिवाक्ं ॥     ॥ भीष्मउवाच ॥ नकलुत्तम्यया ख्यातिं पूर्वं तनद्विजन्मना । कलिंगदेशादभ्यस्य प्रीयत
सुमहात्मना ॥ मयाप्युतु यथान्यायं सम्यग्वत्सतवादितं । यथा विष्णुमृते नान्यत्त्राणं संसारसागरे ॥ किंकरादण्डपाशौ वा नयमानवजातनाः समर्थाः किस्यपस्य
सालम्बवालम्बनश्च सदा ॥     ॥ पुलागरउवाच ॥ एतन्मनतवाख्यातं गीतं वैवस्वतेन यत् । प्रसन्नानुगतिसम्य किमन्यच्छोतुमर्हसि ॥     ॥ इतिश्रीविष्णुपुराणे

पैशुन्यं

तृतीयांशे सप्तमोऽध्यायः॥ ॥मैत्रेय उवाच॥ भगवन्भगवान्देवः संसारविजिगीषुभिः। समाख्याहि जगन्नाथो विष्णुराराध्यते यथा॥ आराधिताच्च गोविन्दादाराधन
परैर्नरैः। यत्प्राप्यते फलं श्रोतुं तच्चाहमिच्छामि महामुने॥ ॥पराशर उवाच॥ यत्पृच्छति भवानेतत्सगरेण महात्मना। और्वस्त्वाह यथा पृष्टस्तन्मे कथयतः शृणु॥
और्व उवाच॥ भौमान्मनोरथान्स्वर्गं स्वर्गिवन्द्यं तथा परं। प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमं॥ यद्यदिच्छति यावच्च फलमाराधितेऽच्युते। तत्तदाप्नोति राजेन्द्र भूरि
स्वल्पमथापि वा। यत्तु पृच्छसि भूपाल कथमाराध्यते हरिः॥ तदहं सकलं तुभ्यं कथयामि निबोध मे। वर्णाश्रमाचारवता पुरुषेण परः पुमान्॥ विष्णुराराध्यते पन्था ना १००
न्यस्तत्तोषकारकः। यजन्यज्ञान्यजत्येनं जपत्येनं जपन्नृप॥ निघ्नन्नन्यान्हिनस्त्येनं सर्वभूतो यतो हरिः। तस्मात्सदाचारवता पुरुषेण जनार्दनः॥ आराध्यते स्वव
र्णोक्तधर्मानुष्ठानकारिणा। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च पृथिवीपते॥ स्वधर्मतत्परो विष्णुमाराधयति नान्यथा। परापवादमनृतं च न भाषते॥ अन्योद्वेगकरं वा
पि तोष्यते तेन केशवः। परपत्नीपरद्रव्यपरहिंसासु यो रतिं॥ न करोति पुमान्भूप तोष्यते तेन केशवः। न ताडयति नो हन्ति प्राणिनोऽन्यांश्च देहिनः॥ यो मनु

हदाग

ष्यो मनुष्येन्द्र तोष्यते तेन केशवः। देवद्विजगुरूणां यः शुश्रूषासु सदोद्यतः॥ तोष्यते तेन गोविन्दः पुरुषेण नरेश्वर। यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा॥ हितकामो ह
रिस्तेन सर्वदा तोष्यते सुखं। यस्य रागादिदोषेण न दुष्टं नृप मानसं॥ विशुद्धमनसा विष्णुस्तोष्यते तेन सर्वदा। वर्णाश्रमेषु ये धर्माः शास्त्रोक्ता नृपसत्तम॥ तेषु तिष्ठन्न
रो विष्णुमाराधयति नान्यथा॥ ॥सगर उवाच॥ तदहं श्रोतुमिच्छामि वर्णधर्मानशेषतः। तथैवाश्रमधर्मांश्च द्विजवर्य ब्रवीहि तान्॥ ॥और्व उवाच॥ ब्राह्मणक्ष
त्रियविशां शूद्राणां च यथाक्रमं। त्वमेकाग्रमना भूत्वा शृणु धर्मान्मयोदितान्॥ दानं दद्याद्यजेद्देवान्यज्ञैः स्वाध्यायतत्परः। नित्योदकी भवेद्विप्रः कुर्याच्चाग्निपरिग्रहं
॥ वृत्त्यर्थं याजयेच्चान्यानन्यानध्यापयेत्तथा। कुर्यात्प्रतिग्रहादानं शुक्लार्थान्न्यायतो द्विजः॥ सर्वलोकहितं कुर्यान्नाहितं कस्यचिद्द्विजः। मैत्री समस्तभूतेषु ब्राह्मणस्यो
त्तमं धनं॥ ग्राव्णि रत्ने च पारक्ये समबुद्धिर्भवेद्द्विजः। ऋतावभिगमः पत्न्यां शस्यते चास्य पार्थिव॥ दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि हि। यजेच्च विविधैर्यज्ञैर
धीयीत च पार्थिव॥ शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका। तस्यापि प्रथमः कल्पः पृथिवीपरिपालनं॥ धरित्रीपालनेनैव कृतकृत्या नराधिपः। भवन्ति नृपतेरंशाः

यजनायजनादिकर्म्मणां । दुष्टानांशासनाद्राजा शिष्टानांपरिपालनात् ॥ प्राप्नोत्यभिमताँल्लोकान्वर्णसंस्थांकरोतियः ॥ पाशुपाल्यंचवाणिज्यं कृषिंचमनुजेश्वर ॥ वैश्या
यजीविकांब्रह्मादयोलोकपितामहः । तस्याप्यध्ययनंयज्ञोदानंकर्म्मचसम्मतं ॥ नित्यनैमित्तिकादीनांमनुष्ठानंचकर्म्मणां । द्विजातिसंश्रयंकर्म्म तादर्थ्यं तेनपोष
णं । क्रयविक्रयजैर्वापि धनैःकारूद्भवैस्तथा ॥ दानंचदद्याच्छूद्रोपि पाकयज्ञैर्यजेतच । पित्र्यादिकंचवैसर्वं शूद्रःकुर्वीततेनवै । भृत्यादिभरणार्थाय सर्वेषांचप
रिग्रहः । ऋतुकालाभिगमनंस्वदारेषुमहीपते ॥ दयासर्वभूतेषु तितिक्षानातिमानता । सत्यंशौचमनायासोमंगलंप्रियवादिता ॥ मैत्र्यस्पृहातथातद्वदकार्प १०१
ण्यंनरेश्वर । अनसूयाचसामान्या वर्णानांकथितागुणाः ॥ आश्रमाणांचसर्वेषां मन्येसामान्यलक्षणाः ॥ गुणांस्तथापद्धर्म्मांश्च विप्रादीनामिमाञ्छृणु ॥ क्षात्रंकर्म्मद्वि
जस्योक्तं वैश्यकर्म्मतथापदि ॥ राजन्यस्यचवैश्योक्तं शूद्रकर्म्मनचैतयोः ॥ सामर्थ्येसतितत्त्याज्यमुभाभ्यामपिपार्थिव ॥ तदेवापदिकर्त्तव्यं नकुर्य्यात्कर्म्मसंकरं । इत्येतत्कथितंराजन्वर्णधर्म्माश्रितंतव ॥ धर्म्ममाश्र
मिणांसम्यग्ब्रुवतोमेनिशामय ॥ इतिश्रीविष्णुपुराणेतृतीयेंशेअष्टमोध्यायः ॥ ॥ और्व्वउवाच ॥ बालःकृतोपनयनोवेदाहरणतत्परः । गुरुगेहेवसेद्भूप

मि२

ब्रह्मचारीसमाहितः । शौचाचारव्रतातत्रकार्य्यंशुश्रूषणंगुरोः ॥ व्रतानिचरताग्राह्योवेदश्चकृतबुद्धिना ॥ उभेसंध्येरविंभूप तथैवाग्निंसमाहितः ॥ उपतिष्ठेत्तथाकु
र्य्याद्गुरोरप्यभिवादनं । स्थितेतिष्ठेद्व्रजेयायान्नीचैरासीतचासति ॥ शिष्योगुरोर्नृपश्रेष्ठप्रतिकूलंनसंचरेत् । तेनैवोक्तःपठेद्वेदंनान्यचित्तःपुरःस्थितः ॥ अनुज्ञा
तंचभिक्षान्नमश्नीयाद्गुरुणाततः ॥ अवगाहेदपःपूर्वमाचार्य्येणावगाहिताः ॥ समिज्जलादिकंचास्यकल्यंकल्यमुपानयेत् । गृहीतग्राह्यवेदश्चततोनुज्ञामवाप्यवै ॥ गा
र्हस्थ्यमाविशेत्प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥ विधिनावाप्तदारस्तुधनंप्राप्यस्वकर्म्मणा ॥ गृहस्थकार्य्यमखिलंकुर्य्याद्भूपालशक्तितः ॥ निवापेनपितॄनर्च्ययज्ञैर्देवांस्तथाति
थीन् ॥ अन्नैर्मुनींश्चस्वाध्यायैरपत्येनप्रजापतिं । बलिकर्म्मणाभूतानिवात्सल्येनाखिलंजगत् ॥ प्राप्नोतिलोकान्पुरुषोनिजकर्म्मसमार्जितान् । भिक्षाभुजश्चयेकेचित्परि
व्राड्ब्रह्मचारिणः ॥ तेप्यत्रैवप्रतिष्ठन्तेगार्हस्थ्यंतेनवैपरं ॥ वेदाहरणकार्य्येणतीर्थस्नानायचप्रभो । अटन्तिवसुधांविप्राःपृथिवीदर्शनायच ॥ अनिकेताह्यनाहा
रायत्रसायंगृहाश्चये । तेषांगृहस्थःसर्वेषांप्रतिष्ठायोनिरेवच ॥ तेषांस्वागतदानादिवक्तव्यंमधुरंनृप । गृहागतानांदद्याच्चशयनासनभोजनं ॥ अतिथिर्यस्य
नी१

ग्नाशो गृहात्प्रतिनिवर्त्तते । अदत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ अवज्ञानमहंकारो दम्भश्चापि गृहे सतः । परितापोपघातौ च पारुष्यं च न शस्यते ॥ यस्तु स-
म्यक्करोत्येवं गृहस्थः परमं विधिं । सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान् ॥ वयःपरिणतो राजन् कृतकृत्यो गृहाश्रमी । पुत्रेषु भार्यां निःक्षिप्य वनं या-
यात्सहैव वा ॥ पर्णमूलफलाहारः केशश्मश्रुजटाधरः । भूमिशायी भवेत्तत्र मुनिः सर्वातिथिर्नृप ॥ चर्मकाशकुशैः कुर्यात्परिधानोत्तरीयके । तद्वत्त्रिष- १०२
वणं स्नानं शस्तमस्य नरेश्वर ॥ देवताभ्यर्च्चनं होमः सर्वाभ्यागतपूजनं । भिक्षा बलिप्रदानं च शस्तमस्य नरेश्वर ॥ वन्यस्नेहेन गात्राणां मर्दनं चास्य शस्यते । तपश्च
तस्य राजेन्द्र शीतोष्णादिसहिष्णुता ॥ यस्त्वेतानियतश्चर्य्यां वानप्रस्थश्चरेन्मुनिः । स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥ चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो
मनीषिभिः । तस्य स्वरूपं गदतो नृप श्रोतुं ममार्हसि ॥ पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप । चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥ त्रैवर्गिकांस्त्यजेत्सर्वा-
नारम्भानवनीपते । मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥ जरायुजाण्डजादीनां वाङ्मनःकर्मभिः क्वचित् । युक्तः कुर्वीत न द्रोहं सर्वसंगांश्च वर्जयेत् ॥ एकरात्र-



स्थितिर्ग्रामे पंचरात्रस्थितिः पुरे । तथा तिष्ठेद्यथाप्रीतिर्द्वेषो वास्य न जायते ॥ प्राणयात्रानिमित्तं च व्यंगारे भुक्तवज्जने । काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद्गृहान् ॥ कामः
क्रोधस्तथा दर्पलोभमोहादयश्च ये । तांस्तु दोषान्परित्यज्य परिव्राण्निर्ममो भवेत् ॥ अभयं सर्वसत्वेभ्यो दत्वा यश्चरते मुनिः । न तस्य सर्वसत्वेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति । विप्रस्तु भिक्षोपगतैर्हविर्भिश्चिताग्निकानां व्रजते स लोकान् ॥ मोक्षाश्रमं यश्चरते यथोक्तं शुचिः स्वसंकल्पितबु-
द्धियुक्तः । अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मलोकं श्रयते द्विजातिः ॥ इति श्रीविष्णुपुराणे तृतीयेंऽशे यतिधर्म्मा नाम नवमोऽध्यायः ॥ ॥ सगर उवाच ॥ कथितं चातुरा-
श्रम्यं चातुर्वर्ण्यक्रियास्तथा । पुंसः क्रियामहं श्रोतुमिच्छामि द्विजसत्तम ॥ नित्यनैमित्तिकाः काम्याः क्रियाः पुंसामशेषतः । समाख्याहि भृगुश्रेष्ठ सर्वज्ञो ह्यसि मे मतः ॥ ॥
और्व उवाच ॥ यदेतदुक्तं भवता नित्यनैमित्तिकाश्रयं । तदहं कथयिष्यामि शृणुष्वैकमना मम ॥ जातस्य जातकर्मादिक्रियाकाण्डमशेषतः । पुत्रस्य कुर्वीत पिता श्राद्धं चा-
भ्युदयादिकं ॥ युग्मान्तु प्राङ्मुखान्विप्रान् भोजयेन्मनुजेश्वर । यथावृत्तिस्तथा कुर्याद्दैवं पित्र्यं द्विजन्मनां ॥ दध्ना यवैः सबदरैर्मिश्रान्पिण्डान्मुदा युतः । नान्दीमुखेभ्य

स्कोर्थेनदद्याद्देवनपार्थिव ॥प्राजापत्यंनवासर्व्वमूपचारप्रदक्षिणं।कूर्व्वीततथाशेषवृद्धिकालेषुवैनृप॥ततश्चनामकूर्व्वीतपितैवदशमेहनि।देवपूर्व्वंनरा
ख्यंहिशर्म्मवर्म्मादिसंयुतं॥शर्म्मेतिब्राह्मणस्योक्तंवर्म्मेतिक्षत्रसंश्रयं।गुप्तदासात्मकंनामप्रशस्तंवैश्यशूद्रयोः॥नार्थहीनंनचाशस्तंनापशब्दयुतंतथा।नामङ्ग
ल्यंजुगुप्स्यार्थंनामकुर्य्यात्समाक्षरं॥नातिदीर्घंनातिह्रस्वंनातिगुर्व्वक्षरान्वितं।सुखोच्चार्य्यंतुतन्नामकुर्य्याद्यत्प्रवणाक्षरं।ततोनन्तरसंस्कारसंस्कृतोगुरुवे
श्मनि॥यथोक्तविधिमाश्रित्यकुर्य्याद्विद्यापरिग्रहं।गृहीतविद्योगुरवेदत्वाचगुरुदक्षिणां॥गार्हस्थ्यमिच्छन्भूपालकुर्य्याद्दारपरिग्रहं।ब्रह्मचर्य्येणवाका १०३
लंकुर्य्यात्संकल्पपूर्व्वकं॥गुरोःशुश्रूषणंकुर्य्यात्तत्पुत्रादेरथापिवा।वैखानसोवापिभवेत्परिव्राडथवेच्छया॥पूर्व्वसंकल्पितंयादृक्तादृक्कुर्य्यान्नराधिप।
वर्षैरेकगुणांभार्य्यामुद्वहेत्त्रिगुणःस्वयं॥नातिकेशामकेशांवानातिकृष्णांनपिङ्गलां।निसर्गतोधिकाङ्गींवान्यूनाङ्गीमपिनोद्वहेत्॥नाविशुद्धांसरोगांवाकु
लजांवातिरोगिणीं।नदुष्टांदुष्टवाचालांव्यङ्गिनींपितृमातृतः॥नश्मश्रुव्यञ्जनवतींनचैवपुरुषाकृतिं।नघर्घरस्वरांक्षामांतथाकाकस्वरांनच॥नानिबद्धेक्षणां

तद्वद्वृत्ताक्षींनोद्वहेद्बुधः।यस्याश्चरोमशेजङ्घेगुल्फौयस्यास्तथोन्नतौ॥गण्डयोःकूपकौयस्याहसन्त्यास्तांविवर्जयेत्।नातिरूक्षच्छविंपाण्डुकरजामरुणे
क्षणां॥आपीनहस्तपादांचनकन्यामुद्वहेद्बुधः।नवामनींनातिदीर्घांनोद्वहेत्संहतभ्रुवं।नचातिच्छिद्रदशनांनकरालमुखींनरः॥पञ्चमींमातृपक्षाच्चपितृपक्षाच्च
सप्तमीं।गृहस्थउद्वहेत्कन्यांन्यायेनविधिनानृप॥ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः।गान्धर्व्वराक्षसौचान्यौपैशाचश्चाष्टमोमतः॥एतेषांयस्ययोधर्म्मोव
र्णस्योक्तोमहर्षिभिः।कुर्व्वीतदारग्रहणंतेनान्यंपरिवर्जयेत्॥सधर्म्मचारिणींप्राप्यगार्हस्थ्यंसहितस्तया।समुद्वहेद्ददात्येतत्सम्यगूढंमहाफलं॥इतिश्रीविष्णुपु
राणेतृतीयांशेसंस्कारधर्म्मानामदशमोध्यायः॥ ॥सगरउवाच॥गृहस्थस्यसदाचारंश्रोतुमिच्छाम्यहंमुने।लोकादस्मात्परस्माच्चयमातिष्ठन्नहीयते॥
और्व्वउवाच॥श्रूयतांपृथिवीपालसदाचारस्यलक्षणं।सदाचारवतापुंसाजितौलोकावुभावपि॥साधवःक्षीणदोषास्तुसच्छब्दःसाधुवाचकः।तेषामाचरणंयत्तुसदा
चारःसउच्यते॥सप्तर्षयोथमनवःप्रजानांपतयस्तथा।सदाचारस्यवक्तारःकर्त्तारश्चमहीपते॥ब्राह्मेमुहूर्त्तेचोत्थायस्वस्थमानसोमतिमान्नृप॥विबुध्यचिन्तयेद्धर्म्म

मर्थवाप्याविरोधिनं । अपीडया तथा ॥ कामं सेवेत यावद्धि विरुध्यते ॥ छायाछायाविनाशाय त्रिवर्गसमदर्शिना । परित्यजेदर्थकामौ धर्मपीडाकरौ नृप ॥ धर्ममप्यसुखो-
दर्कं लोकविक्रुष्टमेव च । ततः कल्यं समुत्थाय कुर्यान्मूत्रं नरेश्वर ॥ नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥ दूरादावसथान्मूत्रं पुरीषं च समाचरेत् ॥ पादावसेचनोच्छिष्टप्र-
क्षेपं न गृहाङ्गणे । आत्मच्छायां तरुच्छायां गोसूर्याग्न्यनिलांस्तथा ॥ गुरून् द्विजातींश्च बुधो नाभिमेहेत् कदाचन । न कृष्टे सस्यमध्ये वा गोव्रजे जनसंसदि ॥ न वर्त्मनि न
नद्यादितीर्थेषु पुरुषर्षभ । नाप्सु नैवाम्भसस्तीरे श्मशाने न समाचरेत् ॥ उत्सर्गं वै पुरीषस्य मूत्रस्य च विसर्जनं । उदङ्मुखो दिवा मूत्रं विपरीतमुखो निशि ॥ कु- १०४
र्वीतानापदि प्राज्ञो मूत्रोत्सर्गं च पार्थिव । तृणैरास्तीर्य वसुधां वस्त्रप्रावृतमस्तकः ॥ तिष्ठेन्नातिचिरं तत्र नैव किञ्चिदुदीरयेत् । वल्मीकमूषिकोत्खातां मृदं नान्त-
र्जलां तथा ॥ शौचावशिष्टां गेहाच्च नादद्याल्लेपसम्भवां । अन्तःप्राण्यवपन्नां च हलोत्खातां च पार्थिव ॥ परित्यजेन्मृदश्चैताः सकलाः शौचसाधिकाः । एका लिङ्गे गुदे
तिस्रो दश वामकरे नृप । हस्तद्वये च सप्तान्या मृदः शौचोपपादिकाः ॥ अच्छेनागन्धलेपेन जलेनाबुद्बुदेन च ॥ आचामेत मृदं देहे तथा दद्यात्समाहितः ॥ निष्पादि-

निष्पादिताङ्घ्रिशौचस्तु पादावभ्युक्ष्य वै पुनः ॥ त्रिः पिबेत्सलिलं तेन तथा द्विः परिमार्जयेत् । शीर्षण्यानि ततः खानि मूर्द्धानं च तथालभेत् ॥ बाहू नाभिं च तोयेन हृ-
दयं चैव संस्पृशेत् । स्वाचान्तस्तु ततः कुर्यात्पुमान् केशप्रसाधनं ॥ आदर्शाञ्जनमाङ्गल्यं दूर्वाद्यालम्भनानि च । ततः स्ववर्णधर्मेण वृत्त्यर्थं च धनार्जनं ॥ कुर्वीत श्रद्धा-
सम्पन्नो यजेच्च पृथिवीपते । सोमसंस्थाः हविःसंस्थाः पाकसंस्थाश्च संस्थिताः ॥ धने यतो मनुष्याणां यतेतातो धनार्ज्जने । नदीनदतटाकेषु देवखातजलेषु च ॥
नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च । कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि ॥ स्नायीतोद्धृततोयेन अथवा भुव्यसम्भवे । शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणं ॥
तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः । त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् ॥ ऋषीणां च यथान्यायं सकृच्चापि प्रजापतेः । पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीप-
ते । पितामहेभ्यश्च तथा प्रीणयेत्प्रपितामहान् ॥ मातामहाय तत्पित्रे तत्पित्रे च समाहितः । दद्यात्पैत्र्येण तीर्थेन काम्यं चान्यच्छृणुष्व मे ॥ मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा
नृप । गुरवे मातुलादीनां स्निग्धमित्राय भूभुजे । इदं चापि जपेदम्बु दद्यादात्मेच्छया नृप ॥ उपकाराय भूतानां कृतदेवादितर्पणः । देवासुरास्तथा यक्षा नागगन्धर्व-

तास्तथा पिशाचा गुह्यकाः सिद्धाः कूष्माण्डाः पशवः खगाः ॥ जलेचरा भूमिलया वायवाधाराश्च जन्तवः । प्रीतिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः । नरकेषु समस्तेषु यातना
सु च ये स्थिताः ॥ तेषामाप्यायनायैतद्दीयते सलिलं मया । ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिला यान्तु ये चास्मत्तोऽम्बुकाङ्क्षिणः । काम्योदकप्रदान
क्रमेण कथितं नृप ॥ यदाम्बुप्रीणनं यस्य तन्मनुष्यः सकलं जगत् । जगदाप्यायनोद्भूतं पुण्यमाप्नोति वानघ । दत्त्वा काम्योदकं सम्यक् एतेभ्यः श्रद्धयान्वितः ।
आचम्य च ततो दद्यात् सूर्याय सलिलाञ्जलिं ॥ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने ॥ ततो गृहार्चनं कुर्यादभीष्ट १०१
सुरपूजनं । जलाभिषेकपुष्पाणां धूपादेश्च निवेदनैः । अपूर्वमग्निहोत्रं च कुर्यात्प्राग्ब्रह्मणे नृप । प्रजापतिं समुद्दिश्य दद्यादाहुतिमादरात् ॥ गृह्येभ्यः काश्यपा
याथ ततोऽनुमतये क्रमात् । तच्छेषं मणिके पृथ्वीपर्जन्येभ्यः क्षिपेन्नृप ॥ द्वारे धातुर्विधातुश्च मध्ये च ब्रह्मणे क्षिपेत् । गृहस्य पुरुषव्याघ्र दिग्देवानपि मे शृणु । इन्द्रा
य धर्मराजाय वरुणाय तथेन्दवे । प्राच्यादिषु बुधो दद्याद्धुतशेषादिकं बलिं ॥ प्रागुत्तरे च दिग्भागे धन्वन्तरिबलिं बुधः । निर्वपेद्वैश्वदेवाख्यं कर्म्म कुर्यादतः

दिक्१ १०

परं ॥ वायव्यां वायवे दिक्षु समस्तासु यथादिशं । ब्रह्मणे चान्तरिक्षाय भानवे प्रक्षिपेद्बलिं ॥ विश्वदेवान्विश्वभूतांस्तथा विश्वपतीन्पितॄन् । यक्षाणां च समुद्दिश्य बलिं दद्या
न्नरेश्वर । ततोऽन्यदन्नमादाय भूमिभागे शुचौ बुधः ॥ दद्यादशेषभूतेभ्यः स्वेच्छया तत्समाहितः । देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसङ्घाः । प्र
ताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तं ॥ पिपीलिकाः कीटपतङ्गकाद्या बुभुक्षिताः कर्म्मनिबन्धबद्धाः । प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखि
नो भवन्तु ॥ येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिर्न तथान्नमस्ति । तत्तृप्तयेऽन्नं भुवि दत्तमेतत्ते यान्तु तृप्तिं मुदिता भवन्तु ॥ भूतानि सर्वाणि तथान्नमेतदहं च वि
ष्णुर्न यतोऽन्यदस्ति । तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषां ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसङ्घाः । तृप्त्यर्थमन्नं हि मया निसृष्टं तेषामि
दं ते मुदिता भवन्तु ॥ इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः । भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥ श्वचाण्डालविहङ्गानां भुवि दद्यान्नरस्ततः । ये चान्ये पतिताः
केचिदपात्राः सन्ति मानवाः ॥ ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहाङ्गणे । अतिथिग्रहणार्थाय तदूर्द्ध्वं वा यथेच्छया ॥ अतिथिं तत्र सम्प्राप्तं पूजयेत्स्वागतादिना

।तथासनप्रदानेन पादप्रक्षालनेन च ॥ अद्भयावान्नमानसप्रियप्रश्नेन च । गन्धमाल्यानयानेन प्रीतिमत्कायपर्युपासते ॥ आख्यातकुलनामानमन्यतः समुपागतं ।
पूजयेदतिथिं सम्यक् नैकग्रामनिवासिनं ॥ अकिंचनमसंबन्धमन्यदेशादुपागतं । असंस्कृत्य अतिथिं गच्छन्तु के कामं व्रजन्त्यधः ॥ स्वाध्याययोगप्रवचनं मण्डलावत
थाकुली । द्विजश्रेष्ठ गच्छन्तु स्वामिमन्यतास्यागतं गृह्णी ॥ पितृदेवापदेविप्र भक्तमथ्यागतेषु च । मध्यं स्वविदितावात स्रीहृतिं धार्ष्ट्याक्रिया ॥ अन्नाय श्रमभूकस्य दू
रकाध्यापकस्य च । विद्यापिहर्षितं पात्रमातिथ्याथापकल्पयत् ॥ यथार्हसिद्धार्थितं यं प विवादेषु च वादिनी । श्रुत्वायावनवादश्या द्विरूप स्य वाचितः ॥ अ
स्यतातिथयः प्राक्ताः प्रागुक्ताः त्रिविधस्थितः । वनस्थः पूजयन्नेता न्नयस्र्भूमिमुच्यते ॥ अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । स तस्मै दुष्कृतं दत्वा पुण्यमा
दाय गच्छति ॥ अतः प्रजापतिः प्राक्तावद्विर्वसुगणोऽर्यमा । प्रविश्यातिथिमेते वै भुञ्जते तन्निबन्धनम् । तस्मादतिथिपूजायां यत्नः सततमेव च । सकवेलमघभुङ्क्ते
यातुक्त्वातिथिं विना ॥ ततः सुवासिनी दुःखी गर्भिणी वृद्धबालकान् । साजस्य सीक्षान्नेन प्रथमेव च भोजयेत् ॥ अभुक्तवत्सु चैतेषु भुञ्जन् भुङ्क्ते हि दुष्कृतं । ...

१०३

तत्रान्नं परत्र कीटत्वं प्रसवत् च ॥ अस्नातानामलं भुङ्क्ते अजपीपूयशोणितं । असंस्कृतान्नभुक्तमूत्रमलादिप्रथमं भवेत् ॥ तस्मात्स्नातेन भोक्तव्यं यथा वै भुञ्जीत
बैठकी ॥ भुंक्ते तस्य यथापूर्वं पापं वा श्नातजापते ॥ श्रुत्वा वाग्यमस्तु लीव लब्धिस्फुटस्य च । तत्स्थनिष्ठ गृहस्थो विनिपक्षानिवानका ॥ स्नानाय च वल्कलाव यवषि
पिहितपर्णी । प्रसन्नवक्त्रपाणि भुञ्जीत प्रयतमानसो ॥ कनकपात्रे वा ग्रुद्धवृक्षपत्रे च । दत्वाति थिभ्यो विप्रेभ्यो गुरवे संश्रिताय च ॥ पुण्यगन्धधरः शस्त
स्यधनानवश्यवः । नैकवस्त्रधरो व्यक्तपाणिपादानवाक्षिप ॥ विशुद्धवदनः प्रीतो भुञ्जीत न विदिङ्मुखः । प्राङ्मुखोदङ्मुखो वापि न चैवान्यमनाभवेत् ॥ अन्नं प्रसक्तपथ्यं
च प्राक्षितं प्राकृशोदकैः । न कुत्सितं नाहृतं नैव रुक्षं पावदसंस्कृतं ॥ दत्वा तु भुञ्ज शिष्येभ्यः क्षुधितेभ्यस्तथा गृही । प्रशस्तशुद्धपात्रे भुञ्जीत नाकुपितो भवेत् ॥ नासन्दीसंस्थित
पात्रे नादेशे च न नन्दितम् । नाकाले नातिसंकीर्णे दत्वाग्रं च नरो ग्रस ॥ मन्त्राभिमन्त्रितं शस्तं न च पर्युषितं भवेत् । अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥ तद्वत्
पाविकेभ्यश्च गुडपक्वेभ्य एव च । भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर ॥ नाशेषपुरुषो श्नीयादन्यत्र जगतीपते । मध्वम्बुदधिसर्पिभ्यः सक्तुभ्यश्च विवेकवान् ॥ अ

श्रीयारुन्मनारुत्वारु ब्रतिमधुरयसी। लवनौ ल्मौमथमध्य कदूनिकादिकास्कथा॥ प्राण्डवपूष्पाशम्बेम ध्वबकावनाशनी। पनबन्कद्रवासौ तवलाबाग्येनमुक्ति॥
अनिंथरुदाद्यादिन्कवाग्यभानमकुत्सयन्। पवस्थमसान्मरुत्मानीप्राणास्काथ्याय नायनम्॥ उक्कासम्यगथावम्यप्राद्मुखादब्मुखापिवा। यथावत्मनवावामनू
पानीप्रदाल्यमूलनं॥ स्वस्थप्रणान्कविरुमुकनास नपमियरु। अरीष्ठदवमानानुकूवीनसमवणीयथै नं। अग्निवाप्यायपत्वनी पार्थिवीपवनविनं॥ दत्नावकाणी
नरुपाजवयम्बपुभमुखं। अन्नीवल्नायभरुभ नपमाग्यनित्तस्यव॥ रुवलनत्यविनमं मयास्वथारुणीस्ख। प्राणापानसमानानामुदानव्यानयास्कथा॥ अन्नीपष्टि १०१
कवीवास्तुमयाम्बद्यारुणीसुखी। अगस्मिनग्निवडवानलथ्रुकैमयावीन्यंजनयत्वाशषी॥ मुखवैमनत्वविणमसमुबंमकुलवागममवास्तुदरु। विष्णुस्ममस्किन्प्रिय
धदयस्मिप्रथनरुलारुगवान्यथेकं॥ सत्यनगनान्नमरुमानास्थमन्दपविणममरु। विष्णुनस्नानथेवान्नीपविणमश्रवंयथा॥ सत्यनगनवेडकुजीर्णत्वन्नमिदं
यथा। स्यूबार्यस्वरूपेन प्रविमाथ्यादिकं तथा॥ आनायासप्रदायीनिकुर्य्यात्कर्म्माण्यतन्द्रितं। पञ्चाण्डादिविनादनसन्मार्गादिविवाधिना॥ दिनेनयस्नानं

सन्ध्यामुपनिष्ठत्समादितं। दिनान्कसन्ध्यासूर्य्येणसुवाम्मिरुयूनीवधं॥ उपनिष्ठ यथसन्यारी सम्यगावम्यपार्थिव। सर्वकालमुपस्कानीय सन्ध्ययां पार्थिवथम॥ अन्यत्र
सूतकान्नीवविरुमातुरमानिनं। सूर्य्येनाभ्युदितोयस्यमकं सूर्य्येणवस्वयं॥ अन्यत्रातुरवावाद्धं प्रायश्चीयमनवं। तस्मादनुदितसूर्य्ये समन्कायमत्नीपत॥ उपनि
ष्ठन्नवस्थसन्ध्यामुस्वपश्यदिनाकजी। उपनिष्ठकियसन्ध्यां नवयूर्वनिपश्चिमां॥ ब्रजन्कितादवात्मान स्कामिश्रनवकीन्तप। पुनःपाकमुपादाय सायमप्यवनीपत॥
वैश्वदवनिमित्तं वैपत्न्यमन्त्रवर्त्तितम्। नत्रापिश्वपवानित्य स्कथेवाद्वापवर्ज्जनं॥ आथीतिवागतितत्र स्वगन्ध्यायूजयन्नप। नदवाष्टरुणीपुषी सूर्य्यार्विमुखाग
त॥ तस्मात्स्वगत्व प्राजन्द सूर्य्यार्विमानिथीनवं। यजयत्पूजितमस्मिनपूजितां सर्व्वदवतां॥ अन्नेनाखाम्बुदानेन स्वगन्ध्यात्मीनयत्समानं। नयनप्रस्कवमस्लीदान
नेवथवापिनं॥ कर्णपादादिशौवमुं तुष्टासमन्कभाग्यदी। गङ्गदस्यूटिकीगम्यामपिदावमयीनप॥ नाविशासौनवाराम्भं ज्ञासमीमत्तिनानव। नउदकमयीगम्या
मनिष्ठयत्नास्कनां॥ प्राच्यांदिशिशिरःशर्स्कैयाम्यायामथवानप। सदैवस्वपतःपूसौ पवी जन्तुव्यागदं॥ अनावृप्रगतःशस्कस्वपद्धामवनीपत। पुनासर्ज्जुरुकाल

शस्तयुग्मासु रात्रिषु॥नास्नातां तु स्त्रियं गच्छे नातुरां न रजस्वलां।नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीं॥नादक्षिणां नान्यकामां नाकामां नान्ययोषितं।क्षु-
क्षामामतिरुग्णां वा स्वयं चैभिर्गुणैर्युतः॥स्नातः स्रग्गन्धधृक्हृष्टः नाध्मातः क्षुधितोपि वा।सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत्॥चतुर्दश्यष्टमी चैव अमा-
वास्याथ पूर्णिमा।पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च॥तैलस्त्रीमांससंभोगी पर्वस्वेतेषु वै पुमान्।विण्मूत्रभोजनं नाम प्रयाति नरकं नृप॥अशेषपर्वः
स्वेतेषु तस्मात्संयमिभिर्बुधैः।भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः॥नान्ययोनावयोनौ वा नोपयुक्तौषधस्तथा।द्विजदेवगुरूणां च व्यवायी नाश्रमे भवेत्॥चै- १०९
त्यचत्वरतीर्थेषु नैव गोष्ठे चतुष्पथे।नैव श्मशानोपवनसलिलेषु महीपते॥प्रोक्तपर्वस्वशेषेषु नैव भूपाल संध्ययोः।गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीडितः॥
पर्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप।भुवि रोगावहो नॄणामप्रशस्तो जलाशये॥परदारान्न गच्छेच्च मनसापि कथंचन।किमु वाचास्थिबन्धोपि नास्ति तेषु व्यवा-
यिनां॥मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः।परदाररतिः पुंसामिहामुत्र च भीतिदा॥इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत्।यथोक्तदोषहीनेषु स-

कामेष्वनृतावपि॥ ॥इति श्रीविष्णुपुराणे तृतीयेंशे एकादशोऽध्यायः॥ ॥और्व उवाच॥देवगोब्राह्मणान्सिद्धान्वृद्धाचार्यांस्तथार्चयेत्।द्विकालं च नमेत्सं-
ध्यामग्नीनुपचरेत्तथा॥सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः।गारुडानि च रत्नानि बिभृयात्प्रयतो नरः॥प्रसिद्धामलकेशश्च सुगन्धश्चारुवेषधृक्।सिताः सुमनसो हृ-
द्या बिभृयाच्च नरः सदा॥किंचित्परस्वं न हरेन्नाल्पमप्यप्रियं वदेत्।प्रियं च नानृतं ब्रूयान्नान्यदोषानुदीरयेत्॥नान्यस्त्रियं तथा वैरं रोचयेत्पुरुषर्षभ।न दुष्टं या-
नमारोहेत्कूलच्छायां न संश्रयेत्॥विद्विष्टपतितोन्मत्तबहुवैरादिकीटकैः।बन्धकीबन्धकीभर्तृक्षुद्रानृतकथैः सह॥तथातिव्ययशीलैश्च परिवादरतैः शठैः।बु-
धो मैत्रीं न कुर्वीत नैकः पन्थानमाश्रयेत्॥नावगाहेज्जलौघस्य वेगमग्रे नरेश्वर।प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः॥न कुर्याद्दन्तसंघर्षं न कुष्णीयाच्च ना-
सिकां।नासंवृतमुखो जृम्भेच्छ्वासकासौ न वर्जयेत्॥नोच्चैर्हसेत्सशब्दं च न मुंचेत्पवनं बुधः।नखान्न खादयेच्छिन्द्यान्न तृणं न महीं लिखेत्॥न श्मश्रु भक्षयेल्लोष्टं न म-
र्दयेद्विचक्षणः।ज्योतींष्यमेध्यशस्तानि नाभिवीक्षेत च प्रभो॥नग्नां परस्त्रियं चैव सूर्यं चास्तमनोदये।न हुंकुर्याच्छवं चैव न वागन्धो हि सामजः॥चतुष्पथं चै-

नवान् श्मशानापवनानिव ॥ दूरस्थो नासनिकर्षश्च वर्ज्यो निशि सर्वदा । सूर्यदेवद्विजज्योतिश्छायानामभिलंघनम् ॥ नैकः शून्याटवीं गच्छेन्नवशून्यगृहे वसेत् । केशास्थि
कण्टकामेध्यबलिभस्मतुषांस्तथा ॥ स्नानाम्बुधरणीं चैव दूरतः परिवर्जयेत् । नानार्याननिशं भक्तो भजेज्जिह्मान् वाक्यं बुधः ॥ उपसर्पेत न व्यालान् चिरं तिष्ठेन्न चोत्थि-
तः । अतीव जागरस्वप्ने तद्वत्स्नानासने बुधः ॥ न सेवेत तथा शय्यां व्यायामं च नरेश्वर । दंष्ट्रिणः शृंगिणश्चैव प्राज्ञो दूरेण वर्जयेत् ॥ ह्यामदवाञ्चैनायास् क्रियास्व
तथा।
वमभस्नूव । नैकवस्त्रश्च प्रवर्त्तेत द्विजवाजिनिकंजप ॥ नासमीयेसशीलेन सहसीतकदाचन । सहवृत्तं निकर्षादि कृत्तार्द्धमपि नस्यन ॥ विनाधं नाल्पमेगस्कृतं नाधमै १०९
श्च सदा बुधः । विवादश्च विवादश्च तुल्यशीलेन पिष्यते ॥ नारभेत कलिं प्राज्ञः शुष्कवैरं न कारयेत् । अप्यर्थहानिः स्मारं त्यक्तव्यानर्थगमी यतः ॥ स्नानानां सानिनिर्म-
शास्त्रानं सादानपाणिना । न च निर्धूनयेत्केशान्नाचामेच्चैव चोत्थितः ॥ पादेन नाक्रमेत्पादं न पूज्याभिमुखं नयेत् ॥ श्लेष्मविण्मूत्ररक्तानि सर्वदैव न लंघयेत् ॥ श्ले-
की
ष्मासिंघाणनिष्ठीवं गर्भं नान्नकाले प्रमादतः । बलिमंगलजप्यादौ न होमे न महाजने ॥ योषितो नावमन्येत न चासां विश्वसेद्बुधः । नैव विषमारोहेत् नाधिकुर्यात्कदा

चन ॥ मंगल्यपुष्परत्नाज्य पूज्यानभिवादयेत् । न निष्क्रामेत्कदाचित्प्राज्ञः सदा चाननवापनः ॥ चतुष्पथान्नमस्कुर्यात्कालहोमपरायणः । दीनानभ्युद्धरेत्साधून् पासी
नवदुश्रुतान् ॥ देवर्षिपूजकः सम्यक् पितृपिण्डोदकप्रदः । सत्कर्त्ता चातिथीनां यः स लोकानुत्तमान् व्रजेत् ॥ हितं मितं प्रियं काले वश्यात्मा योऽभिभाषते । स याति
लोकानाह्लादहेतुभूतान्नृपाक्षयान् । धीमान् ह्रीमान् क्षमायुक्त आस्तिको विनयान्वितः ॥ विद्याभिजनविद्यानां योग्यांल्लोकानवाप्नुयात् । अकालगर्जिताद्येषु पर्वस्वा
शौचकादिषु । अनध्यायं बुधः कुर्यादुपरागादिके तथा । शमं नयति यः क्रुद्धान् सर्वबन्धुरमत्सरी ॥ भीताश्वासनकृत्साधुः स्वर्गस्तस्याल्पकं फलम् । वर्षातपादिके छ-
त्री दण्डी रात्र्यटवीषु च ॥ शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् । नोर्द्ध्वं न तिर्यग्दूरं वा निरीक्षन् पर्यटेद्बुधः ॥ युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् । दोषहे-
तूनशेषांश्च वश्यात्मा यो निरस्यति ॥ तस्य धर्मार्थकामानां हानिर्नाल्पापि जायते । पापेऽप्यपापः परुषे ह्यभिधत्ते प्रियाणि यः ॥ मैत्रीद्रवान्तःकरणस्तस्य मुक्तिः करे
स्थिता । ये कामक्रोधलोभानां वीतरागा न गोचरे ॥ सदाचारस्थितास्तेषामनुभावैर्धृता मही । तस्मात्सत्यं वदेत्प्राज्ञो यत्परप्रीतिकारणम् ॥ सत्यं यत्परदुःखाय

नत्रभोनपश्येदृतं वदेत्।प्रियमुक्तं हितं नैतदिति मत्वा न तद्वदेत्॥श्रेयस्तत्र हितं वाक्यं यद्यप्यत्यन्तमप्रियं।प्राणिनामुपकाराय यदेवेह परत्र च॥कर्म्मणा मनसा वा
वा तदेव मतिमान्भजेत्॥ ॥इति श्रीविष्णुपुराणे तृतीयांशे द्वादशोऽध्यायः॥ ॥और्व्व उवाच॥सचेलस्य पितुः स्नानं जाते पुत्रे विधीयते।जातकर्म्म तदा कुर्य्यात् श्रा
द्धमभ्युदये च यत्।युग्मान्देवांश्च पित्र्यांश्च सम्यक्सव्यक्रमाद्द्विजान्॥पूजयेद्भोजयेच्चैव तन्मना नान्यमानसः॥दध्यक्षतैः सबदरैः प्राङ्मुखोदङ्मुखोऽपि वा
॥देवतीर्थेन वै पिण्डान् दद्यात्कायेन वा नृप।नान्दीमुखः पितृगणस्तेन श्राद्धेन पार्थिव॥प्रीयते तत्तु कर्त्तव्यं पुरुषैः सर्ववृद्धिषु।कन्यापुत्रविवाहेषु प्रवेशेन ११०
च वेश्मनः।नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा।सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने॥नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही।पितृपूजाक्रमः प्रोक्तो वृ
द्धावेष समासतः॥श्रूयतामवनीपाल प्रेतकर्म्मक्रियाविधिः।प्रेतदेहं शुभैः स्नानैः स्नापितं स्रग्विभूषितं॥दग्ध्वा ग्रामाद्बहिः स्नात्वा सचेलाः सलिलाशये।यत्र
तत्र स्थितायैतदमुकायेति वादिनः।दक्षिणाभिमुखा दद्युर्बान्धवाः सलिलाञ्जलिं॥प्रविष्टाश्च समं गोभिर्ग्रामं नक्षत्रदर्शने।कटकर्म्म ततः कुर्युर्भूमौ प्रस्तर

१११

शायिनः॥दातव्योऽनुदिनं पिण्डः प्रेताय भुवि पार्थिव।दिवा च भक्तं भोक्तव्यममांसं मनुजर्षभ॥दिनानि तानि चेच्छातः।कर्त्तव्यं विप्रभोजनं।प्रेतस्तृप्तिं तथा याति
बन्धुवर्गेण भुञ्जता॥प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा।वस्त्रत्यागबहिःस्नाने कृत्वा दद्यात्तिलोदकं॥चतुर्थेऽह्नि च कर्त्तव्यमस्थिसंचयनं नृप।तदूर्ध्वमङ्गसंस्पर्शस्तु सपि
ण्डानामपीष्यते॥योग्याः सर्वक्रियाणां तु समानसलिलास्तथा।अनुलेपनपुष्पादिभोगादन्यत्र पार्थिव॥शय्यासनोपभोगश्च सपिण्डानामपीष्यते।भस्मास्थिचयना
दूर्ध्वं संयोगो न तु योषितां॥बालदेशान्तरस्थे च पतिते च मुनौ मृते।सद्यःशौचं तथेच्छातो जलाग्न्युद्बन्धनादिषु॥मृतबन्धोर्दशाहानि कुलस्यान्नं न भुज्यते।दानं
प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते।विप्रस्यैतद्द्वादशाहं राजन्यस्याप्यशौचकं॥अर्द्धमासं तु वैश्यस्य मासः शूद्रस्य शुद्धये।अयुजो भोजयेत्कामं द्विजानन्ते त
तो दिने।दद्याद्दर्भेषु पिण्डं च प्रेतायोच्छिष्टसन्निधौ॥वार्य्यायुधप्रतोदास्तु दण्डस्तु द्विजभोजनात्।स्प्रष्टव्योऽनन्तरं वर्णैः शुद्ध्येरंस्ते ततः क्रमात्॥ततः स्ववर्णधर्मा
ये विप्रादीनामिहोदिताः।तान्कुर्वीत पुमाञ्जीवन्निजधर्मार्जनैस्तथा॥मृताहनि च कर्त्तव्यमेकोद्दिष्टमतः परं।आह्वानादिक्रियादैवनियोगरहितं हि तत्॥

एकार्घ्यं दत्वा दानं च तथैवैकपवित्रकं। प्रश्नाय पिण्डदानं च उक्तवस्वद्विजादिषु ॥ प्रश्नश्च नत्वा विप्रान्निर्णयमानद्विजन्मनां। ● अक्षय्यमेकस्यापि वक्तव्यं व
क्तोमतथा। एकोद्दिष्टं यथा धर्म्मिष्ठ मावस्या वा तत्वतः॥ सपिण्डीकरणं तस्मिन्काले स्नात्वा अन्यतः कृत्वा। एकोद्दिष्टविधानेन कार्यं तदपि पार्थिव ॥ तिलगन्धोदकैर्युक्तं
कं चतुःपात्रचतुष्टयं। पात्रं प्रेतस्य तत्रैकं पितृपात्रत्रयं तथा॥ सेचयेत्पितृपात्रेषु प्रेतपात्रं ततः प्रिय। ततः पितृत्वमापन्ने तस्मिन्प्रेते महीपते॥ श्राद्धधर्मैर
शेषैस्तु तत्पूर्वानर्च्चयेत्पितॄन्। पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः॥ सपिण्डसंततिर्वापि क्रियार्हो नृप जायते। तेषामभावे सर्वेषां समानोदकसंततिः॥ मा १११
तृपक्षस्य पिण्डेन सम्बन्धा ये जलेन वा। कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप॥ संघातान्तर्गतैर्वापि कार्याः प्रेतस्य याः क्रियाः। उत्सन्नबन्धुरिक्थाद्वा कार
येदवनीपतिः॥ पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः॥ त्रिप्रकाराः क्रियाश्चैतास्तासां भेदं शृणुष्व मे। आदाहवार्घ्यायुधादिस्पर्शान्ताद्याश्च याः क्रियाः
॥ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिता। प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु॥ क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः। पितृमातृसपिण्डै

स्तु समानसलिलैस्तथा॥ तत्सङ्घातगतैश्चैव राज्ञा वा धनहारिणा। पूर्वाः क्रियास्तु कर्तव्याः पुत्राद्यैरेव चोत्तराः॥ दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा। मृताहनि च
कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः॥ तस्मादुत्तरसंज्ञाया क्रियास्ताः शृणु पार्थिव। यदा यदा च कर्तव्या विधिना येन चानघ॥ इ
ति श्रीविष्णुपुराणे तृतीयांशे त्रयोदशोध्यायः॥ ॥और्व उवाच॥ ब्रह्मेन्द्ररुद्रनासत्यसूर्याग्निवसुमारुतान्। विश्वेदेवान्पितृगणान्वयांसि मनुजान्पशून्॥
सरीसृपान्पितृगणान्यच्चान्यद्भूतसंज्ञितं। श्राद्धं श्रद्धान्वितः कुर्वन्प्रीणयत्यखिलं जगत्॥ मासि मास्यसिते पक्षे पञ्चदश्यां नरेश्वर। तथाष्टकासु कुर्वीत
काम्यान्कालाञ्छृणुष्व मे॥ श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजं। श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा॥ विषुवे चैव सम्प्राप्ते ग्रहणे शशिसूर्ययोः। स
मस्तेष्वेव भूपाल राशिष्वर्के च गच्छति॥ नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने। इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा॥ अमावास्या यदा मैत्रविशाखास्वातियोगिनी
। श्राद्धैः पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीं॥ अमावास्या यदा पुष्ये रौद्रे वर्क्षे पुनर्वसौ। द्वादशाब्दं तथा तृप्तिं प्रयान्ति पितरस्तदा॥ वासवाजैकपादर्क्षे पि
तृ

पितृणां तृप्तिमिच्छता।वारुणेनाप्यमावास्या देवानामपि दुर्लभा॥नवस्वृक्षेष्वमावास्या यदैतेष्ववनीपते।तदा हि तृप्तिदं श्राद्धं पितृणां शृणु चापरं॥गीतं सनत्कुमा
चार्भकत्वेऽपि योऽसावतिबलपराक्रमः समस्तारातिरथजेता सोऽभिमन्युरजायत। अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थामप्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मी-
कृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्यात्मेच्छया कारणमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परीक्षिज्जज्ञे। योऽयं साम्प्रतमेतद्भू-
मण्डलमखण्डितायतिधर्मेण पालयतीति॥ इति श्रीविष्णुपुराणे चतुर्थेंऽशे॥ ॥ विंशोऽध्यायः॥ अतः परं भविष्यानहं भूमिपालान् कीर्तयिष्यामि। यो

लि४

साम्प्रतमवनीपतिः परीक्षित्तस्यापि परीक्षितो जनमेजयश्रुतसेनोग्रसेनभीमसेनाश्चत्वारः पुत्रा भविष्यन्ति जनमेजयस्यापि शतानीको भविष्यति यो सौ याज्ञवल्क्याद्वेद
मधीत्य कृपादस्त्राण्यवाप्य विषयविरक्तचित्तवृत्तिश्च शौनकोपदेशादात्मविज्ञानप्रवीणः परं निर्वाणमाप्स्यति शतानीकादश्वमेधदत्तो भविता तस्मादप्यधिसीम
कृष्णोधिसीमकृष्णान्निचक्रुर्यो गङ्गयापहृते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति तस्याप्युष्णः पुत्रो भविष्यति उष्णाद्विचित्ररथस्ततश्शुचिरथस्तस्माद्वृष्णिमांस्ततः सुषे
णस्तस्मादपि सुनीथः सुनीथान्नृपस्तस्माच्चक्षुस्तस्यापि सुखीवलस्तस्मात्परिप्लवस्ततश्च सुनयस्तस्यापि मेधावी मेधाविनो रिपुञ्जयस्ततो मृदुस्तस्मात्तिग्मः १३१
तिग्माद्बृहद्रथस्तस्माद्वसुदानस्ततो परः शतानीकस्तस्माच्चोदयनस्तस्मादहीनरस्ततश्च दण्डपाणिस्ततो निरमित्रस्तस्माच्च क्षेमकः तत्रायं श्लोकः ब्रह्मक्षत्र
स्य यो योनिर्वंशो राजर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ इति श्री विष्णुपुराणे चतुर्थेंशे ॥ ॥ एकविंशोध्यायः ॥ अत इक्ष्वाकवो भविष्याः
पार्थिवाः कथ्यन्ते बृहद्बलस्य पुत्रो बृहत्क्षणस्तस्मादुरुक्षयः ततो वत्सव्यूहस्ततश्च प्रतिव्योमस्तस्यापि दिवाकरस्तस्मात्सहदेवस्ततो बृहदश्व

गवाग

स्तत्सूनुर्भानुरथस्तस्यापि प्रतीताश्वस्तस्यापि सुप्रतीकस्ततश्च मरुदेवस्ततः सुनक्षत्रस्तस्मात्किन्नरः किन्नरादन्तरीक्षस्तस्मात्सुवर्णस्ततश्चामित्र
जित्ततश्च बृहद्भ्राजस्तस्यापि धर्मी धर्मिणः कृतञ्जयः कृतञ्जयाद्रणञ्जयो रणञ्जयात्सञ्जयस्तस्माच्छाक्यः शाक्याच्छुद्धोदनस्तस्माद्राहुलस्ततः प्रसेनजित्ततः
क्षुद्रकः कुण्डकस्तस्मादपि सुरथस्तत्पुत्रश्च सुमित्र इत्येते चैक्ष्वाकवो बृहद्बलान्वयाः अत्रानुवंशश्लोकः ॥ इक्ष्वाकूनामयं वंशः सुमित्रान्तो भविष्यति । यत
स्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ इति श्री विष्णुपुराणे चतुर्थेंशे ॥ ॥ मागधानां बार्हद्रथानां भाविनामनुक्रमं कथयाम्यत्र हि वंशे महाबला जरा
सन्धप्रधाना बभूवुः सन्धसुतः सहदेवात्सोमापिस्तस्य श्रुतवांस्तस्याप्ययुतायुस्ततो निरमित्रस्तत्तनयः सुक्षत्रस्तस्मादपि बृहत्कर्मा ततश्च सेनजित् ।
तस्माच्छ्रुतञ्जयः ततो विप्रः तस्य च पुत्रः शुचिर्नामा भविष्यति । तस्यापि क्षेम्यस्ततश्च सुव्रतः सुव्रताद्धर्मस्ततः सुश्रमस्ततो दृढसेनस्ततः सुमतिः तस्मात्सु
बलस्तस्य सुनीतस्ततः सत्यजित्तस्मादपि विश्वजित्तस्यापि रिपुञ्जयः पत इत्येते बार्हद्रथा भूपतयो वर्षसहस्रमेकं भविष्यन्ति ॥ इति श्री विष्णुपुराणे चतुर्थेंशे ॥ ॥प

गानवउवार॥ यार्यरिपुञ्जयनाम बर्हद्रथान्त्यस्तस्य सुनिकानामामात्यास्ते भविष्यति। सवेन स्वामिनं हत्वा स्वपुत्रं प्रद्योतनामानमभिषेक्ष्यति तस्यापि पालकनामापु
त्रो भविता ततश्च विशाखयूपस्तस्याजनकस्य च नन्दिवर्द्धनस्ततो नंदी इत्येते अष्टत्रिंशदुत्तरमब्दशतं पंच प्रद्योताः पृथिवीं भोक्ष्यन्ति ततश्च शिशुनागस्ततश्च काकवर्णो भवि
ता तस्य च पुत्रः क्षेमधर्म्मा तस्यापि क्षत्रौजा तत्सुतो विम्बिसारस्ततश्चाजातशत्रुस्तस्माच्च दर्भकस्तस्माच्चोदयनस्तस्मादपि नन्दिवर्द्धनस्ततो महानन्दी इत्येते
शैशुनागादश भूमिपालास्त्रीणि वर्षशतानि द्विषष्ट्यधिकानि भविष्यन्ति महानन्दिसुतश्च शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मो नन्दः परशुराम इवापरोऽखिलक्षत्रान्तकारी भविता ततः प्र १३८
भृति शूद्रा भूपाला भविष्यन्ति स चैकच्छत्रा। मनुल्लंघितशासनो महापद्मस्तत्पुत्राश्च एकं वर्षशतमवनीपतयो भविष्यन्ति नवैव तान्नन्दान् कौटिल्यो ब्रा
ह्मणस्समुद्धरिष्यति तेषामभावे मौर्याः पृथिवीं भोक्ष्यन्ति कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति तस्यापि पुत्रो बिन्दुसारो भविता तस्याप्यशोकवर्द्धनस्ततः सुयशा
स्ततश्च दशरथस्ततश्च संगतस्ततश्शालिशूकस्तस्मात् सोमशर्म्मा तस्मात् शतधन्वा तस्याप्यनु बृहद्रथनामा एवमेते मौर्या दश भूमिपतयो भविष्यन्त्यब्दशतं सप्तत्रिंश

गै का२
दुत्तरं तेषामन्ते पृथिवीं शुङ्गा भोक्ष्यन्ति पुष्यमित्रः सेनापतिः स्वामिनं हत्वा राज्यं करिष्यति तस्यात्मजोऽग्निमित्रस्तस्मात् सुज्येष्ठस्ततो वसुमित्रस्तस्मादार्द्रकस्ततः पुलिंदकस्त
तो घोषवसुः तस्मादपि वज्रमित्रस्ततो भागवतस्ततो देवभूतिः इत्येते दशशुङ्गा द्वादशोत्तरं वर्षशतं पृथिवीं भोक्ष्यन्ति ततः कण्वानेषा भूर्यास्यति देवभूतिं शुङ्गरा
जानं व्यसनिनं तस्यैवामात्यः कण्वो वसुदेवनामा निपात्य स्वयमवनीं भोक्ष्यति तस्य पुत्रो भूमित्रस्तस्यापि नारायणो नारायणस्य सुशर्म्मा एते काण्वायनाश्च
त्वारः पञ्चचत्वारिंशद्वर्षाणि भूपतयो भविष्यन्ति सुशर्म्माणं तु काण्वं तद्भृत्यो बलिपुच्छकनामा हत्वान्ध्रजातीयो वसुधां भोक्ष्यति ततश्च कृष्णनामा तद्भ्राता
भूपतिर्भविता तस्य श्रीशातकर्णिस्तस्यापि पूर्णोत्सङ्गस्तत्पुत्रः शातकर्णिस्तस्माच्च लम्बोदरस्तस्माद्दिविलकस्ततो मेघस्वातिस्ततः पटुमांस्ततश्चारिष्टक
र्म्मा ततो हालाहालस्ततः पत्तलकस्ततः सुन्दरः शातकर्णी ततः शिवस्वातिस्ततस्ततश्च गोमतीपुत्रः पुलिमाविस्तस्यापि शातकर्णी शिवश्रीस्ततः शिवस्कन्द
स्तस्माद्यज्ञश्रीस्ततो विजयस्तस्माच्चन्द्रश्रीस्तस्यापि पुलोमावि एवमेते त्रिंशच्चत्वार्यब्दशतानि षट्पंचाशदधिकानि पृथिवीं भोक्ष्यन्ति अन्ध्रभृत्याः सप्ताभी

६

वादश गर्द्दभिलाश्च भूभुजो भविष्यन्ति। ततः षोडश शका भूपतयो भवितारः। ततश्चाष्टौ यवनाश्चतुर्द्दश तुरुष्का मुण्डाश्च त्रयोदश एकादश मौना एते पृथिवीं भोक्ष्यन्ति दश वर्षशता
नि नवनवत्यधिकानि भोक्ष्यन्ति। ततश्च मौना एकादश भूपतयोऽब्दशतानि त्रीणि पृथिवीं भोक्ष्यन्ति। तेषूच्छिन्नेषु पुनः पुनः किलकिला यवना भूपतयो भविष्यन्ति।
मूर्द्धाभिषिक्तास्तेषां विन्ध्यशक्तिः। ततः पुरञ्जयः तस्माद्रामचन्द्रस्तस्माद्धर्म्मा ● धर्म्माद्वङ्गस्ततः कृतनन्दनः। शिशुनन्दिर्नन्दियशाः। शिशुकः प्रवीरो नव १३८
र्षशतं षड्वर्षाणि च भविष्यन्ति ततश्च तत्पुत्रास्त्रयोदशैव बाह्लिकाश्च त्रयः ततः पुष्यमित्राः पटुमित्रास्त्रयोदश मेकलाश्च सप्तान्ध्राः कोशलायान्तु नवैव भूपतयो भविष्यं
ति नैषधाश्च तावन्त एव मगधायां विश्वस्फटिकसंज्ञोऽन्यान्वर्णान् करिष्यति। कैवर्त्तवटुपुलिन्दब्राह्मणान्राज्ये स्थापयिष्यत्युत्साद्याखिलक्षत्रजातिं नव
ना गाः पद्मावत्यां नाम पुर्यामनुगङ्गाप्रयागं मगधायां गुप्ताश्च मागधा भोक्ष्यन्ति कोशलान्ध्रपौण्ड्रकताम्रलिप्तान् समुद्रतटपुरीं च देवरक्षितो रक्षिता भोक्ष्यन्
ति कालिङ्गमाहिषमाहेन्द्रभौमान् गुहा भोक्ष्यन्ति। नैषधनैमिषककालकोशकाञ्जनपदान्मणिधान्यकवंशा भोक्ष्यन्ति। त्रैराज्यमूषिकजनपदान्कन

कान्वया भोक्ष्यन्ति। सौराष्ट्रावन्तिशूद्राभीरान् नर्मदामरुभूमिविषयांश्च व्रात्यद्विजाभीरशूद्राद्या भोक्ष्यन्ति। सिन्धुतटदाविकोर्वीचन्द्रभागाकाश्मीरविषय
श्च व्रात्या म्लेच्छादयः शूद्रा भोक्ष्यन्ति। एते च तुल्यकालाः सर्वे पृथिव्यां भूभृतो भविष्यन्त्यल्पप्रसादा बृहत्कोपाः सार्वकालम् ● अनृताधर्मरुचयः स्त्रीबा
लगोवधकर्त्तारः परस्वादानरुचयोऽल्पसाराः तमिस्रप्राया उदितास्तमितप्राया अल्पायुषो महेच्छा ह्यल्पधर्म्माश्च लुब्धा भविष्यन्ति। तैश्च विमिश्रा जनपदास्त
च्छीलानुवर्त्तिनो राजाश्रयशुष्मिणो म्लेच्छाचाराश्च विपर्ययेण वर्त्तमानाः प्रजाः क्षपयिष्यन्ति। ततश्चानुदिनमल्पाल्पह्रासाद्व्यवच्छेदाद्धर्म्मार्थयोर्जगतः संक्षयो भविष्य
ति। ततश्चार्थ एवाभिजनहेतुः बलमेवाशेषधर्म्महेतुः अभिरुचिरेव दाम्पत्यसम्बन्धहेतुः स्त्रीत्वमेवोपभोगहेतुः अनृतमेव व्यवहारजयहेतुः उन्नताम्बुतैव
पृथिवीहेतुः ब्रह्मसूत्रमेव विप्रत्वहेतुः दानमेव धर्म्महेतुः अनाढ्यतैवासाधुत्वहेतुः स्नानमेव प्रसाधनहेतुः स्वीकरणमेव विवाहहेतुः सद्वेष
धार्य्येव पात्रं दूरायतनोदकमेव तीर्थं इत्येवमनेकदोषोत्तरे तु भूमण्डले सर्व्ववर्णेष्वेव यो यो बलवान् स स भूमिपतिर्भविष्यतीत्येवं चातिलुब्धकराजा

पर्व्व।

सदा॥ म्लेच्छाचारानामकर्व्वद्राणी॥ प्रजा॥ एवमेते भविष्यन्ति मधुशाकमूलफलैः पत्रपुष्पाद्याहारा भविष्यन्ति तरुवल्कलचीरप्रावरणा अतिबहुप्रजा॥ शीतवाता
तपसहा भविष्यन्ति नादि कश्चित्त्रयोविंशति वर्षाणि जीविष्यन्ति नवरतं चात्र कलियुगे क्षयमायात्यखिलएवैषजनः॥ क्षयमुपेष्यति श्रौतस्मार्त्तधर्म्म
विप्लवमत्यन्तमुपगते क्षीणप्राये च कलावशेषजगत्स्रष्टुश्चराचरगुरोरादिमध्यान्तमयस्य ब्रह्ममयस्य भगवतो वासुदेव। रूपि
ण्यंशः शम्भलग्रामप्रधानब्राह्मणविष्णुयशसो गृहेऽष्टगुणर्द्धिसमन्वितः कल्किरूपी जगत्यत्रावतीर्य सकलम्लेच्छदस्युदुष्टाचरणचेतसामशेष १६०
णामपरिच्छिन्नमाहात्म्यशक्तिः क्षयं करिष्यति स्वधर्म्मेषु चाखिलमेव जगत्संस्थापयिष्यति अनन्तरं चाशेषकलेरवसाने निशावसाने प्रबुद्धानीव तेषामेव ज
नपदानाममलस्फटिकशुद्धमनांसि भविष्यन्ति तेषां च बीजभूतानामशेषमनुष्याणां परिणतानामपि तत्कालकृतानामपत्यप्रसूतिर्भविष्य
ति तानि च तदपत्यानि कृतयुगधर्म्मानुसारीणि भवन्ति अत्रोच्यते॥ यदा सूर्यश्च चन्द्रश्च तथा तिष्यबृहस्पती। एकराशौ समेष्यन्ति भविष्यति तदा

च।

कृतं॥ अतीता वर्त्तमानाश्च तथैवानागताश्च ये। एते वंशेषु भूपालाः कथिता मुनिसत्तम॥ यावत्परीक्षितो जन्म यावन्नन्दाभिषेचनं। एतद्वर्षसहस्रन्तु ज्ञे
यं पञ्चदशोत्तरं॥ सप्तर्षीणान्तु यौ पूर्व्वौ दृश्येते उदितौ दिवि। तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि। तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणां॥ ते तु १६१
पारीक्षिते काले मघास्वासन् द्विजोत्तम। तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः॥ यदैव भगवान्विष्णोरंशो यातो दिवं द्विज। वसुदेवकुलोद्भूतस्तदै
व कलिरागतः॥ यावत्स पादपद्माभ्यां पस्पर्शेमां वसुन्धरां। तावत्पृथ्वीपरिष्वङ्गे समर्थो नाभवत्कलिः। गते सनातनस्यांशे विष्णोस्तत्र भुवो दिवं। तत्याज सा
नुजो राज्यं धर्म्मपुत्रो युधिष्ठिरः। विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः। याते कृष्णे चकाराथ सोऽभिषेकं परीक्षितः॥ प्रयास्यन्ति यदा चैते पूर्व्वाषाढां
महर्षयः। तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति। यस्मिन्कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि॥ प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे। त्रीणि ल
क्षाणि वर्षाणि द्विज मानुषसंख्यया। षष्टिं चैव सहस्राणि भविष्यत्येष वै कलिः॥ शतानि तानि दिव्यानि सप्त पञ्च च संख्यया। निःशेषेण गते तस्मिन् भविष्य

ति पुनः पुरा ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च द्विजसत्तम । युगे युगे महात्मानः समतीताः सहस्रशः ॥ बहुत्वान्नामधेयानां परिसंख्या कुले कुले । पुनरुक्त
बहुत्वात्तु न मया परिकीर्तिता ॥ देवापि पौरवो राजा पुरुश्चेक्ष्वाकुवंशजः ॥ महायोगबलोपेतौ कलापग्रामसंश्रयौ ॥ कृतयुगे त्विहागत्य क्षत्रप्रावर्तकौ
हि तौ । हरिविष्णुमनोर्वंशे बीजभूतौ व्यवस्थितौ ॥ एतेन क्रमयोगेन मनुपुत्रैर्वसुन्धरा । कृतत्रेतादिसंज्ञानि युग ॥ नि त्रीणि तु यथा ॥ कलौ तु बीजभूता
स्तु केचित्तिष्ठन्ति भूतले । यथैव देवापि पुरू साम्प्रतं समधिष्ठितौ ॥ एष तूद्देशतो वंशस्तवोक्तो भूभुजां मया । निखिलो गदितुं शक्यो नैष जन्मशतैरपि १३१
॥ एते चान्ये च भूपाला यैरत्र क्षितिमण्डले । कृतं ममत्वं मायान्धैर्नित्यं हेयकलेवरैः ॥ कथं ममेयमचला मत्पुत्रस्य कथं मही । मद्वंशस्येति चिन्तार्ता
जग्मुरन्तमिमे नृपाः ॥ तेभ्यः पूर्वतराश्चान्ये तेभ्यस्तेभ्यस्तथापरे । भविष्याश्चैव यास्यन्ति तेषामन्ये च येप्यनु ॥ विलोक्यात्मजयोद्योगयात्राव्यग्रान्नराधिपा
न् । पुष्पप्रहासैः शरदि हसन्तीव वसुन्धरा ॥ मैत्रेय पृथिवीगीताः श्लोकांश्चात्र निबोध मे । यानाह धर्म्मध्वजिने जनकायासितो मुनिः ॥ ॥ पृथिव्यु

वाच ॥ कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि । येन फेनसधर्म्माणो अतिविश्वस्तचेतसः ॥ पूर्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ॥ ततो भृत्यांश्च पौरांश्च
जिगीषन्ते तथा रिपून् । क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ॥ इत्यासक्तधियो मृत्युं न पश्यन्त्यविदूरगम् । समुद्रावरणं याति मन्मण्डलमथो वशं ॥ किय
दात्मजयादेतन्मुक्तिरात्मजये फलं । उत्सृज्य पूर्वजा याता यां नादाय गतः पिता ॥ तां ममेति विमूढत्वाज्जेतुमिच्छन्ति पार्थिवाः ॥ मत्कृते पितृपुत्राणां भ्रातॄणां
चापि विग्रहाः ॥ जायन्तेत्यन्तमोहेन ममत्वादृतचेतसां । पृथ्वी ममेयं सकला ममैषा मदन्वयस्यापि च शाश्वतेयं ॥ यो यो मृतो ह्यत्र बभूव राजा कुबुद्धिरा
सीदिति तस्य तस्य । दृष्ट्वा ममत्वादृतचित्तमेकं विहाय मां मृत्युपथं व्रजन्तं ॥ तस्यान्वयस्थस्य कथं ममत्वं हृद्यास्पदं मत्प्रभवं करोति । पृथ्वी ममैषाशु प
रित्यजैनां वदन्ति ये दूतमुखैः स्वशत्रुं ॥ नराधिपास्तेषु ममातिहासः पुनश्च मूढेषु दयाभ्युपैति ॥ ॥ पराशर उवाच ॥ इत्येते धरणीगीताः श्लोका मैत्रेय
यैः श्रुताः । ममत्वं विलयं याति तापत्यर्के यथा हिमं ॥ इत्येष कथितः सम्यङ्मनोर्वंशो मया तव । यत्र स्थितिप्रवृत्तस्य विष्णोरंशांशका नृपाः ॥ शृणोति य इ

श्वा मनुवंशमनुक्रमात्। तस्य पापमशेषं वै प्रणश्यत्यमलात्मकः॥ धनधान्यर्द्धिमतुलां प्राप्नोत्यव्याहतेन्द्रियः। श्रुत्वैवमखिलं वंशं प्रशस्तं शशिसूर्ययोः॥ इ-
क्ष्वाकुजह्नुमान्धातृसगराविक्षितान्रघून्। ययातिनहुषाद्यांश्च ज्ञात्वा निष्ठामुपागतान्॥ महाबलान्महावीर्याननन्तधनसञ्चयान्। कृतान्कालेन बलिना
कथाशेषान्नराधिपान्॥ श्रुत्वा न पुत्रदारादौ गृहक्षेत्रादिके तथा। द्रव्यादौ वा कृतप्रज्ञो ममत्वं कुरुते नरः॥ तप्तं तपो यैः पुरुषप्रवीरैरुद्बाहुभिर्वर्षगणा-
ननेकान्। इष्ट्वा सुयज्ञैर्बलिनोऽतिवीर्याः कृता नु कालेन कथावशेषाः॥ पृथुः समस्तान्विचचार लोकानव्याहतो यो विविदारिचक्रः। स कालवाताभिह- १३२
तो विनष्टः क्षिप्तं यथा शाल्मलितूलमग्नौ॥ यः कार्त्तवीर्यो बुभुजे समस्तान् द्वीपान्समाक्रम्य हतारिचक्रः। कथाप्रसङ्गेष्वभिधीयमानः स एव सङ्कल्प-
विकल्पहेतुः॥ दशाननाविक्षितराघवानामैश्वर्य्यमुद्भासितदिङ्मुखानि। भस्मापि जातं न कथं क्षणेन भ्रूभङ्गपातेन धिगन्तकस्य॥ कथाशरीरत्वमवाप यद्वै मान्धा-
तृनामा भुवि चक्रवर्ती। श्रुत्वापि तत्को हि करोति साधुर्ममत्वमात्मन्यपि मन्दचेताः॥ भगीरथाद्याः सगरः ककुत्स्थो दशाननो राघवलक्ष्मणौ च। युधिष्ठिराद्या-

श्च बभूवुरेते सत्यं न मिथ्या क्व नु ते न विद्मः॥ ये साम्प्रतं ये च नृपा भविष्याः प्रोक्ता मया विप्रवरोग्रवीर्याः। एते तथान्ये च तथाभिधेयाः सर्वे भविष्य-
न्त्येव पूर्वे॥ एतद्विदित्वा न नरेण कार्यं ममत्वमात्मन्यपि पण्डितेन। तिष्ठन्तु तावत्तनयात्मजायाः क्षेत्रादयो ये तु शरीरिणोऽन्ये॥ इति श्रीविष्णुपुराणे
चतुर्थांशः समाप्तः॥ २१ ॥ ॥ मैत्रेय उवाच॥ नृपाणां कथितः सर्वो भवता वंशविस्तरः। वंशानुचरितं चैव यथावदनुवर्णितम्॥ अंशावतारो ब्रह्मर्षे
योऽयं यदुकुलोद्भवः। विष्णोस्तं विस्तरेणाहं श्रोतुमिच्छाम्यशेषतः॥ चकार यानि कर्माणि भगवान्पुरुषोत्तमः। अंशांशेनावतीर्योर्व्यां तत्र तानि मु-
ने वद॥ ॥पराशर उवाच॥ मैत्रेय श्रूयतामेतद्यत्पृष्टोऽहमिह त्वया। विष्णोरंशांशसम्भूतिचरितं जगतो हितम्॥ देवकस्य सुतां पूर्वं वसुदेवो महामुने
। उपयेमे महाभागां देवकीं देवतोपमाम्॥ कंसस्तयोर्वररथं चोदयामास सारथिः। वसुदेवस्य देवक्याः संयोगे भोजवर्द्धनः॥ अथान्तरिक्षे वागुच्चैः कं-
समाभाष्य सादरम्। मेघगम्भीरनिर्घोषं समाभाष्येदमब्रवीत्॥ यामेतां वहसे मूढ सह भर्त्रा रथे स्थिताम्। अस्यास्तवाष्टमो गर्भः प्राणानपहरिष्यति

॥ ॥पराशर उवाच॥ श्रुत्वाकर्ण्य समुद्धृत्य खड्गं कंसं महाबलः। देवकीं हन्तुमारब्धो वसुदेवोऽब्रवीदिदं॥ ॥वसुदेव उवाच॥ न हन्तव्या महाबाहो दे
वकी भवतानघा। समर्पयिष्ये सकलान् गर्भानस्योदरोद्भवान्॥ ॥पराशर उवाच॥ तथेत्याह ततः कंसो वसुदेवं द्विजोत्तम। न घातयामास च तां दे
वकीं सत्यगौरवात्॥ एतस्मिन्नेव काले तु भूरिभारावपीडिता। जगाम धरणी मेरौ समाजं त्रिदिवौकसां॥ सब्रह्मकान्सुरान्सर्वान् प्रणिपत्याथ मेदिनी
। कथयामास तत्सर्वं खेदात्करुणभाषिणी॥ ॥पृथिव्युवाच॥ अग्निः सुवर्णस्य गुरुर्गवां सूर्यः परो गुरुः। ममाप्यखिललोकानां गुरुर्नारायणो १७३
गुरुः॥ प्रजापतिपतिर्ब्रह्मा पूर्वेषामपि पूर्वजः। कलाकाष्ठानिमेषात्मा कालश्चाव्यक्तमूर्तिमान्॥ तदंशभूताः सर्वे वै समूहो वः सुरोत्तमाः। आदित्या म
रुतः साध्या रुद्रा वस्वश्विवह्नयः। पितरो ये च लोकानां स्रष्टारोऽत्रिपुरोगमाः॥ एते तस्याप्रमेयस्य रूपं विष्णोर्महात्मनः। यक्षराक्षसदैतेयपिशाचोर
गदानवाः॥ गन्धर्वाप्सरसश्चैव रूपं विष्णोर्महात्मनः। ग्रहर्क्षतारकाचित्रगगनाग्निजलानिलाः। अहं च विषयाश्चैव सर्वं विष्णुमयं जगत्॥ तथाप्य

नेकरूपस्य तस्य रूपाण्यहर्निशं। बाध्यबाधकतां यान्ति कल्लोला इव सागरे॥ तत्साम्प्रतमिमे दैत्याः कालनेमिपुरोगमाः। मर्त्यलोकं समागम्य बाधन्तेऽहर्नि
शं प्रजाः॥ कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना। उग्रसेनसुतः कंसः संभूतः स महासुरः॥ अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा। सुन्दोऽसुरस्तथात्यु
ग्रो बाणश्चापि बलेः सुतः॥ तथान्ये च महावीर्या नृपाणां भवनेषु ये। समुत्पन्ना महात्मानः कान्न संख्यातुमुत्सहे॥ अक्षौहिण्योऽत्र बहुला दिव्यमूर्तिधृतः
सुराः। महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि॥ तद्भूरिभारपीडार्ता न शक्नोम्यमरेश्वराः। बिभर्तुमहमात्मानमिति विज्ञापयामि वः॥ क्रियतां तन्महाभाग
मम भारावतारणं। यथा रसातलं नाहं गच्छेयमतिविह्वला॥ ॥पराशर उवाच॥ इत्याकर्ण्य धरावाक्यमशेषैस्त्रिदशेश्वरैः। भुवो भारावतारार्थं ब्रह्मा प्राह
प्रचोदितः॥ ॥ब्रह्मोवाच॥ यथाह वसुधा सर्वं सत्यमेतद्दिवौकसः। अहं भवो भवन्तश्च सर्वं नारायणात्मकं॥ आधिक्यन्यूनता बाध्यबाधकत्वेन वर्त्तते॥ तदा
गच्छत गच्छामः क्षीराब्धेस्तटमुत्तमं। तत्राराध्य हरिं तस्मै सर्वं विज्ञापयाम वै॥ सर्वथैव जगत्यर्थे स सर्वात्मा जगन्मयः। सत्त्वांशेनावतीर्योर्व्यां धर्मस्य कुरुते

स्थितिं ॥ ॥पराशर उवाच॥ इत्युक्त्वा प्रययौ तत्र सह देवैः पितामहः। समाहितमना भूत्वा तुष्टाव गरुडध्वजं॥ ॥ब्रह्मोवाच॥ द्वे विद्ये त्वमनाम्नाय परा चैवापरा
तथा। ता एव भवतो रूपे मूर्त्तामूर्त्तात्मिके प्रभो॥ द्वे ब्रह्मणी त्वणीयोतिस्थूलात्मन् सर्व्व सर्व्ववित्। शब्दब्रह्म परं चैव ब्रह्म ब्रह्ममयस्य यत्॥ ऋग्वेदस्त्वं यजुर्वेदः सामवे
दस्तथाथर्व्व। शिक्षा कल्पो निरुक्तोथ छन्दो ज्योतिषमेव च॥ इतिहासपुराणे च तथा व्याकरणं प्रभो। मीमांसा न्यायशास्त्रं च धर्म्मशास्त्राण्यधोक्षज॥ आत्मात्मदेहगु
णवद्विचाराचारि यद्वचः। तदप्याद्यपते नान्यदध्यात्मात्मस्वरूपवत्॥ त्वमव्यक्तमनिर्देश्यमचिन्त्यानामवर्णवत्। अपाणिपादरूपं च विशुद्धं नित्यं परात्परं॥ शृणोष्यक १६४
र्णः परिपश्यसि त्वमचक्षुरेको बहुरूपरूपः। अपादहस्तो जवनो ग्रहीता त्वं वेत्सि सर्व्वं न च सर्व्ववेद्यः॥ अणोरणीयांसमसत्स्वरूपं त्वां पश्यतोज्ञाननिवृ
त्तिरग्र्या। धीरस्य धीरस्य बिभर्त्ति नान्यद्वरेण्यरूपात्परतः परात्मन्॥ त्वं विश्वनाभिर्भुवनस्य गोप्ता सर्व्वाणि भूतानि तवान्तराणि। यद्भूतभव्यं यदणो
रणीयः पुमांस्त्वमेकः प्रकृतेः परस्तात्॥ एकश्चतुर्द्धा भगवान्हुताशो वर्च्चो विभूतिं जगतो ददाति। त्वं विश्वतश्चक्षुरनन्तमूर्त्ते त्रेधा पदं त्वं विदधे

विधातः॥ यथाग्निरेको बहुधा समिध्यते विकारभेदैरविकाररूपः। तथा भवान्सर्व्वगतैकरूपो रूपाण्यशेषाण्यनुपुष्यतीशः॥ एकस्त्वमग्र्यः परमं पदं यत्पश्यन्ति
त्वां सूरयो ज्ञानदृश्यं। त्वत्तो नान्यत्किञ्चिदस्ति स्वरूपं यद्वा भूतं यच्च भाव्यं परात्मन्॥ व्यक्ताव्यक्तः स्वरूपस्त्वं समष्टिव्यष्टिरूपवान्। सर्व्वज्ञः सर्व्वदृक्सर्व्वशक्तिज्ञा
नबलर्द्धिमान्॥ अन्यूनश्चाप्यवृद्धिश्च स्वाधीनोनादिमान्वशी। क्लमतन्द्रीभयक्रोधकामादिभिरसंयुतः॥ निरवद्यः परः प्राप्तो निरधिष्ठोक्षरः क्रमः। सर्व्वेश्वर
ः पराधारो धाम्नां धामात्मकोक्षयः॥ सकलावरणातीत निरालम्बनभावन। महाविभूतिसंस्थान नमस्ते पुरुषोत्तम॥ नाकारणात्कारणाद्वा कारणाकार
णान्न च। शरीरग्रहणं व्यापिन् धर्म्मत्राणाय केवलं॥ ॥पराशर उवाच॥ इत्थं स संस्तवं श्रुत्वा मनसा भगवानजः। ब्रह्माणमाह विश्वात्मा विश्वरूपधरो हरिः॥ ॥
श्रीभगवानुवाच॥ भो भो ब्रह्मंस्त्वया मत्तः सह देवैर्यदिष्यते। [illegible] तदुच्यतामशेषं च सिद्धमेवावधार्यतां॥ ॥पराशर उवाच॥ ततो ब्रह्मा हरेर्दिव्यं विश्व
रूपमवेक्ष्य तं। तुष्टाव भूयो देवेषु साध्वसावनतात्मसु॥ ॥ब्रह्मोवाच॥ नमो नमस्तेस्तु सहस्रकृत्वः सहस्रबाहो बहुवक्त्रपाद। नमो नमस्ते जगतः प्रवृत्ति विना

शरीरसंस्थानपराप्रमेय॥सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाण गरीयसामप्यतिगौरवात्मन्।प्रधानबुद्धीन्द्रियवत्प्रधानमूलापरात्मन्भगवन्प्रसीद॥एषा मही देव
महीप्रसूतैर्महासुरैः पीडितशैलबन्धा।परायणं त्वां जग — तामुपैति भारावतारार्थमपारपार॥एते वयं वृत्ररिपुस्तथायं नासत्यदस्रौ वरुणस्तथैषः।
इमे च रुद्रा वसवः ससूर्याः समीरणाग्निप्रमुखास्तथान्ये॥सुराः समस्ताः सुरनाथकार्यमेभिर्मया यच्च तदीश सर्वं।आज्ञापयाज्ञां प्रतिपालयन्तस्तवैव ति
ष्ठाम सदास्तदोषाः॥ ॥पराशर उवाच॥एवं संस्तूयमानस्तु भगवान्परमेश्वरः।उज्जहारात्मनः केशौ सितकृष्णौ महामुने॥उवाच च सुरानेतौ मत्केशौ १३
वसुधातले।अवतीर्य भुवो भारक्लेशहानिं करिष्यतः॥सुराश्च सकलाः स्वांशैरवतीर्य महीतले।कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैर्महासुरैः॥ततः क्षय
मशेषास्ते दैतेया धरणीतले।प्रयास्यन्ति न सन्देहो मद्दृक्पातविचूर्णिताः॥वसुदेवस्य या पत्नी देवकी देवतोपमा।तस्यायमष्टमो गर्भो मत्केशो भविता सुराः
॥अवतीर्य च तत्रायं कंसं घातयिता भुवि।कालनेमिं समुद्भूतमित्युक्त्वान्तर्दधे हरिः॥ ॥पराशर उवाच॥अदृश्याय ततस्तस्मै प्रणिपत्य महामुने।मेरुपृ

५
ष्ठं सुरा जग्मुरवतेरुश्च भूतले॥कंसाय चाष्टमो गर्भो देवक्या धरणीधरः।भविष्यतीत्याचचक्षे भगवान्नारदो मुनिः॥कंसोऽपि तदुपश्रुत्य नारदात्कुपितस्ततः।
देवकीं वसुदेवं च गृहे गुप्तावधारयत्॥जातं जातं च कंसाय तेनैवोक्तं यथा पुरा।तथैव वसुदेवोऽपि पुत्रमर्पितवान्द्विज॥हिरण्यकशिपोः पुत्राः षड्गर्भा इति वि
श्रुताः॥विष्णुप्रयुक्ता तान्निद्रा क्रमाद्गर्भानयोजयत्॥योगनिद्रा महामाया वैष्णवी मोहितं यया।अविद्यया जगत्सर्वं तामाह भगवान्हरिः॥ ॥श्रीभगवानुवाच
॥निद्रे गच्छ ममादेशात्पातालतलसंश्रयान्।एकैकत्वेन षड्गर्भान्देवकीजठरं नय॥हतेषु तेषु कंसेन शेषाख्योंऽशस्ततो मम।अंशांशेनोदरे तस्याः स
प्तमः संभविष्यति॥गोकुले वसुदेवस्य भार्यान्या रोहिणी स्थिता।तस्याः स संभूतिसमं देवि नेयस्त्वयोदरं॥सप्तमो भोजराजस्य भयाद्रोधोपरोधतः।देवक्याः
पतितो गर्भ इति लोको वदिष्यति॥गर्भसंकर्षणात्सोऽथ लोके संकर्षणेति वै।संज्ञामवाप्स्यते वीरः श्वेताद्रिशिखरोपमः॥ततोऽहं संभविष्यामि देवकीजठरे
शुभे।गर्भं त्वया यशोदाया गन्तव्यमविलम्बितं॥प्रावृट्काले च नभसि कृष्णाष्टम्यामहं निशि।उत्पत्स्यामि नवम्यां तु प्रसूतिं त्वमवाप्स्यसि॥यशोदाशयने मां तु

देवक्याश्च मनिन्दिता । मल्लिकाद्रविडमतिवपूर्ववान यिष्यति ॥ कंसश्च त्वामुपादाय देवि शैलतालतामसा । प्रक्षिप्य यत्र कन्यावेषवती स्थानेषु समयाम्यति ॥ ततस्त्वां गं
गदश्चक्रधर प्रणम्य मम गौरवी । पानि पद्यान कल्ना रूगिनीत्व प्रहिष्यति ॥ ततः शुम्भनिशुम्भादीन् हत्वा दैत्यान् सहस्रशः । स्थानेषु नेकेषु पृथिवीमालंकरिष्यसि
॥ त्वं भूतिः सन्नतिः क्षान्तिः कीर्तिः पृथिवी धृतिः । लज्जा पुष्टिरुषा या चान्या विद्यास्त्वमेव सा ॥ ये त्वामार्ये ति दुर्गेति वेदगर्भाम्बिकेति च । भद्रेति भद्रकाली
ति क्षेम्या क्षेमकरीति च ॥ प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्रमूर्त्तयः । तेषां हि प्रार्थितं सर्वं मत्प्रसादाद्भविष्यति ॥ सुरामांसोपहारैश्च भक्ष्य भोज्यैश्च पूजिता १३३
नृणामशेषकामांस्त्वं प्रसन्ना संप्रदास्यसि । ते सर्वे सर्वदा भद्रे मत्प्रसादेन संशयः ॥ इति श्रीदिव्यावतु विष्णुर्विष्णुकीगङ्गा देवीयथोदिता ॥ इति श्रीविष्णुपुराणे पञ्चमें
प्रथमाध्यायः ॥ ❁ ॥ पराशर उवाच ॥ यथोक्तं सा जगद्धात्री देवदेवेन वै तदा । षड्गर्भगर्भविन्यासं चक्रे चान्यस्य कर्षणं ॥ सप्तमे चापि सम्प्राप्ते गर्भे गर्भं तु
भारुविः ॥ लोकत्रयोपकाराय देवक्याः प्रविवेश वै । योगनिद्राय शोदायास्तस्मिन्नेव तथा दिने ॥ सम्भूता जठरे तद्वद्यथोक्तं परमेष्ठिना ॥ ततो ग्रहगण
सम्यक् प्रचचार दिवि द्विज ॥ विष्णोरंशेस्तु वियाति अतवश्चावरुद्धाः ॥ न सहेदेवकीं द्रष्टुं मनोऽतितेजसा । तयासम्यक्पूः ॥ अदृष्टाः पुरुषाः स्त्रियो देवकीं देवताः गणाः ॥ बिभ्रती
वपुषा विष्णुमुद्वहन्ती मनोहरं निर्मं ॥ ॥ देवा ऊचुः ॥ प्रकृतिः पराऽद्भुता ब्रह्मगर्भाऽभवत्पुनः । तथा वाणी जगद्धात्री वेदगर्भाऽसि शोभने ॥ सृज्यस्वरूपगर्भाऽसि सृष्टि
भूतानि सनातनि । बीजभूता तु सर्वस्य यज्ञगर्भाऽभवस्त्रयी ॥ फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः ॥ आदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः ॥ ज्योत्स्ना वासर
गर्भा त्वं ज्ञानगर्भाऽसि सन्नतिः ॥ नयगर्भा परा नीतिर्लज्जा त्वं प्रश्रयोद्वहा ॥ कामगर्भा तथेच्छा त्वं तुष्टिः संतोषगर्भिणी ॥ ● मेधा च बोधगर्भाऽसि धैर्यगर्भोद्वहा
धृतिः ॥ ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहेतुकी ॥ एता विभूतयो देवि तथान्याश्च सहस्रशः ॥ तथा संख्या जगद्धात्रि साम्प्रतं जठरे तव ॥ समुद्राद्रिनदीद्वीपव
नपत्तनभूषणाः ॥ ग्रामखर्वटखेटाढ्या समस्ता पृथिवी शुभे ॥ समस्तवह्नयोऽम्भांसि सकलाश्च समीरणाः ॥ ग्रहर्क्षतारकाचित्रं विमानशतसंकुलं ॥ अवका
शमशेषस्य यद्ददाति नभस्थलं ॥ भूर्लोकश्च भुवर्लोकः स्वर्लोकोऽथ महर्जनः ॥ तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे ॥ तदन्तर्ये स्थिता देवा दैत्य

गन्धर्व्वचारणाः। महोरगास्तथा यक्षा राक्षसाः प्रेतगुह्यकाः॥ मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि। तैरन्तस्थैरनन्तोसौ सर्व्वगः सर्व्वभावनः॥ रूपकर्म
स्वरूपाणि न परिच्छेदगोचरे। यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव॥ त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरम्बरे॥ त्वं सर्व्वलोकरक्षार्थमवतीर्णा
महीतले। प्रसीद देवि विश्वस्य जगतः शं शुभे कुरु॥ प्रीत्या त्वं धारयेशानं धृतं येनाखिलं जगत्॥ इति श्रीविष्णुपुराणे पञ्चमेंशे द्वितीयोध्यायः॥ ० ॥
पराशर उवाच॥ एवं संस्तूयमाना सा देवैर्द्देवमधारयत्। गर्ब्भेण पुण्डरीकाक्षं जगतस्त्राणकारणं॥ ततोखिलजगत्पद्मबोधायाच्युतभानुना। देवकीपूर्व्वसन्ध्या १३१
यामाविर्भूतं महात्मना॥ तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखं। बभूव सर्व्वलोकस्य कौमुदी शशिनो यथा॥ सन्तः सन्तोषमधिकं प्रशमं चण्डमारु
ताः। प्रसादं निम्नगा जाता जायमाने जनार्द्दने॥ सिन्धवो निजशब्देन वाद्यं चक्रुर्म्मनोरमं। जगुर्गन्धर्व्वपतयो ननृतुश्चाप्सरोगणाः॥ ससृजुः पुष्पवर्षाणि
देवा भुव्यन्तरीक्षगाः। जज्वलुश्चाग्नयः शान्ता जायमाने जनार्द्दने॥ मध्यरात्रेखिलाधारे जायमाने जनार्द्दने। मन्दं जगर्ज्जुर्ज्जलदाः पुष्पवृष्टिमुचो दिवि॥ फुल्ले

क

न्दीवरपत्राभं चतुर्ब्बाहुमुदीक्ष्य तं। श्रीवत्सवक्षसं जातं तुष्टावानकदुन्दुभिः॥ अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्म्महामतिः। विज्ञापयामास तदा कंसाद्भीतो १६८
द्विजोत्तम॥ ॥वसुदेव उवाच॥ ज्ञातोसि देव देवेश शङ्खचक्रगदाधर। दिव्यं रूपमिदं देव प्रसादेनोपसंहर॥ अद्यैव देव कंसोयं कुरुते मम यातनां। अवती
र्णमिति ज्ञात्वा त्वामस्मिन्मम मन्दिरे॥ ॥देवक्युवाच॥ योनन्तरूपोखिलविश्वरूपो गर्भेपि लोकान्वपुषा बिभर्त्ति। प्रसीदतामेष स देवदेवः स्वमायया विष्णु
र्बालरूपः॥ उपसंहर सर्व्वात्मन्रूपमेतच्चतुर्भुजं। जानातु मावतारन्ते कंसोयं दितिजान्तक॥ ॥श्रीभगवानुवाच॥ स्तुतोहं यत्त्वया पूर्व्वं पुत्रार्थिन्या तदद्य ते
। सफलं देवि सञ्जातं जातोहं यत्तवोदरात्॥ ॥पराशर उवाच॥ इत्युक्त्वा भगवांस्तूष्णीं बभूव मुनिसत्तम। वसुदेवोपि तं रात्रावादाय प्रययौ बहिः॥ मोहिता
श्चाभवंस्तत्र रक्षिणो योगनिद्रया। मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ॥ वर्षतां जलदानाञ्च तोयम मत्युल्बणं निशि। संछाद्यानुययौ शेषः फणैरानकदु
न्दुभिं॥ यमुनाञ्चातिगम्भीरां नानावर्त्तशताकुलां। वसुदेवो वहन्विष्णुं जानुमात्रवहां ययौ॥ कंसस्य करमादाय तत्रैवाभ्यागतांस्तटे। नन्दादीन्गोपवृद्धांश्च

यमुनाञ्चुदयग्यिः॥ यस्मिन्काले यशोदापि मोहिता योगनिद्रया। तामेव कन्यां मैत्रेय प्रसूता मोहिते जने॥ वसुदेवोपि विन्यस्य बालमादाय वालिकां। यशो-
दाशयने तूर्णं माजगामामितद्युतिः॥ ददृशे च विबुद्धा सा यशोदा जातमात्मजं। नीलोत्पलदलश्यामं ततोत्यर्थं मुदं ययौ॥ आदाय वसुदेवोपि दारिकां निजम-
न्दिरं। देवकीशयने न्यस्य यथापूर्व्वमतिष्ठत॥ ततो बालध्वनिं श्रुत्वा रक्षिणः सहसोत्थिताः। कंसायावेदयामासुर्द्देवकीप्रसवं द्विज॥ कंसस्तूर्णमुपेत्यैनां ततो ज-
ग्राह बालिकां। मुञ्च मुञ्चेति देवक्या सन्नकण्ठ्या निवारितः॥ चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थितिं। अवाप रूपं सुमहत् सायुधाष्टमहाभुजं॥ प्रजहास त- १६८
थैवोच्चैः कंसं च रुषिताब्रवीत्॥ ॥देव्युवाच॥ किं मया क्षिप्तया कंस जातो यस्त्वां वधिष्यति। सर्व्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते॥ तदेतत्सम्प्रधार्या-
शु क्रियतां हितमात्मनः॥ ॥पराशर उवाच॥ इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गन्धभूषणा। पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसा॥ इति श्री विष्णु-
पुराणे पञ्चमेंशे तृतीयोध्यायः॥ ॥पराशर उवाच॥ कंसस्ततोद्विग्नमनाः प्राह सर्व्वान्महासुरान्। प्रलम्बकेशिप्रमुखानाहूयासुरपुङ्गवान्॥ ❀ ॥

कंस उवाच॥ हे प्रलम्ब महाबाहो केशि धेनुक पूतनाः। अरिष्टाद्यैस्तथा चान्यैः श्रूयतां वचनं मम॥ मां हन्तुममरैर्यत्नः कृतः किल दुरात्मभिः। मद्वीर्य्यतापितैर्व्वी-
१६९ रा न त्वेतान्गणयाम्यहं॥ किमिन्द्रेणाल्पवीर्य्येण किं हरेनैकचारिणा। हरिणा वापि किं साध्यं छिद्रेष्वसुरघातिना॥ किमादित्यैः सवसुभिरल्पवीर्य्यैः कि-
मग्निभिः। किं वान्यैरमरैः सर्व्वैर्मद्बाहुबलनिर्ज्जितैः॥ किं न दृष्टोमरपतिर्म्मया संयुगमेत्य सः। पृष्ठेनैव वहन्बाणानपागच्छन्न वक्षसा॥ मद्राष्ट्रे वारिता
वृष्टिर्यदा शक्रेण किं तदा। मद्बाणभिन्नैर्जलदैरापो मुक्ता यथेप्सिताः॥ किमुर्व्यामवनीपाला मद्बाहुबलभीरवः। न सर्व्वे सन्नतिं याता जरासन्धमृते गुरुं
॥ अमरेषु ममावज्ञा जायते दैत्यपुङ्गवाः। हास्यं मे जायते वीरास्तेषु यत्नपरेष्वपि॥ तथापि खलु दुष्टानां तेषामप्यधिकं मया। अपकाराय दैत्येन्द्रा यतनीय-
न्दुरात्मनां। तद्ये यशस्विनः केचित्पृथिव्यां ये च यज्विनः॥ कार्यो देवापकाराय तेषां सर्व्वात्मना वधः॥ उत्पन्नश्चापि मे मृत्युर्भूतपूर्व्वः स वै किल॥ इत्ये-
तद्बालिका प्राह देवकीगर्ब्भसम्भवा। तस्माद्बालेषु परमो यत्नः कार्यो महीतले॥ यत्रोद्रिक्तं बलं बाले स हन्तव्यः प्रयत्नतः॥ इत्याज्ञाप्यासुरान्कंसः प्रविश्या-

स्नगृहीतया । मम माववसुदेव स्व दवकीञ्च निवोधतः ॥ ॥कंस उवाच ॥ यूवयोर्घातिता गर्भाः दैवेनैव मयाधुना । कोप्यन्यत्र वनाशाय बालाममसमुद्गतः ॥ नयत्नी
पवित्तापश्च नूनमेतद्विनाद्दिश । अर्भकायुवयोः कोवा नायुषान्न विरुध्यते ॥ इत्याश्वास्य विमुक्तौ च कंसस्तौ पविशङ्कितः । अन्तर्गृहं द्विजश्रेष्ठ प्रविवेश पुनः
स्वकं ॥ इति श्री विष्णुपुराणे पंचमेंशे ॥ ॥पराशर उवाच ॥ विमुक्तो वसुदेवो पि नन्दस्य शकटं गतः । प्रहृष्टं दृष्टवान्नन्दं पुत्रो जातो ममेति वै ॥ वसुदेवो पि
तं प्राह दिष्ट्या दिष्ट्येति सादरं । वार्द्धके पि समुत्पन्नस्तनयो यं तवाधुना ॥ दत्तो हि वार्षिकः सर्वो भवद्भिर्नृपतेः करः । यदर्थमागतास्तस्मान्नात्र स्थेयं महात्मना ॥ य
दर्थमागताः कार्य्यं तन्निष्पन्नं किमास्यते । भवद्भिर्गम्यतां नन्द तच्छीघ्रं निजगोकुलं ॥ ममापि बालकस्तत्र रोहिणीप्रसवो हि यः । स रक्षणीयो भवता यथायं तन
यो निजः ॥ इत्युक्ताः प्रययुर्गोपा नन्दगोपपुरोगमाः । शकटारोपितैर्भाण्डैः करं दत्वा महाबलाः ॥ वसतां गोकुले तेषां पूतना बालघातिनी । सुप्तं कृष्ण
मादाय रात्रौ प्रददौ स्तनं ॥ यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति । तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते ॥ कृष्णस्तस्याः स्तनं गाढं कराभ्यामपि पीडि १७६

फि ४

तं । गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः ॥ सा विमुक्तमहारावा विच्छिन्नस्नायुबन्धना । पपात पूतना भूमौ म्रियमाणातिभीषणा ॥ तन्नादश्रुतिसंत्रस्ता विबु
द्धास्ते व्रजौकसः । ददृशुः पूतनोत्सङ्गे कृष्णं तां च निपातितां ॥ आदाय कृष्णं संत्रस्ता यशोदापि ततो द्विज । गोपुच्छभ्रामणेनाथ बालदोषमपाकरोत् ॥ गोकरीषमुपा
दाय नन्दगोपो पि मस्तके । कृष्णस्य प्रददौ रक्षां कुर्वन्निदमुदीरयन् ॥ ॥नन्दउवाच ॥ रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः । यस्य नाभिसमुद्भू
तपङ्कजादभवज्जगत् । येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् ॥ वराहरूपधृक् देवः स त्वां रक्षतु केशवः । नखाङ्कुरविनिर्भिन्नवैरिवक्षस्थलो हरिः ॥ नृसिंहरूपी
सर्वत्र रक्षतु त्वां जनार्द्दनः । वामनो रक्षतु सदा भवन्तं यः क्षणाद्दभूत् ॥ त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः । शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ॥ गुह्यं
सजठरं विष्णुर्जङ्घापादौ जनार्द्दनः । मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ॥ रक्षत्वव्याहतैश्वर्य्यस्तव नारायणो व्ययः । शङ्खचक्रगदापाणिः शङ्खनादहताः क्षयं
॥ गच्छन्तु प्रेतकूष्माण्डराक्षसा ये तवाहिताः । त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः । हृषीकेशो म्बरे भूमौ रक्षतु त्वां महीधरः । एवं कृतस्वस्त्ययनो नन्दगोप

नवालकः॥ तथैव शकटस्याधो बालः पर्य्यंकिकागतः। नन्दगोपगृहे दृष्टः पूतनायाः कलेवरं॥ ममैव पश्य भीतासीं विस्मयश्च तदाभवत्॥ इति श्री विष्णुप
राणे पञ्चमांशे॥ ॥ पद्मपुराणे च॥ कदाचिच्छकटस्याधः शयानो मधुसूदनः। चिक्षेप चरणावूर्द्ध्वं स्तन्यार्थी प्ररुरोद च॥ तस्य पादप्रहारेण शकटं परिव
र्त्तितं। विध्वस्तकुम्भभाण्डं तद्विपरीतं पपात वै॥ ततो हाहाकृतः सर्व्वो गोपगोपीजनो द्विज। आजगाम तदा दृष्ट्वा बालमुत्तानशायिनं॥ गोपाः केनेति केन
ति शकटं परिवर्त्तितं। तत्रैव बालकाः प्रोचुर्व्वालेनानेन पातितं॥ रुदता दृष्टमस्माभिः पादविक्षेपपातितं। शकटं परिवृत्तं वै नैतदन्यस्य चेष्टितं॥ ततः पुन १७०
रतीवासन् गोपा विस्मितचेतसः। नन्दगोपोपि जग्राह बालमत्यन्तविस्मितः॥ यशोदा शकटारूढभग्नभाण्डकपालिकां। शकटं चार्च्चयामास दधिपुष्पफल
लाक्षतैः॥ गर्गश्च गोकुले तत्र वसुदेवप्रचोदितः। प्रच्छन्न एव गोपानां संस्कारमकरोत्तयोः॥ ज्येष्ठं चरामभित्याह कृष्णं चैव तथापरं। गर्गो मतिमतां श्रेष्ठो
नामकुर्व्वन्महामतिः॥ स्वल्पेनैव तु कालेन रिंगिणौ तौ महाव्रजे। घृष्टजानुकरौ विप्र बभूवतुरुभावपि॥ करीषभस्मदिग्धाङ्गौ भ्रममाणा वितस्ततः॥ न नि



वारयितुं शेकुर्यशोदा रोहिणी च तौ॥ गोवाटमध्ये क्रीडन्तौ वत्सवाटं गतौ पुनः। तदहर्ज्जातगोवत्सपुच्छाकर्षणतत्परौ॥ यदा यशोदा तौ बालौ एकस्थाननिवा
सिनौ। शशाक नो वारयितुं क्रीडन्तावतिचञ्चलौ॥ दाम्ना बद्ध्वा ततो मध्ये निर्व्वन्धद्रूषणं। कृष्णमक्लिष्टकर्म्माणं माहत्येदममर्षिता॥ यदि शक्नोषि गच्छ त्व
मतिचञ्चलचेष्टित। इत्युक्त्वाथ निजं कर्म्म सा चकार कुटुम्बिनी॥ व्यग्रायामथ तस्यां स कर्षमाण उदूखलं। यमलार्ज्जुनमध्येन जगाम कमलेक्षणः॥ कर्ष
ता वृक्षयोर्म्मध्ये तिर्य्यग्गतमुदूखलं। भग्नावुत्तुङ्गशाखाग्रौ तेन तौ यमलार्ज्जुनौ॥ ततः कटकटाशब्दसमाकर्णनकातरः। आजगाम व्रजजनो ददृशे च म
हाद्रुमौ॥ भग्नस्कन्धौ निपतितौ भग्नशाखौ महीतले। ददृशुश्चाल्पदन्तास्यं सितहासञ्च बालकं॥ तयोर्म्मध्यगतं बद्धं दाम्ना गाढं तथोदरे। ततश्च दामोदर
तां स ययौ दामबन्धनात्॥ गोपवृद्धास्ततः सर्व्वे नन्दगोपपुरोगमाः। मन्त्रयामासुरुद्विग्ना महोत्पातातिभीरवः॥ स्थानेनेह न नः कार्य्यं व्रजामोन्यन्महावनं
। उत्पाता बहवो ह्यत्र दृश्यन्ते नाशहेतवः॥ पूतनाया विनाशश्च शकटस्य विपर्य्ययः। विना वातादिदोषेण द्रुमयोः पतनं तथा॥ वृन्दावनमितः स्थानात्तस्माद्

कृममाविवे।यावङ्घ्रीममहात्याग यापाना गिरुवद्भुवं॥ इति कृत्वामातिं सर्व्वं गमननम्व्रजौकसः। ऊचुः सर्वे कृतीगी। एगम्यतां मा विलम्बितं॥ ततः क्रमेण नप्र
ययुः गकटे गोधने स्तथा। यूथशो वत्स पालाश्च पालयन्तो व्रजौकसः॥ द्रव्याधिपव निर्द्धूते क्षणमात्रेण गरुदा। काककाकी समाकीर्णं व्रज स्थानमहं द्धिजा॥
कस्य वनेस्य वना कृष्णना क्लिष्ट कर्म्मणा। गुरानमनसा श्रुते प्रवाह द्धिमरोम्यता॥ ततस्तत्रानिवह्नान कर्म्मकाल द्विगाहम प्रावृट्कालस्व वा गलनिक्षपो
समकृतः॥ सप्तमावाविमः सर्व्वा व्रजा वृन्दावनं गताः। गकटीवाटपर्यन्ते चन्द्रार्द्धाकारसं स्थितिः॥ वत्सपाली वसंतलो नाम यमादेवो गतः। तत्र स्थानस्थि १७१
ताम्भष्ट वनतु र्व्वालिलीलया। वर्हिपत्र कृता पीतो वन्यपुष्पावतंसको॥ गोपवत्सकृता नायर सुन्द्रवाद्यक तस्मो। काकपक्षधरोवालौ कुमारावविरूपा
नकौ॥ हसन्तौ च रमन्तौ च वत्र तुस्तौ महद्वने। क्वचिद्दसन्तावन्यान्ये क्रोडमानौ तथापरौ॥ गोपपुत्रः समंवत्सी च रयन्तौ विचेरतुः। कालेन गच्छतातौ
तु सप्तवर्षा विरेजतुः॥ सर्व्वस्य जगतः पालौ वत्सपालौ महाव्रजे। प्रावृट्कालस्त तस्तावोन मघोघस्थगिताम्बरः॥ वहवधारा विषमा दिग्दर्शकर्व्वान्धिगोमिवा प्रवृ

ट नवशस्याङ्ग शक्र गोपा स्तामहो। यथमावक गीतासी त्यघ्यवाग विस्तूषिता। उर्गीयू न्मार्ग गिरमो निनिम्नगा स्मा सिम्धर्वितः॥ मनो सिद्धर्थि नीतानी प्रावृषत्त
स्वनिवामिव। नवगङ्ग तिमच्चन्द्रा निर्म्मला मलिने घनैः॥ संघात्क वादा म्हरवानी प्रगरह्णाति निवाद्मिः। निर्गुणेनापि वापन शक्रस्य गगनपदो॥ अवाप्य ना
विवकस्य नपस्यरूपविशदैः। भघयथ्ठ वला कानो नवाङ्ग विमला त्रिः॥ इन्द्रलक्ष्व वक्र कला नस्थानि गोमहता। नवव क्षास्त्र सेवे कुर्यो विद्युदत्य न्तवेशि
ला॥ मेघा कपवनपं सिद्धजंनन पया जिता। मार्गा विहरन स्पृष्टा नवग गच्च वयाव तीः॥ सुर्य्यन्न न मनुपापा प्रजातानामिवा कयः। उन्मत्त शिखिन सन्गो न
स्मिन्काले महावने॥ कृष्णरामौ मुदायुक्तौ गोपालेः सह चेरतुः॥ क्वचिद्गायतिः सम बर्म्य गेयमाल वनावुभौ॥ चेरतुः क्वचिदत्यर्थं गीतव्दोलना अयोव
क्वचित्कदम्बप्रक्तित्री मयूरवर ग्वनो क्वचित्॥ विरेजतौ क्वचिदा साती विविधेर्गिरि धातुभिः। पर्णशय्यास्व स्वतोव क्वचिद्मिद्राक रषिणो॥ क्वचिज्जलं जिताम्बु
म दोहाकारव वापरतौ। गायता मन्य गोपानौ प्रशंसापर मौ क्वचित्॥ मयूर ककानु गतौ। गोपवत्सप्रवादकौ। इति नानाविधैर्भावैः रमप्रीतिसयुतौ

क्रीडकौ तौ वने तस्मिंश्चेरतुस्तुष्टमानसौ ।विकाले तु समं गोभिर्गोपवृन्दसमन्वितौ ॥प्रजग्मतुस्तु कृष्णबलौ गोपवेशधनावुभौ ।विकालवयस्थ
यावथ व्रजमभ्यमहात्मानौ ।गोपपञ्चसमानैश्च सहितौ विक्रीडताममराविव ॥ ॥इति श्रीविष्णुपुराणे पञ्चमांशे ॥ ॥पराशर उवाच ॥एकदा तु विना रामं कृष्णो
वृन्दावनं ययौ ।विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्वलः ॥स जगामाथ कालिन्दीं लोलकल्लोलमालिनीं ।तीरसंलग्नफेनौघैर्हसन्तीमिव सर्वतः ॥तस्यां चा-
तिमहाभीमं विषाग्निसृतवारिणं ।ह्रदं कालीयनागस्य ददर्शातिविभीषणं ॥विषाग्निना विसरता दग्धतीरमहातरुं ।वाताहताम्बुविक्षेपस्पर्शदग्धवि-
हंगमं ।तमतीव महारौद्रं मृत्युवक्त्रमिवापरं ॥विलोक्य चिन्तयामास भगवान्मधुसूदनः ।अस्मिन्वसति दुष्टात्मा कालियोऽसौ विषायुधः ।यो मया निर्जि- १७२
तस्त्यक्त्वा दुष्टो नष्टः पयोनिधिं ॥तेनेयं दूषिता सर्वा यमुना सागरंगमा ।न नरैर्गोधनैर्वापि तृषार्त्तैरुपभुज्यते ॥तदस्य नागराजस्य कर्त्तव्यो निग्रहो मया ।
।नित्यत्रस्ताः सुखं येन चरेयुर्व्रजवासिनः ॥एतदर्थं नृलोकेऽस्मिन्नवतारो मया कृतः ।यदेषामुत्पथस्थानां कार्या शास्तिर्दुरात्मनां ॥तदेतन्नाति-

दूरस्थं कदम्बमुरुशाखिनं ।अधिरुह्य पतिष्याम्यहं ह्रदेऽस्मिन्ननिलाशिनः ॥ ॥पराशर उवाच ॥इत्थं विचिन्त्य बद्ध्वा च गाढं परिकरं ततः ।निपपात ह्रदे त-
१७३ त्र सर्पराजस्य वेगिनः ॥तेनापि पतता तत्र क्षोभितः स महाह्रदः ।अत्यर्थं दूरजातांस्तु तानसिञ्चन्महीरुहान् ॥तेऽहिदुष्टविषज्वालातप्ताम्बुपवनोक्षिताः ।जज्वलुः
पादपाः सद्यो ज्वालाव्याप्तदिगन्तराः ॥आस्फोटयामास तदा कृष्णो नागह्रदं भुजैः ।तच्छब्दश्रवणाच्चाशु नागराजोऽभ्युपागमत् ॥आताम्रनयनः कोपाद्विषज्वाला-
कुलैः फणैः ।वृतो महाविषैश्चान्यैरुरगैरनिलाशनैः ॥नागपत्न्यश्च शतशो हारिहारोपशोभिताः ।प्रकम्पिततनूत्क्षेपचलत्कुण्डलकान्तयः ॥ततः प्रवेष्टित-
ः सर्पैः स कृष्णो नागबन्धनैः ।ददंशुश्चापि तं कृष्णं विषज्वालाकुलैर्मुखैः ॥तं तत्र पतितं दृष्ट्वा नागभोगनिपीडितं ।गोपा व्रजमुपागम्य चुक्रुशुः शोकलाल-
साः ॥दृश्यश्च पश्यत प्रसर्पराजवशं गतं ।निश्चेष्टितो कीर्त्तिः कृष्णः सर्पराजेन वध्यते ॥नन्दगोपश्च निश्चेष्टो न्यस्य कृष्णमुखे दृशं ।यशोदा च महाभागा बभूव
मुनिसत्तम ।गोप्यश्चान्या रुदन्त्यश्च ददृशुः शोककातराः ॥प्रोचुश्च केशवं प्रीत्या भयकातर्यगद्गदं ।सर्वा यशोदया सार्द्धं विशामोऽत्र महाह्रदं ।नागरा

गाङ्गस्य नागस्तु मस्माकं यूयं अजायद ॥ दिवसः का विना सूर्य्यं विना चन्द्रेण का निशा । विना त्वं षण्ण का गवा । विना कृष्णं न का व्रजः ॥ विनावयं न गच्छामः कृष्ण नाग
नागमकली । अवमानोनात्तिसर्व्वयं वाह्निनानेयमास्तवः ॥ यत्र नन्दी वनदलः प्रख्य कान्ति विपदं विः । न नापि मर्त्य कामसनन्तनिवस्तीनि विस्मयः ॥ उत्फुल्ल पङ्क
जदल स्पष्ट कान्ति विलोचनी । अपन्यन्ता दृविंदानाः कथं गमष्टुतविषथ । अर्थमधु वालापहृताशेषमनाधनी ॥ न विना पक्षुनी कादीयास्यामान न्द्रग्मकली
। शागेनावच्छिन्न्यापि सर्प्पवाञ्जनपन्नगा ॥ स्मितकान्ति मुखे गन्ध कृष्णस्यास्म द्विलोकन । इति गोपीवचः श्रुत्वा यो हि गेयामहावलः ॥ गोपीश्वत्रासवि १७३
धूनान् विलोक्य स्मितगन्धः । नन्दं कृद्यानमस्य धर्थं न्यस्त दृष्टं सु कानन ॥ मूर्छाकुलीयागोपा कृष्ण माहात्म्यसंस्थ्या । किमत्र दवदन शतावार्यमानष्ट
या ॥ यथशत्यत्क मात्मानं किमन्यैर्विनवश्विपत् । त्वमस्यजगतानादि वनवाला अस्मा संश्रयः ॥ कल्पिकल्पी पामा वत्रेता अल्पं त्रयीमयः । सन्द्रष्ट्राश्ववसारिता
दियेमविदाग्निरिः ॥ विस्मय त्वमविन्त्यात्मन्न प्रममस्ते वयामि तिः । उरगस्य थ्य गज्ञाथ रावा वतक वगेकृया ॥ अवनी भ्रूत्रमर्त्येषु ऋवविस्या ऋमयज्ञः ।

मनुष्यलीलीलगवन् रुजगारवनः स्ववान् ॥ विलम्ब पङ्कव लीलां सुखं वसमापन । अवमार्य्य भवान् सर्वं कथं लत्रसनागिनाः ॥ क्रीडा धर्मात्मनः पश्य मे देव
गीलं निवेशम् । सूत्रवनोभूयाः कृष्ण गमत्र वह्नि वान्धवाः ॥ गमथ्य अश्वसीदतः कस्मा लब्ध श्रुंसुमपक्वस । दानिभामानुषाभावा दर्शितबाल्यापली ॥ तद
१७४ यदिश्यगी कृष्ण-कृष्णा स्वादन नायुधः ॥ ॥ पनाश नउवाच ॥ इति निशीलमाविकः कृष्णः स्मितं नि श्रीपूर्णपुटः । आस्ते दर्शभावयामास स्ववधूदृशागवन्धनात्
॥ आनाम्य वापिरुद्धोन्त्यां मूर्छा स्यामश्वमं गिरः । आनन्दात्तु गगनि विपूनन रुविविक्रमः ॥ प्राणाः श्रूलतवीतस्य कृष्णस्या त्रिनिकृन्तनः । यत्रान्नितियस्कृ
न्तननामास्य मनः गिरः ॥ मूर्छामुपययौ भ्रान्त्वा नागः कृष्णस्य नववैः । दण्डपाकनिपातेन ववामरुधिरं बहु ॥ गीनिरुग्नानिश्वासौ वमात्मस्य रुधः श्रूतागताति
गं । विलोक्य गवर्ण जग्म स्कस्य श्यामधुसूदनी ॥ ॥ नागपत्न्य उचुः ॥ हा गता सिद्धवदेवगण श्रुद्धं गत्वमनुस्मरः । पतिश्चाति विस्मय रुद्रशपत स्वबभुः ॥ नस
मर्थ सवाप्ता उपमननमनवि विद्धि । स्वरूपवर्णनं तस्य कथयामि विस्मयन्ति ॥ यस्मा स्मृतं महीध्यामरुला श्वपवनात्मकं । ब्रह्माण्डमस्य कीर्तिः प्रकाश्याम

ष्ठं कथं स्तुवे ॥ यज्ज्ञानविद्वन्निर्धिर्यत्स्वरूपाय योगिनः । परमात्मनावस्थीकृत्य लीनमात्मनि ॥ न यस्य जन्म नाशश्च मा ज्ञस्य नाकायस्वान्तकः । किमि कर्त्त
नवाच्या किं यस्य तस्मै नमः सदा ॥ कायः स्वस्थापि तेनाङ्गि किङ्किणि पालनमवति । कावलीकालियस्यास्य दमनं श्रूयतामतः ॥ क्रियानुकम्प्या च साधूनां मूढ
दानां च जल्पकः । यतः स्तनास्पदी नस्य दम्पत्या स्वयमास्व ॥ समस्तजगदाधारा स्तुवानस्य बलः कली । त्वयान पीतनाज्ज्या मूढलब्धि नञा विनि ॥ कपत्र ...
स्तवीय यपिं क्र स्तुवानुत्तवनाश्रयः । प्रातिद्वयो पदाकृष्णं मेवबी वयताय य । ततः कृष्णं जगत्स्वामिनं प्रसादेनावसादितः । प्राणाश्रितं जति नागमयी तत्र १७४
हि दास्यपदायती ॥ ॥ पत्न्य ऊचुः ॥ स्त्यक्तः कालिया न्यस्य श्रीकृष्ण पदे पिपन्नगः । प्रसीद देव देव ति प्राहुर्बाष्पैर्नेत्रैर्नतः ॥ नवाम्बुजगणमैर्व्यर्थ नाथ
स्वास्थाविकं परं । निन्दस्त्वां नित्ययं यस्य न स्यस्था ध्यामि किं स्तुवे ॥ त्वं परस्त्वं परस्मादपि सत्त्वात्परात्मकं । परं स्वात्यं परं यस्त्वं न स्यस्था ध्यामि किं स्तुवे
॥ यस्माद्ब्रह्मा च रुद्रश्च चन्द्रेन्द्रमरुदश्विनः । वसवश्च सहादित्यैः स्तुत्य स्थाध्यामि किं स्तुवे ॥ एकावयवमात्मस्थं यस्यैतदखिलं जगत् । कस्यानावयवी ले

शं स्तुत्यं ध्यामि कथं स्तुवे ॥ यदस्यापि न यत्र स्वयं जायात्मिदं न त्वया । परमार्थं न जानन्ति तं स्तुत्याध्यामि कथं स्तुवे ॥ वस्त्रेणावेष्टितं यस्य दिव्यपुष्पानुलेपनैः । न
न्धनादिसमुत्सृष्टां सार्थं न वा कथं मया ॥ यस्यावतारान् पापशिव वराजसदार्चितं । न वाल्पिपरमेश्वरूपं सार्थं न वा कथं मया ॥ विषयस्य समास्तस्य सर्वाङ्गा लि वयागिन
ः यमर्त्य यत्किं च न न सार्थं मीवा कथं मया ॥ हृदि स्त कर्धय यद्रूपं ध्याननार्चिक योगिनः । स वपुर्ध्या दिसिर्न्न थ सार्थं न वा कथं मया ॥ साक्षान्तदैव दैव नार्चनाद्दी
सुभी नव । सामर्थ्यवान्न कृपापात्र मनाक्तिः प्रसीद भो ॥ सर्पजाति विर्यं क्रूरा यस्यां जातावास्मि केश । तत्स्वभावोयमत्रा स्ति नापराधो मयाच्युत ॥ सृज्यते भवता
सर्वं तथा संह्रियते जगत् । जातिरूपस्वभावाश्च सृष्टास्तं जगतां त्वया ॥ यथाहं भवता सृष्टो जात्या रूपेण चेश्वर । स्वभावेन च संयुक्तः तथेदं चेष्टितं मम ॥ यद्यन्यथा
प्रवर्त्तेयं देव देव ततो मयि । न्याय्यो दण्डनिपातस्ते त्वद्वचनं मम ॥ तथापि यज्जगत्स्वामिन्दण्डपातितवान्मयि । स श्लाघ्योयं वरोस्माकं नान्यत्र भवतः ॥
हतवीर्यो हतविषो दमितोहं त्वयाच्युत । जीवितं दीयतामेकमाज्ञापय करोमि किं ॥ ॥ श्रीभगवानुवाच ॥ नात्र स्थेयं त्वया सर्प कदाचिद्यमुनाजले । स

भृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥ मत्पदानि च ते सर्प दृष्ट्वा मूर्द्धनि सागरे । गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति ॥ ॥पराशर उवाच॥ इत्यु-
क्तः सर्पराजो ऽसौ कृष्णेन भगवान् हरिः । प्रणम्य सो ऽपि कृष्णाय जगाम पयसां निधिं ॥ पश्यतां सर्वभूतानां सभृत्यापत्यबान्धवः । समस्तभार्यासहितः
परित्यज्य स्वकं ह्रदं ॥ गते सर्पे परिष्वज्य मृतं पुनरिवागतं । गोपा मूर्द्धनि गोविन्दं सिषिचुर्नेत्रजैर्जलैः ॥ कृष्णमक्लिष्टकर्म्माणमन्ये विस्मितचेतसः ।
तुष्टुवुर्मुदिता गोपा दृष्ट्वा शिवजलां नदीं ॥ गीयमानः स गोपीभिश्चरितैश्चारुचेष्टितैः । संस्तूयमानो गोपैश्च कृष्णो व्रजमुपागमत् ॥ ॥इति श्रीवि १७३
ष्णुपुराणे पञ्चमे ऽंशे ॥ ॥पराशर उवाच॥ गाः पालयन्तौ च पुनः सहितौ वलकेशवौ । भ्रममाणौ वने तत्र रम्यं तालवनं गतौ ॥ तत्तु तालवनं दिव्यं धेनु-
को नाम दानवः । मृगमांसकृताहारः सदाध्यास्ते खराकृतिः ॥ तत्तु तालवनं पक्वफलसम्पत्समन्वितं । दृष्ट्वा स्पृहान्विता गोपाः फलादाने ऽब्रुवन्वचः ॥
हे राम हे कृष्ण सदा धेनुकेनैष रक्ष्यते । भूप्रदेशो यतस्तस्मात्पक्वानीमानि सन्ति वै ॥ फलानि पश्य तालानां गन्धामोदितदिंञ्चि वै । वयमेतान्यभीप्सा-

मः पात्यन्तां यदि रोचते ॥ इति गोपकुमाराणां श्रुत्वा संकर्षणो वचः । कृष्णश्च पातयामास भुवि तालफलानि वै ॥ फलानां पततां शब्दमाकर्ण्य सुदुरासदः । आजगाम
स दुष्टात्मा कोपाद्दैतेयगर्द्दभः ॥ पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां बलं बली । जघान नाभौ तां तेन गृहीतः पादयोस्तु सः ॥ गृहीत्वा भ्रामणेनैव सो ऽम्बरे गतजीवितं ॥ तस्मि-
न्नेव स चिक्षेप वेगेन तृणराजनि । ततः फलान्यनेकानि तालाग्रान्निपतन्खरः ॥ पृथिव्यां पातयामास महावातो ऽम्बुदानिव । अन्यानप्यस्य वै ज्ञातीनागतान्दैत्यग-
र्द्दभान् ॥ कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया । क्षणेनालंकृता पृथ्वी पक्वैस्तालफलैस्तथा ॥ दैत्यगर्द्दभदेहैश्च मैत्रेय शुशुभे ऽधिकं ॥ ततो गावो निराबाधा-
स्तस्मिंस्तालवने द्विज । नवशष्पं सुखं चेरुर्यन्न भुक्तमभूत्पुरा ॥ इति श्रीविष्णुपुराणे पञ्चमे ऽंशे ॥ ॥पराशर उवाच॥ तस्मिन्रासभदैतेये सानुगे विनिपा-
तिते । सौम्यं तद्गोपगोपीनां रम्यं तालवनं बभौ ॥ ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ । हत्वा धेनुकदैतेयं भाण्डीरवटमागतौ ॥ क्ष्वेलमानौ प्रगायन्तौ वि-
चिन्वन्तौ च पादपान् । चारयन्तौ च गा दूरे व्याहरन्तौ च नामभिः ॥ निर्योगपाशस्कन्धौ तौ वनमालाविभूषितौ । शुशुभाते महात्मानौ बालशृङ्गाविवर्षभौ ॥ सुवर्ण्णा-

महेन्द्रायुधसंकाशौ श्वेतकृष्णाविवाम्बुदौ ॥ चेरतुर्लोकसिद्धाभिः क्रीडाभिरितरेतरं । समस्तलोकनाथानां नाथभूतौ भुवं गतौ ॥
ऊनवृष्णिर्यौ तौ नयावनुषितावौ । मनुष्यधर्माभिरतौ मानयन्तौ मनुष्यतां ॥ तद्गुणैर्युक्तौ क्रीडन्तौ चेरतुर्वने । ततस्त्वान्दोलिकाभिश्च नियुद्धैश्च महा-
बलौ । व्यायामं चक्रतुस्तत्र क्षेपनीयैस्तथाश्मभिः ॥ तल्लिप्सुरसुरस्तत्र ह्युभयो रममानयोः । आजगाम प्रलम्बाख्यो गोपवेशतिरोहितः ॥ सोवगाहत निःशं-
कं तेषां मध्यममानुषः । मानुषं वपुरास्थाय प्रलम्बो दानवोत्तमः ॥ तयोश्छिद्रान्तरप्रेप्सुरविषह्यममन्यत । कृष्णं ततो रौहिणेयं हन्तुं चक्रे मनो बली ॥
॥ हरिणाक्रीडनं नाम बालक्रीडनकं ततः । प्रक्रीडिता हि ते सर्वे द्वौ द्वौ युगपदुत्पतन् ॥ श्रीदाम्ना सह गोविन्दः प्रलम्बेन तथा बलः । गोपालैरपरैश्चा- २७३
न्ये गोपालाः सह पुप्लुवुः ॥ श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः । जितवान् कृष्णपक्षीयैर्गोपैरन्ये पराजिताः ॥ ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्ध-
मेत्य वै । पुनर्निववृतुः सर्वे ये ये तत्र पराजिताः ॥ संकर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः । न तस्थौ प्रजगामैव सचन्द्र इव वारिदः ॥ असहन् रौहिणेय-
स्य स भारं दानवोत्तमः । ववृधे सुमहाकायः प्रावृषीव बलाहकः ॥ संकर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिं । स्रग्दामलम्बाभरणं मुकुटाटोपमस्तकं ॥ पि

महाकायं चोद्रौद्रं शकटचक्राक्षं पादन्यासचलत्क्षितिं ॥ ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत् । कृष्ण कृष्ण ह्रियाम्येष पर्वतोदग्रमूर्तिना ॥ केनापि पश्य दैत्येन
गोपालच्छद्मरूपिणा । यदत्र साम्प्रतं कार्यं मया मधुनिसूदन ॥ तत्कथ्यतां प्रयात्येष दुरात्मातित्वरान्वितः ॥ ॥ पराशर उवाच ॥ तमाह रामं गोविन्दः
स्मितभिन्नौष्ठसंपुटः । महात्मा रौहिणेयस्य बलवीर्यप्रमाणवित् ॥ किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते । सर्वात्मन्सर्वगुह्यानां गुह्यगुह्यात्मनात्मना ॥ स्म-
राशेषजगन्नाथ कारणं कारणाग्रज । आत्मानमेकं यद्वत्स्व जगत्यैकार्णवे च यः ॥ किन्न वेत्सि यथाहं च त्वं चैकं कारणं भुवः । भारावतरणार्थाय मर्त्यलोकमुपाग-
तौ ॥ नभः शिरस्तेम्बुमयी च मूर्तिः पादौ क्षितिर्वक्त्रमनन्तवह्निः । सोमो मनस्ते श्वसितं समीरो दिशश्चतस्रोव्यय बाहवस्ते ॥ सहस्रवक्त्रो भगवान्महात्मा सहस्रहस्ताङ्घ्रि-
शरीरभेदः । सहस्रपद्मोद्भवयोनिराद्यः सहस्रशस्त्वां मुनयो गृणन्ति ॥ दिव्यं हि रूपं तव वेत्ति नान्यो देवैरशेषैरवताररूपं । तदर्च्यते वेत्सि न किं यदन्ते
त्वय्येव विश्वं लयमभ्युपैति ॥ त्वया धृतेयं धरणी बिभर्ति चराचरं विश्वमनन्तमूर्ते । कृतादिभेदैरज कालरूपो निमेषपूर्वो जगदेतदत्सि ॥ अत्तं यथा वाडववह्निना

यून्हि मस्वरूपं प्रविश्य स्वस्कं । हिमावलीरासूमनागुसंगः । कृलत्वमस्यातिपुनस्क्षदव ॥ एवंत्वयासंस्मरणेतु मम कृतात्मसंक्षीपुनरप्यवस्थं । तदेवसर्गभय
समस्यतस्य जगतस्त्वमस्यतनूकम्पमीश ॥ रुवानन्दवविश्रम्भत्र न कृमवक्तिकावनं । जगतास्य जगत्यर्थं दनावीर्य्यव क्तिरो ॥ तदसमर्थ्यतामभयात्मां द्व
यायाजहि दानवं । मानुष्यमवावलम्ब्य बन्धूनां क्रियतां हितं ॥ ॥ पराशर उवाच ॥ इति संस्मारितो विप्र कृष्णेन सुमहात्मना । विहस्य पीडयामास प्रलम्बं
बलवान्बलः ॥ मुष्टिना सोऽहनन्मूर्द्ध्नि कोपसंरक्तलोचनः । तेन चास्य प्रहारेण बहिर्याते विलोचने ॥ स निष्क्रान्तमस्तिष्को मुखाच्छोणितमुद्वमन् ॥ निपपा १७७
त महीपृष्ठे दैत्यवर्यो ममार च । प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्म्मणा ॥ प्रहृष्टास्तुष्टुवुर्ग्गोपाः साधु साध्विति चाब्रुवन् । संस्तूयमानो रामस्तु गोपैर्दैत्ये नि
पातिते । प्रलम्बे सह कृष्णेन पुनर्ग्गोकुलमाययौ ॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे ॥ ॥ तयोर्विहरतोरेवं रामकेशवयोर्व्रजे । प्रावृड्व्यतीता विकसत्सरोजा
चाभवच्छरत् ॥ अवापुस्तापमत्यर्थं शफर्यः पल्वलोदके । पुत्रक्षेत्रादिसक्तेन ममत्वेन यथा गृही ॥ मयूरा मौनमातस्थुः परित्यक्तमदा वने । असारतां
परिज्ञाय संसारस्येव योगिनः ॥ उत्सृज्य जलसर्व्वस्वं विमलाः सितमूर्त्तयः । तत्यजुश्चाम्बरं मेघा गृहं विज्ञानिनो यथा ॥ शरत्सूर्य्यांशुतप्तानि ययुः शोषं सरांसि च
। बह्वालम्बममत्वेन हृदयानीव देहिनां ॥ कुमुदैः शरदम्भांसि योग्यतालक्षणं ययुः । अवबोधैर्म्मनांसीव समत्वममलात्मनां ॥ तारकाविमले व्योम्नि रराजा
खण्डमण्डलः । चन्द्रश्चरमदेहात्मा योगी साधुकुले यथा ॥ शनकैः शनकैस्तीरं तत्यजुश्च जलाशयाः । ममत्वं क्षेत्रपुत्रादिरूढमुच्चैर्यथा बुधाः ॥ पूर्व्वं त्यक्तैः स
रोम्भोभिर्हंसा योगं पुनर्ययुः । क्लेशैः कुयोगिनोऽशेषैरन्तरायहता इव ॥ निभृतोऽभवदत्यर्थं समुद्रः स्तिमितोदकः । क्रमावाप्तमहायोगो निश्चलात्मा यथा
यतिः ॥ सर्व्वत्रातिप्रसन्नानि सलिलानि तथाभवन् । ज्ञाते सर्व्वगते विष्णौ मनांसीव सुमेधसां । बभूव निर्म्मलं व्योम शरदा ध्वस्ततोयदं ॥ योगाग्निदग्धक्लेशौ
घं योगिनामिव मानसं ॥ सूर्य्यांशुजनितं तापं निन्ये तारापतिः शमं । अहंमानोद्भवं दुःखं विवेकः सुमहानिव ॥ नभसोऽभ्रं भुवः पङ्कं कालुष्यं चाम्भसः श
रत् । इन्द्रियाणीन्द्रियार्थेभ्यः प्रत्याहार इवाहरत् ॥ प्राणायाम इवाम्भोभिः सरसां कृतपूरकैः । अभ्यस्यतेऽनुदिवसं रेचकाकुम्भकादिभिः ॥ विम

तावत्तनन्दस्य कालसमास्थागत ब्रजा । तदा शेन्द्रमहाब्रह्मा याग्यमीव्रजवासिनि ॥ कृष्णू स्कान् सूर्कान्द्रष्ट्वा लोपानत्स वल्लासान् । कौ हूहू लादिदिवाक्ष्यप्रा
हूयूद्धन्मिहामति ॥ कार्येशक्रमहानामे यनथा हर्षेस्यागतः । प्राकृतीनन्दलोपपथ्ययन्तकामि जितादवी ॥ भगानीपयसाविलोदवनाज्ञ नाक्वाक्तुः । ततन
सीवादिनाभ या वर्षन्याम्यूनसीमये ॥ नद्वृष्टिज निर्मसस्य वयमन्य वदन्ति । वर्तमानापशुङ्गानास्कर्षयामध्यदवतः ॥ दयवयस्तुमागसवा वत्सवयस्य
निर्धनाः । ननसंवर्द्धितः सस्यं वयमन्य वदन्ति ॥ पूर्वात्तुल्यस्तवाकिंवे ॥ नापस्थानाऽन्यास्तमि नवृत्तुतादिनातनः । दृष्टभयजदृष्टक वह्निमकाव १०८
लाहकाः ॥ सोमभमतत्ययादृष्टं लोनिः सूर्यस्यवानिदः । पर्जन्यः सर्वलोकस्य हवायक्तु विवर्षति ॥ तस्मात्पार्थिवाजानः सर्वगक्रीमूदायूताः । मरुस्थय
नमर्थकिवयमन्यवदन्ति ॥ ॥ पवागवङ्वाव ॥ कापायृदिदशेन्द्रस्य प्राहृदामादवस्तदा । नवर्षकृषिकर्मीथावानिस्थाजाविनानव ॥ गवास्मद्धवनि ः
नामवर्षवनवयायनः । स्यान्निद्विकीत्रयीवार्त्ता दण्डनीतिस्तथापयाः ॥ विद्यावत्ते तस्य ते ग हात्तमित्रगन्नपम । कृषिर्लनिक्षानदवरुनीयवपुपासते ॥ वि

याक्षकामहाताग व्राहृतिहृतिमयात्रया । कर्षकानीकृषिर्हीति पन्थं विपानिजीविनी ॥ अस्माकं लोऽपवावहिर्नीर्हितिदिधयित्रिहिः विघ्यापाडायायुक्त
स्यसादेवतमिदन । सेवयूर्वीवर्णनीयावसेवतस्थापफानिका ॥ यान्यस्माद्दूलमश्रन्ते पूजयस्वपवान्नवः । हृहवप्रयवेवासो नागनाप्रानिलोकनि ॥ कृषक
प्रथिताः सीमाः सीमान्के कपूनवर्तनि । वनान्कानिवयः सर्वे सावास्मार्कपवागतिः ॥ नद्यानवध्यावनाः नष्टहक्षत्रिनस्कथा । गुप्तिनसूखिललाकयथावेव
कवाविनः ॥ पूर्वनृगिवयश्रमी वनस्मिन्कामकूपिताः । नतन्दपूर्वसमास्काय वमनकस्वपूसर्पिषु ॥ यदावेत्रायना श्वनत्रपान्ककाननीकसः । नदासिद्धा
निवृपेस्कान् यानयान्किमहीधवाः ॥ गिविपङ्क्ष्मूर्यं नस्मान्त्र यहूत्वप्रवर्तिनी । किमस्माकं महेन्द्रेण भवलोलाश्वदवता ॥ मकृयज्ञपवाचिपाः सीव
यज्ञाश्च कर्षकाः ॥ गिविता ॥ यज्ञगीताश्च वयमत्रिवनाप्रयाः ॥ तस्मात्कावर्द्धनः शैलोत्रैव हिर्विविधर्हलैः । अर्च्यतामस्यकामर्थं पशुं हत्वा विधाननः ॥
सर्वधापस्यसंदहागृहकनामा विवार्यतां । तापणीतनवलिपा स्कथायवापिवीरकाः ॥ तमविमीकणहाभ साजितपुष्टिकाजिषु । नवत्पयकनापी

ताः परिगच्छन्तु ते गताः॥ एकस्मिन्समये नीते पार्श्वस्थो यदि ॥ ततः कालात्तु वत्स्यानि निर्वाम ... यमम । ॐ किंतस्य ववश्रूत्वानन्दायाम्भवजीक
सः॥ प्रीत्या स्त्वन्मूर्त्या विप्र साधु साधु गिरा ब्रुवन् ।ते नैति मतीवस्त्र यदि तत्त्वमादिशं ॥ ततो विष्णुः ...स सर्वं गिरिपस्तु प्रवर्त्तती । कथा वक्तव्य ...
गिरिपर्वतव्रजौकसः॥ दक्षिणाय समासाद्य ददृशे लवलीं ततः। द्विजाश्रितां शालयामां ... तथसद्भु वृशः॥ ... वत्सलीनतत्त्वकुन्तविनाशकाः प्रदक्षिणी । व
धरान्ध्रासि नद्धतः सज्ञायाजलदाश्च ॥ गिरिमूर्द्धनि कृष्णापि लेलाकृतिमिमूर्त्तिमान् । वृक्षदाननिवस्तु वेधं । सपवर्यात्कौ द्विज । नैव कृष्णा रूप ... ते १०२
पेश्वरगिरः लिपः लिनः॥ अकर्द्दानगतनस्मिन् गोपालश्च गतावतान् ॥ तदा गिरिमहिले श्रेष्ठ नि मस्थायाययः पुनः॥ ॥ ॐ इति श्री विष्णुपुराणे पंचमं
ते ॥ ❀ ॥ पराशर उवाच ॥ महत्प्रतिहितः शक्रो मेघयातिरूपातुतः। संवर्त्तकं नाम गणं तोयदानामिदं ब्रवीत् ॥ भो भो मेघा निशम्यैतद्वदतो वचनं मम ।
आज्ञानन्तरमेवाशु क्रियतामविचारितं ॥ नन्दगोपः सुदुर्बुद्धिर्गोपैरन्यैः सहायवान् । कृष्णाश्रय ... लाध्माता महतां मवीकयन् ॥ आज्ञां वायुः पवस्व

पो गोपत्वस्य वकारणं । नाश्यतां च स्थिरा नन्दी पीडनं च वना च मम ॥ अयमप्यद्रिशृङ्गं महत् तुर्ग मारुह्य याचं । सार्द्धं यैवः कृष्णाभिवाय ... स्या जिनी ॥
पराशर उवाच ॥ इत्याज्ञप्ताः स्म वज्रेण ममर्वु वलाहकाः। वातवर्षं महाभीमं मरुद्वायुगवाद्विज ॥ ततः क्षणेन धरणी ककुभोम्बरमभवव । एकं धारा महासार
पूरणेनाल वन्धुन ॥ विद्युल्लताकशाधात त्रस्तैरिव घनैर्घनैः । नादापूरितदिक्चक्रैर्धारासारमपात्यत । अन्धकारीकृते लोके वर्षद्भिरनिशं घनैः। अधश्चोर्ध्वं
च तिर्यक् च जगदाप्यमिवाभवत् । गावस्तु तेन पतता वर्षवातेन वगिना ॥ धूताः प्राणाञ्जहुः सन्नत्रिकजङ्घाशिरोधराः। क्रोडेन वत्सानाक्रम्य तस्थुरन्या महा
मन ॥ गावो विवत्साश्च कृता वारिपूरेण चापरा । वत्साश्च दीनवदनाः पवनाकम्पिक न्धराः ॥ त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवार्त्तकाः । ततस्तद्गोकुलं स
र्वं गोगोपीगोपसङ्कुलं । अतीवार्त्तं हरिर्दृष्ट्वा मैत्रेया चिन्तयत्तदा ॥ एतत्कृतं महेन्द्रेण मखभङ्गविरोधिना । तदेतदखिलं गोष्ठं त्रातव्यमधुना मया ॥ इम
मद्रिमहं धैर्यादुत्पाट्योरुशिलातलं । धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि ॥ ॥ पराशर उवाच ॥ इति कृत्वा मतिं कृष्णो गोवर्द्धनमहीधरं । उत्पा

ष्येकैककरेणैव धारयामास लीलया ॥ गोपांश्चाह जगन्नाथः समुत्पाटितभूधरः । विशध्वमत्र सहिताः कृतं वर्षनिवारणं । सुनिर्वातेषु देशेषु यथाजोषमि
हास्यतां । प्रविश्यतां न भेतव्यं गिरिपातस्य निर्भयैः ॥ इत्युक्तास्तेन ते गोपाः विविशुर्गोधनैः सह । शकटारोपितैर्भाण्डैर्गोप्यश्चासारपीडिताः ॥ कृष्णो
पि तं दधारैव शैलमत्यन्तनिश्चलं । व्रजैकवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः ॥ गोपगोपीजनैर्हृष्टैः प्रीतिविस्तारितेक्षणैः । संस्तूयमानचरितः कृ
ष्णः शैलमधारयत् ॥ सप्तरात्रं महामेघा ववर्षुर्नन्दगोकुले । इन्द्रेण चोदिता विप्रा गोपानां नाशकारिणः ॥ ततो धृते महाशैले परित्राते च गोकुले ।
मिथ्याप्रतिज्ञो बलभिद्वारयामास तान्घनान् ॥ व्यभ्रे नभसि देवेन्द्रे वितथात्मवचस्यथ । निष्क्रम्य गोकुलं हृष्टः स्वस्थानं पुनरागमत् ॥ मुमोच कृष्णोपि १८०
तदा गोवर्द्धनमहाचलं । स्वस्थाने विस्मितमुखैर्दृष्टस्तैस्तु व्रजौकसैः ॥ इति श्रीविष्णुपुराणे पंचमेंशे ॥ ॥ एकादशोध्यायः ॥ धृते गोवर्द्धने शैले परित्रा
ते च गोकुले । रोचयामास कृष्णस्य दर्शनं पाकशासनः ॥ सोधिरुह्य महानागमैरावतममित्रजित् । गोवर्द्धनगिरौ कृष्णं ददर्श त्रिदशाधिपः ॥ चारयन्तं

महावीर्यं गाश्च गोपवपुर्द्धरं । कृत्स्नस्य जगतो गोपं वृतं गोपकुमारकैः ॥ गरुडं च ददर्शोच्चैरन्तर्द्धानगतं द्विज । कृतच्छायं हरेर्मूर्द्धि पक्षाभ्यां पक्षिपुंगवं ॥ अ
वरुह्य स नागेन्द्रादेकान्ते मधुसूदनं । शक्रः सस्मितमाहेदं प्रीतिविस्फारितेक्षणः ॥ कृष्ण कृष्ण शृणुष्वेदं यदर्थमहमागतः । त्वत्समीपं महाबाहो नैतच्चिन्त्यं त्व
यान्यथा ॥ भारावतारणार्थाय पृथिव्याः पृथिवीतले । अवतीर्णोखिलाधार त्वमेव परमेश्वर ॥ मखभंगविरोधेन मया गोकुलनाशकाः । समादिष्टा
महामेघास्तैश्चेदं कदनं कृतं ॥ त्रातास्ताश्च त्वया गावः समुत्पाट्य महागिरिं । तेनाहं तोषितो वीर कर्म्मणात्यद्भुतेन ते ॥ साधितं कृष्ण देवानामहं मन्ये
प्रयोजनं । त्वयायमद्रिप्रवरः करेणैकेन यद्धृतः ॥ गोभिश्च प्रेरितः कृष्ण त्वत्सकाशमिहागतः । त्वया त्राताभिरत्यर्थं युष्मत्सत्कारकारणात् ॥ स त्वां
कृष्णाभिषेक्ष्यामि गवां वाक्यप्रचोदितः । उपेन्द्रत्वे गवामिन्द्रो गोविन्दस्त्वं भविष्यसि ॥ अथोपवाह्यादादाय घण्टामैरावताद्गजात् । अभिषेकं तया चक्रे
पवित्रजलपूर्णया ॥ क्रियमाणेभिषेके तु गावः कृष्णस्य तत्क्षणात् । प्रस्रवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुन्धरां ॥ अभिषिच्य गवां वाक्याद्देवेन्द्रो वै जनार्द्दनं

॥प्रीत्या सुप्रसन्नः कृष्णः पुनर्वाक्यमब्रवीत् ॥ गवामकल्याणवाक्येन यथान्यायमिहोच्यते ॥ यद्भवीमि महाभाग शैलराज महाबल । अमीमं पशवो व्याघ्र पृथिवीचरपृथि
थिवीधरः ॥ शृङ्गवतो गोवर्द्धनानाम सर्वदा सत्यसङ्गता । गावो वनानि सदा हर्षे सर्वदा रक्षितव्यानि ॥ एवमुक्त्वा महाबाहुर्यथासाम मधुसूदनः ॥ ॥श्रीभगवानुवाच ॥
ज्ञानामि शत्रून्सर्वान् शैलराज पार्थिवान् शक्तान् । कंसपाशदण्डाभियुक्तान् सम्यग्ज्ञानस्य ॥ यावन्महीतले गन्तुं समर्थो महिमां विन्दन् । न तावद्दानवान् कश्चिदपि इन्द्रयुधि
उत्सहति ॥ कंसानामग्रे महावीर दैत्यानि दुष्टकथा पनरा कंसः कुवलयापीडं नव काय्याम्कथापव ॥ तत्र पुनः यदुवंशे तु विधाय महाबाहुः शत्रुविद्रवणं सङ्ग्रामं १८
वत्सरकर्त्ता । सर्वे गच्छन्तु सन्देहं पार्थिवाः कर्तुं महसि ॥ नाहं नरस्य रिपवः कश्चित्समाजे प्रहरिष्यन्ति । अहं न चैव विहारं सर्वान् युधिष्ठिरपूर्वगमान् ॥ निहत्य रा न
मनो युद्ध कृत्वाहं वाद्यामि विक्रमान् ॥ ॥वैशम्पायन उवाच ॥ इत्युक्तः स पवित्रस्य देववराज अर्जुनं । अश्वत्थ वारि नाथ पुनश्च वदिष्यसि ॥ कृष्णापि स
हिता सेनानि गोपाः सर्वे पुनर्व्रजं । आजगाम मथुरां पीनां दृष्टिपूत नवर्मना ॥ इति श्रीविष्णुपुराणे पर्व्वणि ॥ ॥वैशम्पायन उवाच ॥ गते शक्रे कृष्णोऽपि

शाः कृष्णमक्लिष्टकारिणं । उपेत्य प्रीत्या च गोवर्द्धनावली ॥ वयमस्मान्महाभाग त्वया महता भयात् । गोविन्द रक्षिताः सर्वे विविधा वनकर्म्मणा ॥ बालक्री
डायमतुला गोपालत्वं जुगुप्सितं । कालियादमितं कृष्ण प्रलम्बादि निपातितः ॥ धृतो गोवर्द्धनः शैलः शङ्किता नित्मना निनः । सत्यं सत्यं हरेः पादौ शपामहे मि
तविक्रम । यथा त्वद्वीर्य्यमालोक्य न त्वां मन्यामहे नरं ॥ प्रीतिः स्त्रीकुमारस्य व्रजस्य तव केशव । कर्म्म चेदमशक्यं यत्समस्तैस्त्रिदशैरपि ॥ बालत्वं चातिवी
र्य्यं च जन्म चास्मास्वशोभनं । चिन्त्यमानममेयात्मन् शङ्कां कृष्ण प्रयच्छति ॥ देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा । किमस्माकं विचारेण बान्धवोऽसि नमोऽस्तु ते ॥
क्षणं भूत्वा त्वसौ तूष्णीं किञ्चित्प्रणयकोपवान् । इत्येवमुक्तः गोपैस्तु कृष्णोऽप्याह महामतिः ॥ श्रीभगवानुवाच ॥ मत्सम्बन्धेन वो गोपा यदि लज्जा न जायते । श्लाघ्यो वाहं ततः किं वा
विचारेण प्रयोजनं ॥ यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि । तदात्मबन्धुसदृशी बान्धवाः क्रियतां मयि ॥ नाहं देवो न गन्धर्वो न यक्षो न च दानवः । अहं
वो बान्धवो जातो नातश्चिन्त्यमतोऽन्यथा ॥ इति श्रुत्वा हरेर्वाक्यं बद्धमौनास्ततो वनं । ययुर्गोपा महाभाग तस्मिन्प्रणयकोपिनि ॥ कृष्णस्तु विमलं व्योम शरच्चन्द्र

स्यवञ्चिका। तथा कुमुदिनी हृष्टा गान्धादिकदिगन्तरा॥ वनवासी कथा कृष्णं गमा लालसनावरं। विलासा च सहगोपी हि मनस्य कृष्ण तित्रागि॥ मदनाम
नमथुर मतीवनिता प्रियं। गोपी कलपर्दं गो विलासमित्र कृतव्रतः॥ सर्वे गोमध्वनिश्रुत्वा प्रियस्यावसपरिकथा। आजग्मुस्त्वरिता गोपा यत्रास्ते मधुसू
दनः॥ शनैः शनैर्ययौ गोपी कश्चित्स्वस्य यानुगः॥ यस्याः वक्षनाकाचित्र गमवमनसाम्बरं॥ काचित्कृष्णं कि कृष्णं कि प्राकालङ्घामपाययौ। ययौ वका
विभ्रमाद्या न्यस्याः सुमालिनि कृता॥ काचिद्वा वसथस्यान्तः स्थिता दृष्ट्वा वहिर्गुरून्। तन्मयत्वेन गोविन्दं दध्यौ मीलितलोचना॥ तच्चिन्ता विपुलाह्लाद क्षीणपुण्य १८२
चया तथा। तदप्राप्ति महादुःखविलीनाशेषपातका॥ चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणं। निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका॥ गोपी
परिवृता रात्रिः शरच्चन्द्रमनोरमा। मानयामास गोविन्दो रासारम्भरसोत्सुकः॥ गोप्यश्च वृन्दशः कृष्णचेष्टास्वायत्तमूर्तयः। अन्यदेशगते कृष्णे चेरुर्वृन्दा
वनान्तरं॥ कृष्णेऽहमेतल्ललितं व्रजाम्यालोक्यतां गतिः। अन्या ब्रवीति कृष्णस्य मम गीतिर्निशम्यतां। दुष्टकालिय तिष्ठात्र कृष्णोऽहमिति चापरा। बाहुमास्फोट्य कृष्णस्य
ला१

लीलासर्वस्वमाददे॥ अन्या ब्रवीति भो गोपा निःशङ्कैः स्थीयतामिति। अलं वृष्टिभयेनात्र धृतो गोवर्धनो मया॥ धेनुकोऽयं मया क्षिप्तो विचरन्तु यथेच्छया। गा
वो ब्रवीति चैवान्या कृष्णलीलानुकारिणी॥ एवं नानाप्रकारासु कृष्णचेष्टासु तास्तदा। गोप्यो व्यग्राः समं चेरू रम्यं वृन्दावनं वनं॥ विलोक्यैका भुवं प्राह गोपी गोप
वराङ्गना। पुलकाञ्चितसर्वाङ्गी विकासिनयनोत्पला॥ ध्वजवज्राङ्कुशाब्जाङ्करेखावन्त्यालि पश्यत। पदान्येतानि कृष्णस्य लीलालङ्कृतगामिनः॥ कापि तेन समा
याता कृतपुण्या मदालसा। पदानि तस्याश्चैतानि घनान्यल्पतनूनि च॥ पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवं। येनाग्राक्रान्तिमात्राणि पदान्यत्र महात्मनः॥
अत्रोपविश्य सा तेन काचित्पुष्पैरलंकृता। अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितो यया॥ पुष्पबन्धनसंमानकृतमानामपास्य तां। नन्दगोपसुतो यातो मार्गेणा
नेन पश्यत॥ अनुयातैनमत्रान्या नितम्बभरमन्थरा। या गन्तव्ये द्रुतं याति निम्नपादाग्रसंस्थितिः॥ हस्तन्यस्ताग्रहस्तेयं तेन याति यथा सखि। अनायत्तपदं
न्यासा लक्ष्यते पदपद्धतिः॥ हस्तसंस्पर्शमात्रेण धूर्तेनैषा विमानिता। नैराश्यमन्दगामिन्या निवृत्तं लक्ष्यते पदं॥ नूनमुक्ता त्वरामीति पुनरेष्यामि तेऽन्तिकं

तेन कृष्णेन येनैषा त्वरिता पदपद्धतिः॥ प्रविष्टो गहनं कृष्णः पदमत्र न लक्ष्यते। निवर्तध्वं शशाङ्कस्य नैतद्दीधितिगोचरे॥ निवृत्तास्तास्ततो गोप्यो निराशाः कृष्ण-
दर्शने। यमुनातीरमागम्य जगुस्तच्चरितं तदा॥ ततो ददृशुरायान्तं विकासिमुखपङ्कजं॥ गोप्यस्त्रैलोक्यगोप्तारं कृष्णमक्लिष्टकारिणं॥ काचिदालोक्य गोवि-
न्दमायान्तमतिहर्षिता। कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदीरयन्॥ काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिं। विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजं॥ का-
चिदालोक्य गोविन्दं निमीलितविलोचना। तस्यैव रूपं ध्यायन्ती योगारूढेव सा बभौ॥ ततः काश्चित्प्रियालापैः काश्चिद्भ्रूभङ्गवीक्षितैः। निन्येऽनुनयमन्याश्च १८३
करस्पर्शेन माधवः॥ ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरं। ररास रासगोष्ठीभिरुदारचरितो हरिः॥ रासमण्डलबन्धोऽपि कृष्णपार्श्वमनुज्झता।
गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना॥ हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डले। चकार तत्करस्पर्शनिमीलितदृशं हरिः॥ ततः प्रववृते रासश्चलद्वल-
यनिस्वनः। अनुयातशरत्काव्यगेयगीतिरनुक्रमात्॥ कृष्णः शरच्चन्द्रमसं कौमुदीं कुमुदाकरं। जगौ गोपीजनस्त्वेकं कृष्णनाम पुनः पुनः॥ परिवृ-
त्ताश्रमेणैका चलद्वलयलापिनी। ददौ बाहुलतां स्कन्धे गोपी मधुनिघातिनः॥ काचित्प्रविलसद्बाहुः परिरभ्य चुचुम्ब तं। गोपी गीतस्तुतिव्याजान्निपुणा मधु-
सूदनं॥ गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ। पुलकोद्गमसस्याय स्वेदाम्बुघनतां गतौ॥ रासगेयं जगौ कृष्णो यावत्तारतरध्वनिः। साधु कृष्णेति कृ-
ष्णेति तावत्ता द्विगुणं जगुः॥ गतेऽनुगमनं चक्रुर्वलने सम्मुखं ययुः। प्रतिलोमानुलोमेन भेजुर्गोपाङ्गना हरिं॥ स तथा सह गोपीभी ररास मधुसूदनः॥
यथाब्दकोटिप्रतिमः क्षणस्तेन विनाभवत्॥ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृभिस्तथा। कृष्णं गोपाङ्गना रात्रौ रमयन्ति रतिप्रियाः॥ सोऽपि कैशो-
रकवयो मानयन्मधुसूदनः। रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः॥ तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः। आत्मस्वरूपरूपोऽसौ व्याप्य वायुरिव स्थि-
तः॥ यथा समस्तभूतेषु नभोऽग्निः पृथिवी जलं। वायुश्चात्मा तथैवासौ व्याप्य सर्वमवस्थितः॥ ॥ इति श्रीविष्णुपुराणे पञ्चमेंऽशे॥ ॥ प-
दोषार्धे कदाचित्तु रासासक्ते जनार्दने। त्रासयन्समदो गोष्ठमरिष्टः समुपागतः॥ सतोयतोयदच्छायस्तीक्ष्णशृङ्गोऽर्कलोचनः। खुर-

ग्रककुदाभागः प्रमाणाद्दुरतिक्रमः॥ विण्मूत्रलिप्तपृष्ठाङ्गो गवामुद्वेगकारकः। प्रलम्बकण्ठोभिमुखस्तरुघाताङ्किताननः॥ पातयन्स गवां गर्भान्दैत्यो
वृषभरूपधृक्। सूदयंस्तापसानुग्रो वनान्यटति यः सदा॥ ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः। गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः॥ सिंह
नादं ततश्चक्रे तलशब्दं च केशवः। तच्छब्दश्रवणाच्चासौ दामोदरमुखं ययौ॥ अग्रन्यस्तविषाणाग्रः कृष्णकुक्षिकृतेक्षणः। अभ्यधावत दुष्टात्मा येसौ वृषभ
रूपधृक्॥ आयान्तं दैत्यवृषभं दृष्ट्वा कृष्णो महाबलः। न चचाल ततः स्थानादवज्ञास्मितलीलया॥ आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः। जघान जानु १८४
ना कुक्षौ विषाणग्रहणाचलं॥ तस्य दर्पबलं हत्वा गृहीतस्य विषाणयोः। आपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरं॥ उत्पाट्य शृङ्गमेकं च तेनैवाताडयत्त
तः॥ ममार स महादैत्यो मुखाच्छोणितमुद्वमन्॥ तुष्टुवुर्निहते तस्मिन्गोपा जनार्द्दनं। प्रलम्बे निहते धृते गोवर्द्धनाचले॥ जम्भे हते सह
स्राक्षं पुरा देवगणा यथा॥ ॥ इति श्रीविष्णुपुराणे पञ्चमांशे॥ ॥ पराशर उवाच। ककुद्मिनि हते रिष्टे धेनुके विनिपातिते। प्रलम्बे निधनं नीते धृ

ते गोवर्द्धनाचले। दमिते कालिये नागे भग्ने तुङ्गद्रुमद्वये। हतायां पूतनायां च शकटे परिवर्त्तिते॥ कंसाय नारदः प्राह यथावृत्तमनुक्रमात्। यशोदादे
वकीगर्भपरिवृत्त्याद्यशेषतः॥ श्रुत्वा तत्सकलं कंसो नारदाद्देवदर्शनात्। वसुदेवं प्रति तदा कोपं चक्रे सुदुर्म्मतिः॥ सोतिकोपादुपालभ्य सर्व्वयादवसंसदि।
जगर्ह यादवांश्चापि कार्य्यं चैतदचिन्तयत्। यावन्न बलमारूढौ रामकृष्णौ सुबालकौ॥ तावदेव मया वध्यावसाध्यौ रूढयौवनौ। चाणूरोत्र महावीर्य्यो मुष्टि
कश्च महाबलः॥ एताभ्यां मल्लयुद्धेन घातयिष्यामि दुर्म्मदौ। धनुर्म्महमहायाग व्याजेनानीय तौ व्रजात्॥ तथा तथा यतिष्यामि यास्येते संक्षयं यथा। श्वफल्क
तनयं सोहमक्रूरं यदुपुङ्गवं॥ तयोरानयनार्थाय प्रेषयिष्यामि गोकुलं। वृन्दावनचरं घोरमादेक्ष्यामि च केशिनं॥ तत्रैवासावतिबलस्तावुभौ घातयिष्यति
। गजः कुवलयापीडो मत्समीपमुपागतौ॥ घातयिष्यति वा गोपौ वसुदेवसुतावुभौ॥ ॥ पराशर उवाच॥ इत्यालोच्य स दुष्टात्मा कंसो रामजनार्द्दनौ। ह
न्तुं कृतमतिर्व्वीरमक्रूरं वाक्यमब्रवीत्॥ भो भो दानपते वाक्यं क्रियतां प्रीतये मम॥ इतः स्यन्दनमारुह्य गम्यतां नन्दगोकुलं। वसुदेवसुतौ तत्र विष्णोरंशसमु

हतो॥ नागस्य किल संहृष्टो मम हृष्टः प्रवर्द्धते। धनुर्म्महो ममाप्यत्र चतुर्द्दश्यां भविष्यति॥ आनेयौ भवता गत्वा मल्लयुद्धाय तत्र तौ। चाणूरमुष्टिकौ मल्लौ
नियुद्धकुशलौ मम॥ ताभ्यां सह तयोर्युद्धं सर्व्वलोकोऽत्र पश्यतु। नागः कुवलयापीडो महामात्रप्रचोदितः॥ स वा निहन्त्यतः पापौ वसुदेवसुतौ शिशू। तौ
हत्वा वसुदेवं च नन्दगोपं च दुर्म्मतिम्॥ हनिष्ये पितरं चैवमुग्रसेनं च दुर्म्मतिम्। ततः समस्तगोपानां गोधनान्यखिलान्यहम्॥ वित्तं चापहरिष्यामि दुष्टा
नां मद्वधैषिणाम्। त्वामृते यादवाश्चैते द्विषो दानपते मम॥ एतेषां च वधायाहं प्रयतिष्याम्यनुक्रमात्। ततो निःकण्टकं सर्व्वं राज्यमेतदयादवम्॥ प्रसाधि १८३
ष्ये त्वया तस्मान्मत्प्रीत्या वीर गम्यताम्। यथा च माहिषं सर्पिर्दधि चाप्युपहार्य वै॥ गोपाः समानयन्त्याशु त्वया वाच्यास्तथा तथा॥ ॥ पराशर उवाच॥ इत्याज्ञ
प्तस्तदाक्रूरो महाभागवतो द्विज। प्रीतिमानभवत्कृष्णं श्वो द्रक्ष्यामीति सत्वरः॥ तथेत्युक्त्वा तु राजानं रथमारुह्य सत्वरः। निश्चक्राम ततः पुर्या मथुराया मधु
प्रियः॥ ॥ इति श्रीविष्णुपुराणे पञ्चमांशे॥ पराशर उवाच॥ केशी चापि बलोदग्रः कंसदूतप्रचोदितः। कृष्णस्य निधनाकाङ्क्षी वृन्दावनमुपागमत्॥

स खुरक्षतभूपृष्ठः सटाक्षेपधुताम्बुदः। द्रुतविक्रान्तचन्द्रार्कमार्गो गोपानुपागमत्॥ तस्य हेषितशब्देन गोपाला दैत्यवाजिनः। गोप्यश्च भयसंविग्ना
गोविन्दं शरणं ययुः॥ त्राहि त्राहीति गोविन्दस्तेषां श्रुत्वा ततो वचः। सतोयजलदध्वानगम्भीरमिदमुक्तवान्॥ अलं त्रासेन गोपालाः केशिनः किं भयातुरैः
। भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते॥ किमनेनाल्पसारेण हेषितारावकारिणा। दैतेयबलवाह्येन वल्गता दुष्टवाजिना॥ एह्येहि दुष्ट कृष्णो
ऽहं पूष्णस्त्विव पिनाकधृक्। पातयिष्यामि दशनान्वदनादखिलांस्तव॥ इत्युक्त्वास्फोट्य गोविन्दः केशिनः संमुखं ययौ। विवृतास्यश्च सोऽप्येनं दैतेयाश्व उपा
द्रवत्॥ बाहुमाभोगिनं कृत्वा मुखे तस्य जनार्द्दनः। प्रवेशयामास तदा केशिनो दुष्टवाजिनः॥ केशिनो वदने तेन विशता कृष्णबाहुना। शातिता दशना
पेतुः सिताभ्रावयवा इव॥ कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विज। विनाशाय यथा व्याधिरासम्भूतेरुपेक्षितः॥ विपाटितोष्ठो बहुलं सफेनं रुधिरं वमन्।
सोऽक्षिणी विवृते चक्रे विश्लिष्टे मुक्तबन्धने॥ जघान धरणीं पादैः शकृन्मूत्रं समुत्सृजन्। स्वेदार्द्रगात्रः श्रान्तश्च निर्यत्नः सोऽभवत्ततः॥ व्यादितास्यमहारौद्र

त्रु

प्राप्नुवन्कृष्णबाहुना।।निपपात द्विनारूणो ऽवयुभेन यथाद्रुमः॥ द्विपादपृष्ठपुकाद्धे ध्वनेकाद्विनाशिक।कंसिनश्च द्विश्चारू नगकलवधिवजुऽ।।रु
लाउकंसिनिकृष्णम्पदिशेभपिकेवतः।।अनायकं कृतः स्वस्का रुपं कंसे वर्षस्वि कृतः।ततो ऽप्यथपाश्व हतकं सेनिविप्तिताः।।उग्रसेनः पुत्र नीकाद
मनःभगमनावम।सूर्याशकविभाविषा नानदजलदाहितः।। केशनीनिहतं दृष्ट्वा हर्षनिर्दंबमानसः। साधु साधु जगन्नाथ लीयेव मयद्यात कः।।निरु
भार्यत्वयाकंस कृष्ण यद्धियसीकसी।युद्धात्मका किमस्यर्थ नवनवाजिमरुद्धवं।।अर्वकः यज्ञमन्यत्र दृष्टू स्वर्गादिशागताः।। स्वकर्माण्य वनावत कृतानि १८३
मधुसूदन।।यानिरो ऽपि विस्मिता वना कृष्णाभगनमंगनं।उवनगस्याम्लशकापि कृष्णदेवाश्च विस्मयं।।थकक वज्ञानम्य कृष्णाको।।वलाकिनः।पसं
त्वयेष उ हृष्टात्मा इत कंसो जनार्दनः।।तस्मात्कंसवनामात्वं लोकगेयो भविष्यसि।स्वस्यास्तुत गमिष्यामि कंसयुद्धधनापरः।।परस्य हरिसभया
मिन्वयाकंसनिसूदन।उग्रसेनसुतकंस सानुगं विनिपातितं।। ताबावताबकरोनित्वं पंविथ्याः पृथिवीधर।गत्यानकप्रकाबाणि युद्धानियं धिवी

क्षिती।।द्रष्टव्यानि मया युष्मत्प्रणीतानि जनार्दन।सार्द्धं याम्यामि देवविन्दद्वकार्य महत्करी।।त्वया परा जितश्चात्र वक्तिन मुवगाम्यहं।। ।।पवा शबवाव।।
नारदस्तु गतः कृष्णः सहगोपैर्विसिस्मितः।विवश गोकुलीनापी न तत्पानेकराजनं।। ।।इति श्रीविष्णुपुराणे पर्वमंगः।। ।।पवाश बडवाब।।अक्रूरा
पिविनिः प्राप्य स्यन्दनेनाशुगामिना।कृष्णसंदर्शनायातः प्रययौ नन्दगोकुलं।।विन्तयामास धर्मात्मा नास्ति धन्यतरो मया।यो हं समवतीर्णस्य विमुखं ब्रह्मा
मिवक्षिणः।।स्पृयनः सफलीजनमसूप्रकाशनावमनिशं।यदु निद्राक्रुपादं विष्णुब्रह्माद्यहर्षसुखं।।पापैर्हनिष्यत्यसौ मैं नं संकल्पनामयी।न ऽग्रहुयो कनयने
विष्णुब्रह्माम्यहं मुखं।।निर्ज्ञ मथ्य यतावदावदारिंभाश्च खिलानिव।ब्रह्मा मिन स्यर्ते क्षम यदवानी अवनम सुख।।यज्ञेषु यज्ञपुरुषः पुरुषेश्च परूषात्मकः।ध्येय
नयाखिलाधरं ब्रह्मामियतारात्मा।।इन्द्रध्वजमिन्द्रा यज्ञानिगतना मनवराजन।अवाप गमन कापि महर्ब्रह्मा मिकशव।।नवब्लानन्त्ररूपा ऽपि व नादि यम
अनाद्यस्य स्वरूपं ज्ञानं किं द्रष्ट्रस्य र्गाभस हतिः।।सर्वात्मा सर्ववित्सर्वः सर्वस्य च नय स्ववनकिताः।यो विप्राहस्यया याव्यापी पवहतिमयाः सह।।मत्स्यकूर्मवराहाश्च।

सिद्धरूपादिरास्थितं । चकार भगवान्यानि सा धर्मं मां न पश्यति । सा स्मृत्वं भगवत्स्वामी कार्यमारभ्य विस्थितिं ॥ कर्दमं मनुष्यतां प्राप्य स्वयं सुद्दरु भगवान्यतः ।
यानं कश्यपं पृथिवीं धृत्वा । ऐषवं स्थितिं संस्थितां ॥ सावित्री भूर्भुवः यर्थं माकृत्वा निवर्त्स्यति । पितृपूतं सद्धर्मं हस्मात्त्वन्मयीमिमां ॥ यन्मायीनां मूर्त्तिं स्वं भगवत्
स्वेन मानमः । तवस्य विधीवितनां हृदिपस्थितिं विवमिता ॥ योगी मायामयायाय तस्मै विद्यात्मने नमः । यद्वा हिरण्यपूरुषा वासुदेवस्य साक्षिणः ॥ वदान्कं व
धितिर्विष्णुर्वायुर्गयानर्त्तसिंनं । यथा तत्र भगवद्धाम्नि क्षमायोगस्य निष्ठितां ॥ सपसद्ध्नसद्ध नमस्याप्तोयानि सोम्यानां । सूत्रवा गोकुलीपाफाकिक्षितस्यवि १८१
याजति ॥ स्वांतस्य कलतकल्याणहाजनं यत्र भगवन् । पुरुषस्कंवर्जनिर्ष्वर्भगामिशव नेत्रावि ॥ ॥ पवाशतडवाच ॥ श्रुत्वैषविकायद्विष्णु तत्रितमात्ममान
पशायदर्शनदा तत्र कृष्णमादात्तनगवो ॥ वत्समक्षगतिं स्तुतानीलोत्पलनवस्कवि । प्रपष्टपद्मपत्राक्षीं श्रीवत्साङ्कितवक्षसं ॥ प्रसन्नवाहूमाखीन
माज्ञस्मकंसमन्वितं । सविलासस्मिताधारं विभ्राणं मुखपङ्कजं ॥ तुंगनकनखं पद्मौ धमन्धीमूप्रतिष्ठितं । विकाणवापसीपीतवन्यपुष्पविरूषितं ॥ सर्द्र

नीलतनातरस्कं सिताङ्काजावतिसकं । हंसवत्कुन्दधवलं निलाम्बरधवीद्दिज ॥ तस्मानुवरसरवं भदर्शयतनन्दनः । प्राप्तम हृर्गीरर्गीमहद्धिका सिमुख
पकं ॥ मघमालाप विवतीं केलासाद्रिमिवापरं ॥ सोद्वृत्ता विकसद्वक्त्रमथाजः समहामतिः । पुलका वितसर्वाङ्गिः स्कन्दा कृत्वा हरवन्मन ॥ एतत्स्तवसमीध
मतदत्तस्यसमीपदं । भगवद्दासरूपवाक्य ॥ द्विषास्थागीव्यवस्थितः ॥ सारूप्यमक्षयूगम तयत्र दुष्टभगवाम विगातमह्वेः । अथगीभमतरूगवत्त्वसादादलर्गीसगे
रूलवन्नमस्यामू ॥ अथ षट्स्थ ममरूस्तपयी कृविष्यति श्रीमदनकमू हिः । यस्याः स्नसीत्यर्ण्हमाखिलाथेन वाप्यनाशिविध नाशुदोषा ॥ यनाग्निविषूत्ववन
सिमाना कवालमयस्रमपास्यवकं । वक्रमूलादेरय पतर्हताति येष्याणीनानतियनाहेः नाति ॥ यत्रायुर्विन्यस्य वासिर्म्मनाह्मानपसा । जस्वसधानतसक ॥ व
थावमस्तित्रिदशाधिपत्यीमन्वन्तरे पूर्वमवापशक्रः ॥ अथ षमीकस्पपविग्रहेन दोषास्यदीक्षणमदाषद्दष्टं । कर्त्मनस्तीनापहतीधिगण्ड तज्जन्मनः साधूव
द्धिरूणा यः ॥ स्नानात्मकस्यामलमस्त्ववासीग्रूपतथा षयस्सदा हृदस्य । किन्नाजगस्यत्रसमस्तपूसा मन्नाकमन्यास्थ्य हृदिस्थितस्य ॥ तस्मादहं तक्किविन

स्थि

मथुरां व्रजामि सर्व्वेश्वरमीश्वराणाम्। अंशावतारं पुरुषोत्तमस्य अनादिमध्यान्तमर्त्यस्य विष्णोः॥ ॥ इति श्रीविष्णुपर्व्वणि पञ्चमेंशे ॥ पञ्चदशोऽध्यायः ॥ वि
नरवन्निनिगमविन्दमुपगम्य सयादवः। अक्रूरः प्राप्तिविवर्णो नमामि शिरसा दवः॥ सोप्यन्तः श्वफल्कात्मजः कृतविघ्नतपानिना। संस्पृश्य कृष्णप्रीत्यावस्
गारुडपविषस्वजः॥ कृतमसमदनोतयथावद्वसकेशवौ। ततः प्रविष्टौ संहृष्टौ तमादाय स्वमन्दिरं॥ सहृतात्यानदाकूवकृतसम्बदनादिकः। उक्तरा
श्यायथान्याय मावबद्दोततस्कयाः। यथा निर्भर्त्सितस्तेन कंसनानकदुन्दुभिः। यथा च वधवकीद वीयानवनद्दात्मना॥ उग्रसेनयथा कंसः सदुरात्मा १८८
ववर्ज्जितः। यथैवार्थ समुद्दिश्य कंसेन च विसर्ज्जितः॥ तत्सर्वं विस्तरात्छुत्वा भगवान्केशिसूदनः। उवाचाखिलमप्येतन्मुक्तं त्वादानपते मया॥ करिष्यते मः
समागप्रथदत्रापयिकंमतम्। विचिन्त्यं नान्यथैतत्तु विद्धि कंसहतं मया॥ अहं रामश्च मथुरां श्वो यास्यावः समं त्वया। गोपवृद्धाश्च यास्यन्ति आदायोप
यनंबहु॥ निशेयं नीयतां वीर न चिन्तां कर्त्तुमर्हसि। त्रिरात्राभ्यन्तरे कंसं हनिष्यामि सहानुगम्॥ ॥ पञ्चाशत्तमोऽध्यायः॥ समादिश्य ततो गोपानक्रूरो

पिनकेशवः। सुष्वाप बलभद्रश्च नन्दगोपगृहे ततः॥ ततः प्रभाते विमले रामकृष्णौ महाबलौ। अक्रूरेण समं गन्तुमुद्यतौ मथुरां पुरीम्॥ दृष्ट्वा गोपीजनः
सास्रः श्लथद्वलयबाहुकः। निश्वसंश्च ति दुःखार्त्तः प्राह चेदं परस्परं॥ मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नागरस्त्रीकलालाप मधुश्रोत्रेण
पास्यति। विलासिवाक्यजालेषु नागरीणां कृतास्पदं॥ चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति। सारं समस्तगोष्ठस्य विधिना हरता हरिं॥ प्रहृतं गोप
यापितस्तु निर्घृणेन दुरात्मना। भावगर्भस्मितं वाक्यं विलासललिता गतिः॥ नागरीणामतीवैतत्कटाक्षेक्षितमेव च। ग्राम्यो हरिरयं तासां विलासनिग
लैर्युतः॥ भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति। एषैष रथमारुह्य मथुरां याति केशवः॥ क्रूरेणाक्रूरकेनापि निराशेन प्रतारितः। किं न वेत्ति नृशं
सायमनुरागपरं जनम्॥ येन मस्माकं नाह्लादं नयनानन्दनं हरिं। एष रामेण सहितः प्रयात्यत्यन्तनिर्घृणः॥ रथमारुह्य गोविन्दस्त्वर्य्यतामस्य वारणे
। गुरूणामग्रतो वक्तुं किं ब्रवीमि न नः क्षमं॥ गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना। नन्दगोपमुखा गोपा गन्तुमेते समुद्यताः॥ नोद्यमं कुरुते कश्चित्

गोविन्दविनिवर्त्तन ।सुप्रभाताद्य रजनी मथुरावासियोषिता ॥ यास्यस्यच्युतवक्त्राङ्कं यासां नेत्रालिराग्यमी। धन्याक्ष पथि य कृष्णमितो यान्तमवारिताः॥
उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितं। मथुरानगरीपौरनयनानां महोत्सवः। गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति॥ प्रानस्वप्नोऽयं रात्र्यामि हि दृष्टस्ताहि
वक्षदरुं। विस्माविमाकनयना याभकन्यनिवाविनि ॥ अस्मत्गोपीजनस्यास्य दर्शयिष्यामहानिधिं। उत्कण्ठ्यानत्र नतानि विधात्राकृतशोभना॥ अनूनागेन
शेषघिल्ग्यमस्मास्वकजनाद्दवः। शैघिस्यमपयान्त्याशु कतषूवलयान्यपि॥ अक्रूरः कृष्णहृदयः श्रीपुण्ड्रनयनात्दयान्। नवमारुसियाषितस् हूर्णकस्यनजा १८
यत। हृदृकृष्णस्य पश्चाश्चि श्वक्रमन् निवीक्ष्णी॥ दूनीकृतादविर्यनसापिमणूर्न्दृम्यन। प्राप्तामङ्गाङ्कसमये वाग्राकूतनजनार्दनाः॥ अदृष्टकृष्णमकूलाद
वस्यागावदास्यमी। यावत्कृष्णामिकालिन्द्यामाह्निकार्हस मस्मापि॥ तस्यस्युकृतमस्नानः स्वावाकः स्वमहामतिः। दध्यौ ब्रह्मपदं विप्र प्राविश्य गमनागलं॥
हलासरुद्ममालाङ्गीवपरदेहदर्शनः। कृत्वामलाग्रीमुखिद्वपद्मपत्रावृत्तेक्षणं॥ तत्रैवामृकिनस्याथ मरुकृष्णपवनात्मिनः। संस्तूयमानस्वर्गविदन

मालाविहृषितं॥ ददर्श नमास्तिनवक्त्रवाचरूपावतंसकं। चारुकुण्डलिनीमस्त्रुमन्मकर्ज्जलतल्लसित्कितं॥ तस्योत्सङ्गे घनश्याममातामायतलोचनं। चतुर्बाहुमुदारा
ङ्गं चक्राद्यायुधभूषणं॥ पीनवस्त्रानिवसनं चित्रमाल्यविभूषणं। शक्रचापतडिन्माला विचित्रमिवतोयदं॥ श्रीवत्सवक्षसं चारुकेयूरमुकुटोज्ज्वलं। ददर्शकृ
ष्णमक्लिष्टपुण्डरीकावतंसकं॥ सनन्दनाद्यैर्मुनिभिः सिद्धियोगैरकल्मषैः। संचिन्त्यमानं तत्रस्थं नासाग्रन्यस्तलोचनैः॥ बलकृष्णौ तदाक्रूरः प्रत्यभिज्ञाय
विस्मितः। सुविन्कवदद्य शीघ्रं कथमत्रागताविति॥ विवक्षोः स्तम्भयामास वाचं तस्य जनार्दनः। ततो निष्क्रम्य सलिलाद्रथमभ्यागतः पुनः॥ ददर्शतत्रै
वोभौ रथस्योपरि विष्ठितौ। रामकृष्णौ यथापूर्व्वं मनुष्यवपुषान्वितौ॥ निमग्नश्च पुनस्तोये ददृशे स तथैव तौ। संस्तूयमानौ गन्धर्वमुनिसिद्धमहोरगैः॥
ततो विज्ञायतद्भावं सखदानपतिस्तदा। तुष्टाव सर्व्वविज्ञानमयमच्युतमीश्वरं॥ ॥अक्रूर उवाच॥ सन्मात्ररूपिणेऽचिन्त्यमहिम्ने परमात्मने। व्यापिने नैक
रूपैकस्वरूपायनमोनमः। सत्वरूपायत चिन्त्यरूपविर्हाताय ते नमः॥ नमो विज्ञपयपावास्य पराय प्रकृतेः परः। भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवा

न॥ अत्रास्मात्परमात्मावलम्बकः परः श्रीशः स्थितः। प्रसीद सर्वसत्वात्मन् देवादेवमयव्ययः॥ ब्रह्मविष्णुशिवाद्याभिः कल्पनाभिरुदीरितः॥ अनाद्यपरस्वरूपात्म
न्नाद्यपरप्रयोजन॥ अनाद्यपाभिधानत्वान्नाभिप्रवमभ्यवे। न यत्र नाथ विद्यन्ते नामजात्यादिकल्पनाः॥ तद्ब्रह्म परमं नित्यमविकारि भवानजे। न
कल्पनामृते यस्य सर्वस्याधिगमो यतः॥ ततः कृष्णाच्युतानन्त विष्णुनामभिरीड्यसे॥ सर्वार्थस्त्वमज विकल्पनाभिरेभिर्देवाद्यं जगदखिलं त्वमेव विश्वः॥ वि
श्वात्मंस्त्वमिति विकारभावहीनं सर्वस्मिन्न हि भवतोऽस्ति किञ्चिदन्यत्॥ त्वं ब्रह्मा पशुपतिरर्यमा विधाता त्वं विष्णुस्त्रिदशपतिः समीरणोऽग्निः॥ तोयेशो धन १९०
पतिरन्तकस्त्वमेको भिन्नार्थैर्जगदपि पासि शक्तिभेदैः॥ विश्वं भवान् सृजति पाति गभस्तिरूपो विश्वं च ते गुणमयोऽयमज प्रपञ्चः। रूपं परं सदिति वा
चकमक्षरं यज्ज्ञानात्मने सदसते प्रणतोऽस्मि तस्मै॥ ॐ नमो वासुदेवाय नमः सङ्कर्षणाय च। प्रद्युम्नाय नमस्तुभ्यमनिरुद्धाय ते नमः॥ ॥ पराशर उ
वाच॥ एवं संकीर्तितः कृष्णो मनसा भूतपावनः॥ अर्चयामास सर्वेशं धूपपुष्पैर्मनोमयैः॥ परित्यज्यान्यविषयं मनस्तत्र निवेश्य सः। ब्रह्मभूतमविरतं स्थितोऽभवत्

बनाम समाधिना॥ कृतकृत्यमिवात्मानं मन्यमानो महामतिः। आजगाम मथुरां रथ्याश्च निर्मिथ्यामसो महोदयः॥ रामकृष्णौ वदत्वेग यथा पूर्वं नव स्थितौ॥ वि
स्मितावदकृदा कृष्ण फल्गुरुद्धवाधयोः निमिषितः॥ नूनमद्य हृष्टमाश्चर्यं मया कृष्ण यमुनाजले। विस्मितात्मेक्षलनयनो भवान् संलक्ष्यते यतः॥ ॥ अक्रूर उवाच॥
अन्तर्जले यदाश्चर्यं दृष्टं तत्र मयाच्युत। स यत्रैव हि पश्यामि मूर्तिमत्पुरतः स्थितम्॥ जगदेतन्महाश्चर्यं रूपं यस्य महात्मनः। तेनाश्चर्यपरेणाहं भवता
कृष्ण सङ्गतः॥ तत्किमेतेन मथुरां प्रयामो मधुसूदन। बिभेमि कंसाद्धिग्जन्म परपिण्डोपजीविनाम्॥ ॥ पराशर उवाच॥ इत्युक्त्वा चोदयामास तान्हया
न्वातरंहसः। सम्प्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरां पुरीम्॥ विलोक्य मथुरां कृष्णं रामं चाह स यादवः। पद्भ्यां यातं महावीर्यौ रथेनैको विशाम्यहम्॥ गन्तव्यं
वसुदेवस्य सकृद्भवद्भ्यां निवेशनम्॥ ॥ पराशर उवाच॥ इत्युक्त्वा प्रविवेशाथ सोऽक्रूरो मथुरां पुरीम्। प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ॥ स्त्रीभिर्नरैश्च सान
न्दलोचनैरभिवीक्षितौ। जग्मतुर्लीलया वीरौ प्राप्तौ बालगजाविव॥ भ्रममाणौ तु तौ दृष्ट्वा रजकं रङ्गकारकम्। अयाचेतां सुरूपाणि वासांसि रुचिराणि तौ॥

कीपस्यवउकः साथप्रसादा दुरु विस्मयः । वक्तून्याद्वपवाक्या नि पूजाश्चे नामकृशवो ॥ तनस्कनुप्रकानृणकृष्णुस्कस्यद्नासनः । पानयामासकापनन्तउ
कास्यनिनानुवि ॥ नीलाचायदववक्षानि पीतनीलाम्बरो तनः । कृष्णुवाभोमृदायूको मालाकावस्रहिगतो ॥ विद्यांशद्यूतन्नामालाकानां तिचिस्मितः ।
वक्रो कस्यकृनावमो भेजयाविन्दयरुगः ॥ पीतनीलाम्ब वधनो दृष्ट्वा तिमनादृनो । सत्कान्यामास्तनदाउवंदवामूपागतो ॥ विकानिमुखपद्मास्यी
गास्यापृष्पाणियाविनः । उवंविकृस्यहृलास्यी पस्यमेनिवसामहीवं । प्रसादपनमो नाथे ममगरुमूपागतो । धन्यदमवंविषामी स्याद्नो मास्यउगे १८१
वनः ॥ ततःप्रहृष्टवयनस्कृयाः पृष्पाणिकामतः । वानुन्येनान्यथे तानिप्रयदौसविलासयान् ॥ पूनःपूनःप्रणम्याशो मालाकावानवान्कृमो । ददौपु
ष्पाणि वानूनि गन्धवन्त्यमलानि व ॥ मालाकाराय कृष्णोपि प्रसन्नःप्रददौ वरं । श्रीस्त्वांमत्संश्रयाभद्र नकदा विहास्यति ॥ बलहानिर्नते सौम्य धन
हानिस्तथैव च । यावद्दिनानि तावच्च न नाशिष्यति संततिः ॥ भुक्त्वा च विपुलान्भोगांस्त्वमन्ते मत्प्रसादजं । ममानुस्मरणं प्राप्य दिव्यं लोकमवाप्स्यसि ॥ ध

र्ममनश्चतस्त्व सर्वकालं भविष्यति । युष्मत्संततिजातानां दीर्घमायुर्भविष्यति ॥ नोपसर्गादिकं दोषं युष्मत्संततिसंभवः । संप्राप्स्यति महाभाग यावत्सू
र्यो भविष्यति ॥ ॥ पराशर उवाच ॥ इत्युक्त्वा तद्गृहात्कृष्णो बलदेवसहायवान् । निर्जगाम मुनिश्रेष्ठ मालाकारेण पूजितः ॥ इति श्रीविष्णुपुराणे पञ्चमे
ंशे ॥ ॥ पराशर उवाच ॥ राजमार्गे ततः कृष्णः सानुलेपनभाजनाम् । ददर्श कुब्जामायान्तीं नवयौवनगोचराम् ॥ तामाह ललितं कृष्णः कस्येदमनुलेप
नं । भवत्या नीयते सत्यं वदेन्दीवरलोचने ॥ सकाममिव सा प्रोक्ता सानुरागा हरिं प्रति । प्राह सा ललितं कुब्जा तद्दर्शनबलात्कृता ॥ कान्त कस्मान्न जानासि कंसेनापि नियोजिताम् । नैकवक्रेति विख्यातामनुलेपनकर्मणि ॥ नान्यापिष्टं हि कंसस्य प्रीतये यदनुलेपनं । भवत्यहमतीवास्य प्रसादधनभाजना ॥
श्रीकृष्ण उवाच ॥ सुगन्धमेतद्राजार्हं रुचिरं रुचिराननं । आवयोर्गात्रसदृशं दीयतामनुलेपनं ॥ ॥ पराशर उवाच ॥ श्रुत्वा तमाह सा कृष्णं गृह्यतामि
ति सादरं । अनुलेपनं च प्रददौ गात्रयोग्यमथोभयोः ॥ भक्तिच्छेदानुलिप्ताङ्गौ ततस्तौ पुरुषर्षभौ । सेन्द्रचापौ व्यराजेतां सितकृष्णाविवाम्बुदौ ॥

गतस्त्रौ विवृकलोत्विवृलापनविभ्रनवित् । उल्लाप्य गालनामास ह्युग्रसेनात्मपाणिना ॥ बकर्षपस्त्याकनदा महत्विकमधनयत् । कंसः पामहतीखफायापि
गामसत वद्धवी ॥ विलासमतलितंपाद प्रभगस्तुगवालदी । वसुप्रस्त्याप्त विन्दीखुरागहुंममभगिवं ॥ आयाध्यसवत्ती गरुमिनितीपरसन्धविः । विसमर्जग
दासाश्चेवामस्यासाञ्चवानने ॥ रुक्किस्तदानुलिफोगभपीमनीलाम्बरोरुतो । धनुःसलितमायातो विश्वमास्थापयोहिती ॥ आयागवनवत्ता नितान्ती
रुष्टपुष्टवक्षिकिः । आत्यारस्तस्रात्कषाम्रदान्वापूरवयन्धनूः ॥ कंसस्तुवयमाभनरुश्चमानविलाद्धनूः । बकायानिमरुश्चध्वमथवाथनपूविता ॥ अनरुकी १९२
ततस्रौरुतलन्धनूर्विवक्षिकितिः । वक्षिगेन्धीनिवृत्यासौ निष्क्रान्तौ कार्मुकालयात् ॥ अक्रूरागमवृत्तान्तमुपलभ्य तथा हरनः । कंसोऽप्यथ तथैसापि प्राह चाणूर
मुष्टिकौ ॥ ॥कंस उवाच ॥ गोपालदारकौ प्राप्तौ भवद्भ्यां मम जीवितम् । मल्लयुद्धे निहन्तव्यौ मम प्राणहरौ हि तौ ॥ नियुद्धे तद्विनाशेन भवद्भ्यां तोषि
तोऽस्म्यहं । यास्याम्यतिमतान्कामान् नान्यथैतन्महाबलौ ॥ न्यायतोऽन्यायतो वापि भवद्भ्यां तौ ममाहितौ । हन्तव्यौ तद्वधाद्राज्यं सामान्यं वां भविष्यति ॥

कृत्यादिग्धश्च तौ मल्लौ नगश्चाहृत्यरुस्किपं । प्राबाबाध्वेल्पामल्लसवागन्धावितिर्जरः ॥ कल्यः कुवलयापीडश्च हन्तवीगमपदानकौ । घातनीयो नियुद्धा १९३
यवगेन्द्रानमूपागतौ ॥ गमप्यामृष्यदृष्ट्वा वसं कंसः नसम्बन्धिनूपाहतान् । असन्नमरणं कंसः सूर्योदयमुदीक्षत ॥ ततः समस्तमंचेषु नागरः स तदा जनः ।
राजमंचेषु चारूढाः सह भृत्यैर्महीभृतः ॥ मल्लप्राश्निकवर्गश्च रंगमध्यसमीपगः । कृतः कंसेन कंसोऽपि तुंगमंचे व्यवस्थितः ॥ अन्तःपुराणां मंचाश्च त
थान्ये परिकल्पिताः । अन्ये च वारमुख्यानामन्ये नागरयोषितां ॥ नन्दगोपादयो गोपा मंचेष्वन्येष्ववस्थिताः । अक्रूरवसुदेवौ च मंचप्रान्ते व्यवस्थितौ ॥ न
गरीयोषितां मध्ये देवकी पुत्रगर्द्धिनी । अन्तःकालेऽपि पुत्रस्य द्रक्ष्यामिवृविवंमुखं ॥ वाद्यमानेषु तूर्येषु चाणूरे चातिवल्गति । हाहाकारपरे लोके आस्फोटयति
मुष्टिके । हत्वा कुवलयापीडं हस्त्यारोहप्रचोदितं ॥ मदासृगनुलिप्तौ च गजदन्तवरायुधौ । मृगमध्ये यथा सिंहौ गर्वलीलावलोकिनौ ॥ प्रविष्टौ सुम
हारंगं बलभद्रजनार्दनौ । हाहाकारो महान्यातो सर्वरंगेषु वक्ता ॥ कृष्णोऽयं बलभद्रोऽयमिति लोकस्य विस्मयात् । सोऽयं येन हता घोरा पूतना सा निश॥
रुनादैत्रौ।

वन्॥क्लिष्टतृणकटयनरुक्मौवयमलार्जुनौ।घातयन्कालियनागंनर्तकोवृन्दावनवासकः॥धृता।जेमवर्द्धनाख्यनखेनात्रमहागिरिः॥अनिष्टाधेनुकःक
शीलीलयैवमहात्मना।निहत्यनदद्दैत्यंहन्यमानोस्यायमस्मनः॥अथैवायमहावाहुर्बलरुद्रप्रजायत॥प्रयातिलीलयायाषिन्मनानयनन्दनः॥
अथैसकथमप्राहःपूतनामयावसाकिशिः।जेपालायादर्वंवंशीमन्नमत्सद्धविस्थिति॥अथैसमर्वहृतपृष्ठविष्णुप्रसिद्धरूमनः॥अवनीभूमिहीमैं
जेमनूर्नीलानन्दनाज्जवः॥ॐपद्यविश्लिष्टपोतेयामञ्जुष्ठवनपदृसभग॥उनस्तनापदवक्षास्वरुस्तनपयोधरं।मञ्जलवमिवालाय्यपूतनाननविलोक १९४
नी॥यैववक्षस्वदवक्त्रहिंद्रायास्यागनाजवीं।विस्फारितक्षियुगलानाजाकःपूतनाषिनी।नगजाज्ञीसमुदुश्यडदृनविरयामत।सख्यःपश्यतकृष्ण
स्यमूखमस्यनूणेहनी।नन्दपुत्रःकायायासस्वदायुकालकाविनी।विकालेशनदष्टामवन्ध्यायकलाल्हिनी।पाविस्तसाक्रिंजनमसद्दनीक्रियनीदिनः॥
श्रीवत्साकिंगगञ्जामवालसौमत्विलाल्मनी।विपदकृपणैवन्दाउजयुग्मश्वरीविनि॥किन्नपश्यसिमुग्धेन्दुमनोलघवलाननं।वलरुद्रमिमीनील:

पनिश्चमनमूपागतं॥वर्गनामष्टिकनैर्व्रानुस्वनमथमयिष्ठि।क्रियनवलरूप्रस्यमूरवमीरवद्विसाती॥सख्यःपश्यतवानून्वनियुद्धार्थमयदेविः॥समुपैति
नसंप्रेत्रकिंवृन्धायुद्धकाविनः॥ज्ञोयौवनास्मूरवीरूहनःसकुमारकनूदेविः॥ह्ववज्रकावनालागः॥नवीद्वार्यीमहासनः॥ॐभीमसन्निलमौनजैवर्द्धितनवयी
वनी॥देश्ययमल्लयानूवप्रमुखास्त्वतिदारुणाः॥नियुद्धप्राश्निकानानुमहानषष्वाभिक्रमः॥यद्धालवलिनार्येद्धमध्यश्चेःसमुपदृन॥ ॥पद्मागवउवा
वा॥ॐद्वैपवस्ताललोकस्यवुद्यनश्चलयकुर्व।ववल्गावद्धरूषास्किऊंतस्यतगवान्दविभ्र॥वलरुद्राप्रिवासहघववल्गलविनीयदा।पदपदगदाहामिर्भूमी
भ्रयलुदङ्गुता।वानुवनगतवकृष्णा।युयुध्वसितविक्रमः॥नियुद्धकुशलादेयावलदवनमष्टिकः॥सविपातावधूतेश्ववानूसनपमेहविः।कपनेर्म
हितिश्चैवकालवङ्क्रनिपातनेः॥पादाङ्गुतैःप्रसष्ठाक्षिःनयार्युद्धमवृत्सदत॥अगच्छमनिध्यारफुनयार्द्धसदानुणं।स्ववलप्राणनिषाद्यीसमाजास्य
वमन्निधे॥यावद्यावद्ववानूनायुयुधेदविशमद्वप्रागतानिंवापाग्रंगावरलावलवासवं॥कृष्णापियुयुधेनलीलयैवजगन्मयः॥खदाद्वालयनः
नि। गं।

णा। पा॥ निजश्लेषेन कंसो॥ बलदेवो विरुद्धस्य दृष्ट्वा चाणूरकृष्णयोः॥ बाधयामास हर्षयानि कंसः कोपपरायणः॥ मृदंगादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात्
। खे संगतान्यवाद्यन्त देवतूर्याण्यनेकशः॥ जय गोविन्द चाणूरं जहि केशव दानवं। अन्तर्द्धानगता देवास्तमूचुरतिहर्षिताः॥ चाणूरेण चिरं कालं क्रीडि-
त्वा मधुसूदनः॥ उत्पाट्य भ्रामयामास तद्वधाय कृतोद्यमः॥ भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित्। भूमावास्फोटयामास गगने गतजीवितं॥ भूमाव-
स्फोटितस्तेन चाणूरः शतधा व्रजन्। रक्तस्रावमहापंकां चकार स तदा भुवं॥ बलदेवोपि तत्कालं मुष्टिकेन महाबलः॥ युयुधे दैत्यमल्लेन चाणूरेण यथा १२४
हरिः॥ सोप्येनं मुष्टिना मूर्द्ध्नि वक्षस्याहत्य जानुना॥ पातयित्वा धरापृष्ठे निष्पिपेष गतायुषं। कृष्णस्तोषलकं भूयो मल्लराजं महाबलः॥ वाममुष्टिप्र-
हारेण पातयामास भूतले। चाणूरे निहते मल्ले मुष्टिके विनिपातिते। नीते क्षयं तोषलके सर्व्वमल्लाः प्रदुद्रुवुः॥ ववल्गतुस्ततो रंगे कृष्णसंकर्षणावु-
भौ॥ समानवयसो गोपान् बलादाकृष्य हर्षितौ। कंसोपि कोपरक्ताक्षः प्राहोच्चैर्व्यायतान्नरान्॥ गोपावेतौ समाजौघान् निष्क्राम्येतां बलादितः॥ नन्दो-

म

पि गृह्यतां गोपो निगलैरायसैरिह॥ अवृद्धार्हेण दण्डेन वसुदेवोपि वध्यतां। वल्गन्ति गोपाः कृष्णेन ये चेमे सहिताः पुनः॥ उत्पत्यारुह्य तं मंचं कंसं
जग्राह वेगितः॥ केशेष्वाकृष्य विगलत्किरीटमवनीतले॥ कंसं संपातयामास तस्योपरि निपपात च। निःशेषजगदाधारगुरुणा पततोपरि॥ कृष्णेन त्या-
जितः प्राणानुग्रसेनात्मजो नृपः॥ मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः॥ विकर्षदेहं कंसस्य रंगमध्ये महाबलः। गौरवेणातिमहता परिखा तेन
कृष्यता॥ कृता कंसस्य देहेन तद्भ्राताभ्यागतो रुषा। सुनामा बलभद्रेण। लीलयैव निपातितः॥ ततो हाहाकृतं सर्व्वमासीत्तद्रंगमण्डलं। अवज्ञया हत-
तं दृष्ट्वा कृष्णेन मथुरेश्वरं॥ कृष्णोपि वसुदेवस्य पादौ जग्राह सत्वरं। देवक्याश्च महाबाहुर्बलदेवसहायवान्॥ उत्थाप्य वसुदेवस्तु देवकी च जनार्दनं।
स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ॥ ॥वसुदेव उवाच॥ प्रसीद सीदतां देव देवानां प्रवरः प्रभो॥ तथावयोः प्रसादेन कृतोद्धारक केशव॥ आरा-
धितो यद्भगवानवतीर्णो गृहे मम। दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलं॥ त्वमन्तः सर्व्वभूतानां सर्व्वभूतेष्ववस्थितः। प्रवर्त्तते समस्तात्मंस्त्वत्तो भूत

रुविष्यति॥यत्रं त्वमिथ्यप्रत्यक्षं सर्व्वं दृश्यमयाव्ययं। त्वं भवपञ्चाय प्रभव यन्नीप नमस्थ्व ॥सापन्नवीममममना यदनन्त्वयिज्ञायत। देवक्या अत्मजप्रीत्या न
दत्यक्तविलम्बना॥ कल्पसर्व्वस्य मानोंमनादिनिधनात्मवान् ॥कमममनुष्यसन्त्यादि जिह्वापुत्रा निवत्य ति॥जगदनजगन्नाथसंहृतमखिलीयतः॥कया
युक्त्या विनामायासोऽस्मत्कुः सिरुविष्यति॥यस्मिन्प्रतिष्ठितं सर्व्वं जगत्स्थवरजङ्गमं॥प्रत्काष्ठात्मीगर्भयना मनुष्याकृत्याय नकथं॥प्रसीदप्रसीद परमेश्वरप
रिविश्वंस्मावना नकवलेन्नमममाप्रिपुत्रः॥आब्रह्मपादपमयं जगदननीशत्वद्विमोहयसि किं परमेश्वरात्मन्॥मायाविमोहितदृशा तनयो ममेति १८३
ति कंसाद्भयं कृतमपास्तभयातितीव्रं।नीतोसिगोकुलमरातिरयान्कुलस्य वृद्धिङ्गतो सि मम वासिममत्वमीश॥कर्म्माणिरुद्रमरुदश्विशतक्रतूना साध्या
नि यानि न रुवीति निरीक्षितानि।त्वं विष्णुरीशमुपकारकदेना प्राप्तासि नः परिगतं विगतोहि मोहः॥इति श्रीविष्णुपुराणे पञ्चमेंऽशे॥ ॥पराशर उवाच
॥तौ समत्पन्नविज्ञानौ भगवत्कर्म्मदर्शनात्।देवकीवसुदेवौ च दृष्ट्वा मायां पुनर्हरिः॥मोहाय यदुचक्रस्य विततान स वैष्णवीम्॥उवाच चाम्ब तातेति

बाद्युत्कण्ठितेन च॥भवन्तौ कंसतो न नदृष्टौ संकर्षणेन च।कुर्वता याति यः कालो मातापित्रोरपूजनं॥तत्खण्डमायुषो व्यर्थं साधनामपयाति वै।गुरुदेव
द्विजातीनामिदं सर्व्वमतिक्रमतितः॥कंस वीर्यप्रतापाभ्यामावयोः परवश्ययोः॥ ॥पराशर उवाच॥इत्युक्त्वाथ प्रणम्यासौ यदुवृद्धाननुक्रमात्।यथावद
भिपूज्याथ चक्रतुः पौरवासिनां॥कंसपत्न्यस्ततः कंसं परिवार्य हतं भुवि।विलेपुर्मातरश्चास्य दुःखशोकपरिप्लुता॥बहुप्रकारमस्वस्थः पश्चात्ता
पातुरो हरिः।तः समाश्वासयामास स्वयमश्राविलेक्षणः॥उग्रसेनन्ततो बन्धान्मुमोच मधुसूदनः।अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मजं॥राज्येऽभि
षिक्तः कृष्णेन यदुसिंहसुतस्य वैः।चकार प्रेतकार्याणि ये चान्ये तत्र घातिताः॥कृतोर्द्धदैहिकं चैनं सिंहासनगतं हरिः।उवाच चाज्ञापय विशङ्क
र्यमविशङ्कया॥यायातिशापाद्वंशोयमराज्यार्होसि सान्प्रतं।मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः॥इत्युक्त्वा सोऽस्मरद्वायुमागच्छ मम पार्श्वतः
न।उवाच चैनं भगवान् केशवः कार्यमानुषः॥गच्छेन्द्रं ब्रूहि वायो त्वमलं सर्व्वेण वासव।दीयतामुग्रसेनाय सुधर्म्मा भवता सभा॥कृष्णो ब्रवीति राजा

आर्द्रं मनद्रुतमनुत्तमं। सुधर्म्माख्यां सभां युक्तमस्यां यदुभिराहितुं॥ ॥पराशर उवाच॥ इत्युक्तः पवनागत्य सर्व्वमाहुर्व्वीपतिं। यदोः सापि सुधर्म्मा
ख्यां सर्वावाधाः पुरन्दरः॥ वायुना चाहृतां दिव्यां सभां सौ यदुपुंगवाः। वुभुजुः सर्व्वरत्नाढ्यां गोविन्दभुजसंश्रयाः॥ विदिताखिलविज्ञानौ सर्व्वज्ञानम
यावपि। शिष्याचार्य्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ॥ ततः सान्दीपनिं काश्यमवन्तिपुरवासिनं। अस्त्रार्थं जग्मतुर्वीरौ वलदेवजनार्द्दनौ॥ तस्य शिष्यत्व
मभ्येत्य गुरुवृत्तिपरौ हि तौ। दर्शनाञ्चक्रतुर्वीरावाचारमखिले जने॥ सरहस्यं धनुर्व्वेदं ससङ्ग्रहमधीयतां। अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विज॥ १९६
सान्दीपनिरसम्भाव्यं तयोः कर्म्मातिमानुषं। विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ॥ अस्त्रग्राममशेषं च प्रोक्तमात्रमवाप्य तौ। ऊचतुर्व्व्रियतां या
भवतो गुरुदक्षिणा॥ सोप्यतीन्द्रियमालोक्य तयोः कर्म्म महामतिः। अयाचत मृतं पुत्रं प्रभासे लवणार्णवे॥ गृहीतास्त्रौ ततस्तौ तु सार्घपात्रो
महोदधिः। उवाच न मया पुत्रो हृतः सान्दीपनेरिति॥ दैत्यः पञ्चजनो नाम शङ्खरूपः स वालकं। जग्राह योस्ति सलिले ममैवासुरसूदन॥ इत्युक्तो

न्तर्जलं गत्वा हत्वा पञ्चजनं च तं। कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमं॥ यस्य नादेन दैत्यानां वलहानिरजायत। देवानां ववृधे तेजो यात्यधर्म्मश्च संक्षयं॥ तं
पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः। वलदेवश्च वलवान् जित्वा वैवस्वतं यमं॥ तं वालं यातनासंस्थं यथापूर्व्वशरीरिणं। पित्रे प्रदत्तवान् कृष्णो वलश्च वलि
नां वरः। मथुरां च पुनः प्राप्तावुग्रसेनेन पालितां॥ प्रहृष्टपुरुषस्त्रीकामुभौ रामजनार्द्दनौ॥ इति श्रीविष्णुपुराणे पञ्चमांशे॥ ॥पराशर उवाच॥
जरासन्धसुते कंस उपयेमे महावलः। अस्तिं प्राप्तिं च मैत्रेय तयोर्भर्त्तारमाहवे॥ महावलपरीवारो मगधाधिपतिर्व्वली। हन्तुमभ्याययौ कोपाज्जरास
न्धः सयादवौ॥ उपेत्य मथुरां सोथ रुरोध मगधेश्वरः। अक्षौहिणीभिः सैन्यस्य त्रयोविंशतिभिर्वृतः॥ निष्क्रम्याल्पपरीवारावुभौ रामजनार्द्दनौ। युयुधा
ते समं तस्य वलिनौ वलसैनिकैः॥ ततो रामश्च कृष्णश्च मतिं चक्रे महावलौ। आयुधानां पुराणानामादाने मुनिसत्तम॥ अनन्तरं हरेः शार्ङ्गं तूणौ चा
क्षयसायकौ। आकाशादागतौ विप्र तथा कौमोदकी गदा॥ हलं च वलभद्रस्य गगनादागतं महत्। मनसोभिमतं विप्र सौनन्दं मुशलं तथा॥ ततो यु

ढ्पयाति स्म ससैन्यो मगधाधिपः। पूर्वाविविशतुर्व्वीरौ रामो नाम जनार्द्दनो। जितस्तस्मिन्नृपवरैर्जरासन्धो महाबलः। जीवमानगतः कृष्णः स्वनामनन्यमानि
र्जितं ॥ पुनरप्याजगामाथ जरासन्धो बलान्वितः। जितश्च रामकृष्णाभ्यां अपक्रान्तो द्विजोत्तम ॥ दशचाष्टौ च संग्रामानेवमत्यन्तदुर्म्मदः। यदुभिर्म्मग
धराजा कृष्णपुरोगमैः ॥ सर्व्वेष्वेतेषु युद्धेषु यदुभिः स पराजितः। अपक्रान्तो जरासन्धः स्वल्पसैन्यैर्बलाधिकः ॥ तद्बलं यादवानां तु रक्षितं यद
नेकशः। तत्तु सान्निध्यमाहात्म्यं विष्णोरंशस्य चक्रिणः ॥ मनुष्यधर्म्मशीलस्य लीला सा जगतः पतेः। अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति ॥ मनसैव जग
त्सृष्टिं संहारं च करोति यः। तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥ तथापि यो मनुष्याणां धर्म्मास्तदनुवर्त्तते। कुर्व्वन्बलवता सन्धिं हीनैर्युद्धं
करोत्यसौ ॥ सामचोपप्रदानञ्च तथा भेदं प्रदर्शयन् ॥ करोति दण्डपातञ्च क्वचिदेव पलायनं। मनुष्यदेहिनां चेष्टामित्येवमनुवर्त्ततः ॥ लीला जग १२१
त्पतेस्तस्य छन्दतः सम्प्रवर्त्तते ॥ ० ॥ इति श्री विष्णुपुराणे पञ्चमांशे ॥ ॥ पराशर उवाच ॥ गार्ग्यं गोष्ठे द्विजं श्यालः षण्ढ इत्युक्तवान्द्विज। यदूनां स

न्निधौ सर्व्वे जहसुर्यादवास्तदा ॥ ततः कोपसमाविष्टो दक्षिणापथमेत्य सः। सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहं ॥ आराधयन्महादेवं लोहचूर्णमभक्ष
यत्। ददौ वरञ्च तुष्टोसौ वर्षे द्वादशमे हरः ॥ संतोषयामास च तं यवनेशो ह्यनात्मजः। तद्योषित्संगमाच्चास्य पुत्रोभूदलिसप्रभः ॥ तं कालयवनं नाम
राज्ये स्वे यवनेश्वरः। अभिषिच्य वनं यातो वज्राग्रकठिनोरसं ॥ स तु वीर्य्यमदोन्मत्तः पृथिव्यां बलिनो नृपान्। पप्रच्छ नारदस्तस्मै कथयामास यादवान्
॥ म्लेच्छकोटिसहस्राणां सहस्रैः सोभिसंवृतः। गजाश्वरथसम्पन्नैश्चकार परमोद्यमं ॥ प्रययौ चाव्यवच्छिन्नं छिन्नयानो दिने दिने ॥ यादवान्प्रति सामर्षो
मैत्रेय मथुरां पुरीं। कृष्णोपि चिन्तयामास क्षपितं यादवं बलं ॥ यवनेन रणे गम्यं मागधस्य भविष्यति। मागधस्य बलं क्षीणं स कालयवनो बली ॥ हन्ता त
दिदमायातं यदूनां व्यसनं द्विधा। तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयं ॥ स्त्रियोपि यत्र युद्ध्येयुः किं पुनर्वृष्णिपुंगवाः ॥ मयि मत्ते प्रमत्ते वा सुप्ते प्रव
सितेथवा ॥ यादवाभिभवं दुष्टा मा कुर्व्वन्वैरिणोधिकाः। इति संचिन्त्य गोविन्दो योजनानि महोदधिं ॥ ययाचे द्वादश पुरीं द्वारकां तत्र निर्म्ममे। महोद्य

नृवरप्राकृतलागशतशोभितां ॥ प्राकारगृहसम्बाधामिन्द्रस्येवामरावतीं । मथुरावासिनं लोकं तत्रानीय जनार्दनः ॥ आसन्ने कालयवने मथुरां च स्वयं
ययौ । बहिरावासिते सैन्ये मथुराया निरायुधः ॥ निर्जगाम स गोविन्दो ददर्श यवनश्च तं । स ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः ॥ अनुयातो महा
योगिचेतोभिः प्राप्यते न यः । तेनानुयातः कृष्णोऽपि प्रविवेश महागुहां ॥ यत्र शेते महावीर्यो मुचुकुन्दो नरेश्वरः ॥ सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्याग
तं नरं ॥ पादेन ताडयामास कृष्णं मत्वा स दुर्मतिः । दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना ॥ तत्क्रोधजेन मैत्रेय भस्मीभूतश्च तत्क्षणात् । स हि देवा १९८
सुरयुद्धे गतो हत्वा महासुरान् ॥ निद्रार्तः सुमहाकालं निद्रां वव्रे वरं सुरान् । प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति ॥ देहजेनाग्निना सद्यः स तु भ
स्मीकरिष्यति । एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसूदनं ॥ कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनः कुले । वसुदेवस्य तनयो यदुवंशसमुद्भवः ॥ मुचुकु
न्दोऽपि तत्रासौ वृद्धगार्ग्यवचः स्मरन् । संस्मृत्य प्रणिपत्यैनं सर्वं सर्वेश्वरं हरिं ॥ प्राह ज्ञातो भवान् विष्णोरंशस्त्वं परमेश्वरः । पुरा गार्ग्येण कथितमष्टा

विंशतिमे युगे ॥ द्वापरान्ते हरेर्जन्म यदुवंशे भविष्यति । स त्वं प्राप्तो न सन्देहो मर्त्यानामुपकारकृत् ॥ तथा हि सुमहत्तेजो नालं सोढुमहं तव । तथा हि सजलाम्भोद
नादधीरतरं तव ॥ वाक्यं नमति चैवोर्वी युष्मत्पादप्रपीडिता । देवासुरमहायुद्धे दैत्यसैन्यमहाभटाः ॥ न शेकुर्मे महत्तेजस्तदिदं न सहाम्यहं । संसारपतित
स्यैको जन्तोस्त्वं शरणं परं । स प्रसीद प्रपन्नार्तिहर नाशय मेऽशुभं ॥ त्वं पयोधिः पयः शैलाः सरितस्त्वं वनानि च । मेदिनी गगनं वायुरापोऽग्निस्त्वं तथा मनः ॥ बुद्धि
रव्याकृतप्राणाः प्राणेशस्त्वं तथा पुमान् । पुंसः परतरं यच्च व्याप्यजन्मविकारवत् ॥ शब्दादिहीनमजरममेयं क्षयवर्जितं । अवृद्धिनाशं तद्ब्रह्म त्वमाद्यन्तवि
वर्जितं ॥ त्वत्तोऽमराः सपितरो यक्षगन्धर्वकिन्नराः । सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः ॥ सरीसृपा मृगाः सर्वे त्वत्तः सर्वे महीरुहाः । यच्च भूतं
भविष्यद्वा किञ्चिदत्र चराचरे ॥ अमूर्तं मूर्तमथवा स्थूलं सूक्ष्मतरं तथा । तत्सर्वं त्वं जगत्कर्ता नास्ति किञ्चित्त्वया विना ॥ मया संसारचक्रेऽस्मिन् भ्राम्यता भ
गवन् सदा । तापत्रयाभिभूतेन न प्राप्ता निर्वृतिः क्वचित् ॥ दुःखान्येव सुखानीति मृगतृष्णाजलाशया । मया नाथ गृहीतानि तानि तापाय मेऽभवन् ॥ राज्यमुर्वी

र्वती काषा मित्र पद्मरूथान्मरू॥ सार्याहियज्ञनायवशक्षायाविषयाश्रुता। सुरवद्ध्यामयासाद्धं गृही नमिदमथ्यर्यी॥ पवित्रमम नंदवशनापात्सकम
रुन्मम। ध्रवलोकम् निश्चाप्य। नाथदवगन्धपिहि॥ मलः साहाय्यकामारूतु शमगमी कृत्य निहमि॥ वामनावाश्च जगमी सर्वेषां प्रियवासयेदं॥ शम्य
मीप्राप्यतकन पवमभ्युव निर्हृति॥ तन्मायामरुमनसा शून्यम्मयूजतादिकान्॥ शूवाश्च्यतापान्यश्चक्रि प्रमवाजाननीमवा॥ नमा निकक्रियास्ति
नवकष्टनिपानर्वे। प्राप्रवक्तिनवारुष्यं मन्वरूपविदफव। मूरुमत्यकविषयी मा हिंस्कदमायया॥ समत्वा नमश्व गरुकर्तृमामिपवमगव॥ सा
हत्वी शवणमपावमीक्षं संप्राफ पवममदंयतानक्षिविनु। ससावश्रमपविताप तफवता निर्वाणेपविणताय॥ मिसाहिताय॥ ॐ निश्री विघ्न
पूवाणपत्तरमीण॥ ॥पवाणरुवाव॥ ॐ श्रुतस्रुदाशनमूवूरूच्चनधीमता। पादृश पर्वरत्नानामनाधिरोगवारूवि॥ यथा सिवीक्षिमन्धिवा त्यका
नाकनवमत्र। शून्याहतपवेश्वर्या मत्वसादापर्व हिमत॥ जत्रादिथा नमहासागमनुरु विध्यसिमहाकल। ज्ञानिसत्वामस्त्रसादाहगामाहृमवाप्यसि

पवाणरुवाव॥ ॐ स्यकृपाणिपथ्यशीजगतामथ्युतीन्द्रपः। गुरूनामहाद्विनिक्रांता हृदेशसाल्पकाञ्चनान्॥ यमतकालियुगं स्ना वाप्राप्फेनधून्नपस्कता॥ न
यनानायणस्कानं प्रययोगश्चमादन॥ कृष्णापि धाक यित्वा विमूपाप्य नहिमदली। मत्र अरुमथवामग्य रुसत्थ्वस्यन्दनाद्दली॥ आनीयताय्यसनायद्या
नवर्यान्यवशयन्। पवाविरुवनिष्प। कें वर्तवयवदा फली॥ वलदेवोपिमत्रपप्रश्न। का खिलवियरु॥ स्ना निदर्शनिमात्क पयपोनन्दनमाकू
सी॥ तमाणमपांश्चणमपीय प्रथम सर्वमानिजज्ञिन। मथेवायवदन्वुणवद्धमानपत्र सर्वी॥ केश्चापिपपनिष्वक काश्चित्र पविषयज। काश्चिवक
समेकेथि ज्ञापणमपीजने स्कथा॥ प्रियान्यश्चीकान्यवदनमेपाम्य यरुलायधं। मयश्चप्रमद्रूपिता सर्व्वम्बूवस्कथापवा॥ मयी पप्रक्तनपवा
नाणवीजनवल्लक। कश्चिदाम्रमखंरुघ्र वलस्त्रमलवासक॥ अस्मयश्चापदृमनात्नकश्चित्यनयाविनी। सीतान्यमानमधिकं कवा निरूणसी
ह्यप। कश्चिघ्नवातिनकृष्णागोपानुगमनेकली॥ अपासीमानवं द्रष्टुं सकृदप्यागमिष्यति। अथवाक्रिकयालापे नपवा क्रियतीकथ॥ पद्यासा

सिर्व्विनाभन विनासार्द्धरुविथाभि।पिगामागकथाश्रामा रुरुर्विमुञ्जनथक्कि॥नस्यकास्त्ककणस्मान्तिनकामृत्यवज्ञाहिसः।तथा पिकान्विदानापमिहागम
नसिश्रयी॥कनानिकमुवककर्थ सवकाकमुनाम्रमी।दामादवासोणाविन्धःपनफ्तासकमानसः॥पिमृनप्री गिनस्मामुडुदृशभ्रातिशानिनः॥ ॥पत्र
मनडवाव॥स्त्रामन्द्रिकःसरुमुनिपनद्यभिादवानिव।गन्दासमवैणापीद्धविन्भक्तावनसः॥सदणेःप्राममधूवेःप्रमगर्हवगाव्विनेः।रामण
श्चाशिफाणपकमुर्श्या निमनोद्गवेः॥णपश्चयूर्व्वकद्रामःपनिहासमनाद्वाः।कथाश्चकावनभवसरुतोर्वगहमिषु॥श्रीशी।विमूपवाणपी २००
वमा॥ ॥पवाशवडवाव॥विल्लविरुवासूस्यसरुणपोर्महासनः।मानषक्षपनूपस्रणषस्यधवणीधृनः।निष्यादिनानूकार्य्यस्यकार्य्य
नाव्वीविवाविनः॥डपणपानमस्थविवानूशःप्राद्वावाणीं।श्रीष्ठःसर्व्वदायस्मस्यवलीमहोगसः॥श्रनन्कस्यापणोप नयास्कनमूदगुव।
श्रुत्युक्तावावणीमन मन्निक्षनमथाकवान॥वृन्दावनवनात्स्न कदम्बकमूकारव।विवनचलदवापि मदिनागश्चमूद्धनी॥श्राघ्रायमदिनाग

मवापाथपूनागनं।ततःकदम्बात्सहसा मयथवायीसलार्गली॥पतन्कीवीक्षमेश्वयप्रयस्यपनमीमूर्द।पपीवणपणपीहिःसमवनामदाचितः॥डप
गीयमानानल्मिगीगीनवाद्यविशावदैः।समस्तायन्कधम्मान्कःकालकामूर्जिकाद्यालः॥श्रागकयमूनस्नात्तमिक्षामीद्यान्मैं विद्धलः॥तस्यवावनदीसा
डमलाक्रामवमन्यवे।नागगमनतःकृष्णाहलेनभ्यहलीगती॥गृहीत्वाणीनदेगनवकर्षमदविह्वलः।यापनायामिनाया हिगम्यतामिस्कयान्य
तः॥साक्षष्टानमसहसा मागस्यियस्कनिम्नगा।यस्यास्कवलदवासोप्लावयामासनन्दन॥शवीविलीनणत्स्यतत्रासविक्षलसावना।प्रसीयवत्रवीद्राम
मुस्कमीमिणसायुध॥साब्रवीदवजानामिममणोर्यवलनदि।सार्द्धवीहलपातन नयिष्यामिसहस्रशः॥ ॥पवाशवडवाव॥श्रुत्युक्तयानिस्यापा
नयानयाप्रसादितः॥हलागमाविनगत्रमूमावयमनावलः॥ततःकाकेम्मवेकान्तिराजगममहात्मनः।श्रवतसान्यस्तीवानूगृहीत्वेकवज्रकुण्डलं
॥वनूनवस्त्रमिहिमाक्षमी मालामम्लानपंकजां।समुद्रार्द्दनथावस्त्रनीलसश्रीवयस्कवा॥कृत्वावर्तसःसतदावानूकुण्डलभूषितः।नीलाम्ववधनःश्रग्वी

गुणुरुकान्तिसीयतः॥ उत्कं विरहसितानम उत्पलमस्तकावतंसा। मासद्वयनया गत्वा पुनः स मथुरां पुरीं। रेवतीं नाम तनयां रैवतस्य महीपतेः॥ उपयेमे बलस्तस्यां
जज्ञाते निशठोल्मुकौ॥ ॥ इति श्रीविष्णुपुराणे पञ्चमेंशे॥ ॥ पराशर उवाच॥ भीष्मकः कुण्डिने राजा विदर्भविषये भवत्। रुक्मी तस्याभवत्पुत्रो रुक्-
मिणी च वरांगना॥ रुक्मिणीं चकमे कृष्णः सा च तं चारुहासिनी। न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे॥ ददौ च शिशुपालाय जरासन्धप्रचोदितः॥ भीष्मकः
रुक्मिणा सार्द्धं रुक्मिणीमुरुविक्रमः॥ विवाहार्थं ततः सर्वे जरासन्धमुखा नृपाः॥ भीष्मकस्य पुरं जग्मुः शिशुपालप्रियैषिणः॥ कृष्णोपि बलभद्राद्यैर्यदुभिः २०१
परिवारितः॥ प्रययौ कुण्डिनं द्रष्टुं विवाहं चैद्यभूभृतः॥ श्वोभाविनि विवाहे तु तां कन्यां हृतवान्हरिः॥ विपक्षभारमासज्य रामाद्येष्वथ बन्धुषु। ततश्च
पौण्ड्रकः श्रीमान्दन्तवक्रो विदूरथः॥ शिशुपालजरासन्धशाल्वाद्याश्च महीभृतः॥ कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमं॥ निर्जिताश्च समागम्य रामाद्यै-
र्यदुपुंगवैः॥ कुण्डिनं न प्रवेक्ष्यामि अहत्वा युधि केशवं॥ कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमनुद्रुतः॥ हत्वा बलं सनागाश्वं पत्तिस्यन्दनसंकुलं॥ निर्जितः प-

२०२

